VERZEICHNIS DER ORIENTALISCHEN HANDSCHRIFTEN
IN DEUTSCHLAND · SUPPLEMENTBAND 9,1

VERZEICHNIS DER ORIENTALISCHEN HANDSCHRIFTEN
IN DEUTSCHLAND

IM EINVERNEHMEN MIT DER DEUTSCHEN
MORGENLÄNDISCHEN GESELLSCHAFT HERAUSGEGEBEN VON

WOLFGANG VOIGT

SUPPLEMENTBAND 9,1

KAUṢĪTAKI-BRĀHMAṆA

TEXT

HERAUSGEGEBEN VON

E. R. SREEKRISHNA SARMA

FRANZ STEINER VERLAG GMBH · WIESBADEN

1968

# KAUṢĪTAKI-BRĀHMAṆA

1

TEXT

HERAUSGEGEBEN VON

E. R. SREEKRISHNA SARMA

Kauṣītakibrāhmaṇa. Malayalam.

FRANZ STEINER VERLAG GMBH · WIESBADEN

1968

Z 106
.2
07 V4
suppl.

All rights reserved

This book is copyright under the Berne Convention. Apart from any fair dealing for the purposes of private study, research, criticism or review, as permitted under the Copyright Act, 1911, no portion may be reproduced by any process without written permission. Enquiry should be made to the Publishers. Printed with the financial aid of the German Research Associaton. © 1968 Franz Steiner Verlag GmbH., Wiesbaden.
Satz und Druck: Rheingold-Druckerei.

Printed in Germany.

Z 106
.2
07 V4
suppl.
v. 9 : 1

## PREFACE

In 1956 at the Adyar Library, Madras, I had the opportunity to go through the brittle leaves of the palm-leaf manuscript containing Udaya's exhaustive commentary on the Kauṣītakibrāhmaṇa. (See No. 59 on p. 24 of The Descriptive Catalogue of the Adyar Library, Vol. 1, Vedic, 1942.) Its lucidity and particularly the method of giving detailed information about the procedure of rituals attracted my attention, and I had a mind to bring out an edition of this work.

In 1965, when I got an invitation to West Germany as a visiting Professor at the Institut für Indologie, Albertus-Magnus-Universität, Köln, through the good offices of Prof. K. L. Janert, I decided to make use of the leisure I might have for one year to edit Udaya's commentary.

For this purpose I procured a copy of the same in a well-preserved palm-leaf manuscript in Malayāḷam characters from Varikkāśśery Mana, a family of traditional scholars, from a place near Ottapalam in Kerala, and copied down most of the work in Devanāgarī script.

The Institut für Indologie procured for me a microfilm as well as a photo-copy of the Adyar manuscript referred to above. But when the question of editing the commentary was seriously taken up, I found that the work was based on a text of the Kauṣītakibrāhmaṇa (KB) which was in several points different from that which was edited by B. Lindner in 1887 (L) and also from that printed in Poona in 1911 (P) under the title Ṛgvedāntargataṃ Śāṅkhāyanabrāhmaṇam (Ānandāśrama Sanskrit Series, No. 65).

On examination I also found that the readings of the recension of the KB on which Udaya's commentary was based were decidedly superior to those in the two printed editions (L and P), and I began to search for manuscripts of the KB from Kerala and succeeded in that effort.

Even before that, the Institut für Indologie, Albertus-Magnus-Universität, had kindly procured for me a microfilm as well as a photo-copy of the manuscript of the text of the KB in Malayāḷam characters (IO) from the India Office Library, London, which had been consulted by Lindner. Going through the text I could realize the significance of A. B. Keith's statement that Lindner could have made use of this Malayāḷam manuscript much more effectively. For now it became very clear to me that without editing the text of the KB based on this recension from Kerala there was no point in publishing Udaya's commentary.

Through my teacher Mr. K. P. Nārāyaṇa Pisharoti, I could get transcripts of two manuscripts, one of the complete text of the KB ($BM^1$) and the other of the commentary for ten chapters (viz., chapters 20–30), both belonging to the Brahmasvam Maṭham of Trichur. With this material I began to work on the text of the KB and could finish copying down the whole text before I left Köln for India in January, 1966.

In the meantime, I was corresponding with a few traditional scholars in Kerala who were well-versed in chanting as well as in conducting sacrifices. One of them, aged 76, was Mr. RĀMAN NAMPŪTIRI of ĒRKKARA Mana. This enthusiastic scholar consented to chant the entire text of the KB for recording. Accordingly, I could tape-record the entire text (**ER**) in April, 1966.

Besides, I could also procure two more palm-leaf manuscripts (**BM²** and **BM³**) of the text from the Brahmasvam Maṭham.

Detailed information on the manuscripts on which the present text is based is given below:

I. Photo-copy of the palm-leaf manuscript from the India Office Library, London (designated M by LINDNER and **IO** in the present edition). See No. 4267, Vol. II, Pt. I, p. 21, left hand column of the Catalogue of the Sanskrit and Prākrit Manuscripts in the Library of the India Office.

II. Palm-leaf manuscript (29,5 x 5,5 cm) from the Brahmasvam Maṭham, Trichur, No. 166 (designated **BM¹**). Script: Malayāḷam. Folios: 179. Lines up to the middle of the manuscript: 8 per page, afterwards: 9 or 10 per page. Legible good hand. The ends of a few leaves are injured. Complete in 30 Adhyāyas. On the last page inscribed: Vaṭakke Maṭham, Brahmasvam vaka Kauṣītakam Brāhmaṇam. Up to folio 87 the '*na nna nya*' method of numbering, afterwards the Malayāḷam numerals.

III. Palm-leaf manuscript (38 x 4,5 cm) belonging to the Brahmasvam Maṭham, Trichur, No. 28 (designated **BM²**). Folios: 145. The KB in 30 Adhyāyas ends on 124. Folios 125 to 145 contain the Mahāvratam. Lines: 8 per page. Very legible and beautiful hand. The '*na nna nya*' method of numbering.

IV. Palm-leaf manuscript (35 x 4,5 cm) belonging to the Brahmasvam Maṭham, Trichur, No. 102 (designated as **BM³**). Folios: 113. Lines: 9 per page. Beautiful legible hand. Very old. Most of the leaves are broken and in disorder. Complete in 30 Adhyāyas but with gaps due to injured leaves. The '*na nna nya*' method of numbering. Only sparingly used by me.

V. Paper manuscript (foolscap size) in 5 volumes belonging to Mr. ĒRKKARA RĀMAN NAMPŪTIRI (designated **EM**). This manuscript contains the text of the KB written in red ink and the commentary written in blue ink. Some of the pages are partly eaten up by white ants. The commentary was copied by the owner himself from a palm-leaf manuscript belonging to TAIKKĀṬṬU Mana.

Apart from these five manuscripts containing the text in its entirety, the manuscripts of the commentary belonging to the Adyar Library, to the Madras Government Oriental Manuscript Library (modern transcript on paper), to VARIKKĀŚŚERY Mana and to the Brahmasvam Maṭham are also made use of.

The edition of LINDNER (1887) and the text printed in Poona (Ānandāśrama Skt. Ser. 65) are designated **L** and **P**, respectively.

In all cases of doubt the authority I have relied upon was the recital of the KB by Mr. ĒRKKARA RĀMAN NAMPŪTIRI (designated **ER**).



When printing was in progress and the second proofs were being received by me, I could procure three more palm-leaf manuscripts of the text of the KB in Malayāḷam characters which were consulted in all doubtful cases. A description of these manuscripts is given below:

VI. Belonging to AKKIṬṬAM Mana, Kumāranallūr, Kerala. This consists of the 30 Adhyāyas of the KB (folios 1 to 166 with the Malayāḷam numerals) and the Āraṇyaka in six Adhyāyas (folios 167 to 193); 26 x 4,5 cm in size, 9 lines per page, 26 letters per line.

VII. Belonging to KĀPPARA Mana of the same place referred to above. This manuscript consists of the KB (folios 1 to 167) and the Āraṇyaka (folios 168 to 196); 23,5 x 4 cm in size, 10 lines per page, 27 letters per line. Dated as: Kollam era 1085 *Meṭam* 26 Wednesday, the first day of *aparapakṣa* and *coti* star (corresponding to circa May, 1910).

VIII. Belonging to ŚAṄKARAN NAMPŪTIRI of KĀPPARAKAṆAYŪR Mana of the same place referred to above. This manuscript also consists of the KB (folios 1 to 148) and the Āraṇyaka (folios 149 to 171). Dated as: Kollam era 1097, *Eṭavam* 16 (corresponding to circa May, 1922). This manuscript was written, as I am informed, with very special care and has been gone through and checked by about sixteen traditional Vaidikas. It is said that the man who actually wrote down the manuscript used to discard that leaf altogether on which even one single mistake was found. This manuscript has been very helpful to me because of its distinctive legibility and authenticity due to the reason mentioned above.

All these Malayāḷam manuscripts are written well with utmost care and do not show much variation from each other. The differences in their readings, if at all, are of negligible importance[1].

The two printed editions of KB (**L** and **P**) which are referred to above do not punctuate the text. The Malayāḷam manuscripts without exception put a *daṇḍa* to mark the end of each passage. There is also another notable way of marking the ending of a passage: Before the third or fourth letter of the ending of a passage[2] there is a marking which shows that the reciter has to prepare himself for a *svaraṇa*, as it is called by the Nampūtiris, which is in the form of a slur (*kampa*). The recitation by Mr. Ē. RĀMAN NAMPŪTIRI also clearly marks the end of a passage by the slur. Besides, the number of the passages in each *Khaṇḍa* is indicated at the end by the words *puram* (21) *balam* (33), etc., using the *Kaṭapayādi* system

[1] There are two schools of Rigvedins in Kerala, one designated as *Triśśūr yogam* and the other as *Tirunāvāya yogam*. These two schools have some small differences in the recitations of the RV as well as in ritual procedure. Mr. Ē. RĀMAN NAMPŪTIRI belongs to the *Tirunāvāya* school. For a difference between readings of these schools see: footnote No. 6–6 on page 92.

[2] When the last letter but one of the passage is a *guru* or the passage ends with *iti*, the mark is found before the third letter from last; but when the last letter but one is a *laghu*, it is found before the fourth letter.

of notation. Thus I had no doubt whether the passages were to be punctuated or not.

Not only that, as KEITH complains, LINDNER did not make use of the Malayāḷam manuscript (IO) effectively, but he also misrepresented many readings found in that manuscript[3]. His remarks that the Malayāḷam manuscript contains 260 Khaṇḍikas and that five Khaṇḍikas, namely, XVI 10 and XXVI 3 to 6, are omitted in the manuscript by mistake of the scribe (*Einleitung*, pp. VII and VIII), are not correct. The Malayāḷam manuscripts all agree in the number of Khaṇḍas which is 272. The Khaṇḍas referred to above which are found in LINDNER's edition (L) based on the non-Malayāḷam manuscripts are uniformly omitted in the Malayāḷam manuscripts and in the commentary referred to above.

A detailed statement of the number of Adhyāyas and the Khaṇḍas found in LINDNER's edition (L) as against the Malayāḷam manuscripts is given below:

| Adhyāya | No. of Khaṇḍas | | Adhyāya | No. of Khaṇḍas | |
|---|---|---|---|---|---|
| | Lindner | Malayāḷam Mss. | | Lindner | Malayāḷam Mss. |
| I | 5 | 5 | XVI | 11 | 10 |
| II | 9 | 9 | XVII | 9 | 7 |
| III | 9 | 12 | XVIII | 14 | 9 |
| IV | 14 | 10 | XIX | 10 | 7 |
| V | 10 | 10 | XX | 4 | 6 |
| VI | 15 | 11 | XXI | 6 | 7 |
| VII | 10 | 12 | XXII | 9 | 6 |
| VIII | 9 | 12 | XXIII | 8 | 11 |
| IX | 6 | 6 | XXIV | 9 | 8 |
| X | 6 | 10 | XXV | 15 | 14 |
| XI | 8 | 9 | XXVI | 17 | 14 |
| XII | 8 | 10 | XXVII | 7 | 12 |
| XIII | 9 | 7 | XXVIII | 10 | 8 |
| XIV | 5 | 7 | XXIX | 8 | 8 |
| XV | 5 | 6 | XXX | 11 | 9 |
| | | | Total | 276 | 272 |

According to the present edition the entire KB contains 6962 passages.

On the subject of editing the Kauṣītakibrāhmaṇa I had a number of very interesting and useful discussions with my European colleagues and friends. I am especially grateful to the late lamented veteran Vedic scholar Prof. LOUIS RENOU at Paris, Prof. PAUL THIEME at Tübingen, Prof. KARL HOFFMANN at Erlangen,

[3] See:

| Page No. | Footnote No. | Page No. | Footnote No. |
|---|---|---|---|
| 32 | 8 | 126 | 5; 7 |
| 46 | 8 | 136 | 3 |
| 64 | 2 | 140 | 2 |
| 65 | 1 | 143 | 7 |
| 77 | 4 | 146 | 10 |
| 82 | 12 | 147 | 7 |
| 111 | 2 | 158 | 1 |



Prof. THOMAS BURROW at Oxford, Prof. JOHANNES C. HEESTERMAN at Utrecht, and, last not least, Dr. WOLFGANG TREUE of the German Research Association at Bad Godesberg. The debt I owe to my friend Prof. KLAUS L. JANERT of the Albertus Magnus University, Cologne, cannot be repaid with a formal giving of thanks. Furthermore, I feel deeply obliged to the Secretary General of the Deutsche Morgenländische Gesellschaft (the German Oriental Society), Dr. WOLFGANG VOIGT, Director of the Oriental Department at the Staatsbibliothek, Marburg and W. Berlin, for his assistance and for the great interest he has always shown in the progress of my work. Indeed, both, Prof. JANERT and Dr. VOIGT are mostly responsible for my taking up this work, collecting the manuscripts, recording the text on tape, and bringing out the present edition of the Kauṣītakibrāhmaṇa.

My warmest thanks are also due to my publishers, Herr FRANZ STEINER † and Dr. CLAUS STEINER as well as to the printers who have spared no pains to master a very difficult task most competently. I am very grateful to Herr KARL JOST, Steiner-Verlag (Wiesbaden), for all the help he has given while the work was passing through the press.

In working on this edition, I have received assistance from several German institutions. I wish to express my sincerest thanks for their generous support, notably to the Albertus-Magnus-Universität (Köln) for its liberal hospitality, the Heinrich-Hertz-Stiftung (Düsseldorf) for granting my travelling expenses, and the Deutsche Forschungsgemeinschaft (the German Research Association, Bad Godesberg) not only for a subsidy towards the cost of printing.

In India, my teacher Mr. NĀRĀYANA PISHAROTI took a very keen interest in the work and helped me in many ways. But if there is any merit in this work the credit for that should go to Mr. Ē. RĀMAN NAMPŪTIRI who even neglecting his old age and ill-health recited the entire text of the Kauṣītakibrāhmaṇa for my recording. His enthusiasm and joy in doing this work is matched only by his love for the cause of his Vedic Śākhā, which is Kauṣītaka.

A number of colleagues at Tirupati have helped me in preparing the various indexes and the press-copy of the text. My thanks are due to Messrs. M. SRIMANNARAYANA MURTHY, K. S. RAMAMURTHY, K. SRINIVASAVARADAN, S. V. BHASKAR and V. ANJANEYA SARMA who have rendered help in one way or other. It was my luck that Pandit K. P. AITHAL of the Adyar Library could go through the proofs. His intimate knowledge of *śrauta* procedure has helped me in improving the usefulness of the indexes. My thanks are due to him.

I hope this edition will be found useful to the scholars and I shall succeed in bringing out the elaborate commentary by Udaya on the Kauṣītakibrāhmaṇa in the near future.

*E. R. Sreekrishna Sarma*

Department of Sanskrit,
Sri Venkateswara University,
Tirupati, Andhra Pradesh,
1-7-1968

# कौषीतकिब्राह्मणविषयसूची

## I अग्न्याधेयम् ।

1. अग्नेस्तिस्रस्तन्वः । ........................................ 1.
2. पावकेष्टिः पवमानेष्टिश्च । ................................... 2.
3. प्रयाजानुयाजानामग्निदेवताकत्वम् । ........................... 3 (१–१५).
4. पुनराधेयकालः । ........................................ 3 (१६–३०).
5. पुनराधेयपुरोळाशः । ..................................... 3 (३१–३३).
6. प्रयाजानुयाजानां सविभक्तिकत्वम् । ........................... 4 (१–९).
7. आज्यभागौ । ........................................... 4 (१०–२०).
8. पुनराधेयेष्टिः । ......................................... 5.

## II अग्निहोत्रम् ।

1. पयोहोमः । ............................................. 1, 2.
2. पयःप्राशनम् । ........................................... 3.
3. अग्न्युपस्थानम् । ........................................ 4.
4. वाग्ब्राह्मणम् । .......................................... 5.
5. सायमग्निहोत्रम् । ........................................ 6.
6. अग्निहोत्रविज्ञानफलम् । .................................... 7.
7. अग्निहोत्रकालमीमांसा । .................................... 8, 9.

## III दर्शपूर्णमासौ ।

1. उपवासकालनिर्णयः । ...................................... 1.
2. सामिधेन्यः । ............................................. 2.
3. आर्षेयानुवचनम् । ........................................ 3 (१–१९).
4. देवतावाहनम् । ........................................... 3 (२०) – 4 (८).
5. स्रुगादापनम् । ........................................... 4 (९–११).
6. प्रयाजाः । ............................................... 4 (१२) – 5 (१४).
7. आज्यभागौ । ............................................. 5 (१५) – 6 (११).
8. याज्यापुरोनुवाक्यास्वरूपम् । ................................. 6 (१२) – 7 (१३).

9. प्रधानयागः । ........ 7 (१४) – 8 (७).
10. स्विष्टकृद्यागः । ........ 8 (८–१८).
11. इळोपाह्वानम् । ........ 8 (१९) – 9 (२७).
12. अनुयाजाः । ........ 10 (१–५).
13. सूक्तवाकः । ........ 10 (६–२८).
14. शंयोर्वाकः । ........ 10 (२९–३५).
15. पत्नीसंयाजाः । ........ 11, 12.

## IV विकृतीष्टयः ।

1. अनुनिर्वाप्येष्टिः । ........ 1.
2. अभ्युदितेष्टिः । ........ 2.
3. अभ्युद्दृष्टेष्टिः । ........ 3.
4. दाक्षायणयज्ञः । ........ 4.
5. इळादधेष्टिः । ........ 5 (१–६).
6. सार्वसेनियज्ञः । ........ 5 (७–११).
7. शौनकयज्ञः । ........ 5 (१२–१६).
8. वसिष्ठयज्ञः । ........ 6 (१–११).
9. साकंप्रस्थाय्येष्टिः । ........ 6 (१२–१९).
10. मुन्ययनेष्टिः । ........ 7 (१–४).
11. तुरायणेष्टिः । ........ 7 (५–१४).
12. आग्रयणेष्टिः । ........ 8 – 10.

## V चातुर्मास्यानि ।

1. चातुर्मास्यकालः । ........ 1 (१–१२).
2. वैश्वदेवपर्व । ........ 1 (१३) – 2 (२८).
3. वरुणप्रघासपर्व । ........ 3 – 5.
4. साकमेधपर्व । ........ 6, 7.
5. पितृयज्ञः । ........ 8, 9.
6. शुनासीर्यपर्व । ........ 10.

## VI शूलगवो ब्रह्मत्वं च ।

1. शूलगवदेवताब्राह्मणम् । ........ 1 – 3.
2. ब्रह्मत्वार्थवादः । ........ 4.



3. ब्रह्मत्वमीमांसा । ........ 5.
4. प्रायश्चित्ताहुतयः । ........ 6.
5. ब्रह्मणः कर्माणि । ........ 7 – 10.

## VII सोमः ।

1. दीक्षणीयेष्टिः । ........ 1 – 6.
2. प्रायणीयेष्टिः । ........ 7 – 11 (१२).
3. सोमक्रयः । ........ 11 (१३) – 12 (४३).

## VIII सोमः ।

1. अग्निमन्थनम् । ........ 1 – 2 (१०).
2. आतिथ्येष्टिः । ........ 2 (११) – 3 (१६).
3. प्रवर्ग्ये पूर्वः पटलः । ........ 4 – 7.
4. प्रवर्ग्ये उत्तरः पटलः । ........ 8.
5. उपसदः । ........ 9 – 12.

## IX सोमः ।

1. अग्निप्रणयनम् । ........ 1, 2.
2. हविर्धानप्रवर्तनम् । ........ 3, 4.
3. अग्नीषोमप्रणयनम् । ........ 5, 6.

## X सोमः (अग्नीषोमीयपशुः) ।

1. यूपमीमांसा । ........ 1 – 2 (१६).
2. यूपसंस्कारः । ........ 2 (१७) – 4 (१८).
3. शेषभक्षविचारः । ........ 5.
4. पशौ प्रयाजानुयाजाः । ........ 6.
5. पर्यग्निकरणम् । ........ 7 (१–६).
6. अध्रिगुप्रैषः । ........ 7 (७) – 8 (४).
7. स्तोकानुवचनम् । ........ 8 (५–८).
8. वपायागः । ........ 8 (९–२१).
9. पशुपुरोळाशः । ........ 8 (२२–३२).
10. मनोतानुवचनम् । ........ 9 (१–१६).
11. पशोरवदानानि । ........ 9 (१७–२४).

12. वनस्पतियागः । .......... 9 (२५) – 10 (९).
13. प्रवृताहुती । .......... 10 (१०–१९).

## XI सोमः ।

1. प्रातरनुवाकः । .......... 1 – 9.

## XII सोमः ।

1. आपोनप्त्रीयम् । .......... 1 – 4.
2. उपांश्वन्तर्यामग्रहौ । .......... 5.
3. बहिष्पवमाने होतृकर्म । .......... 6 (१) – 7 (५).
4. सवनीयः पशुः । .......... 7 (६) – 10 (३७).

## XIII सोमः ।

1. सदःप्रसर्पणम् । .......... 1 (१–८).
2. हविष्पङ्क्तियागः । .......... 1 (९) – 3 (१९).
3. सोमभेदविचारः । .......... 4 (१–१२).
4. द्विदेवत्यग्रहाः । .......... 4 (१३) – 6 (१६).
5. अच्छावाकप्रचारः । .......... 6 (१७–२४).
6. ऋतुयाजाः । .......... 7.

## XIV सोमः (प्रातःसवनम्) ।

1. आज्यशस्त्रम् । .......... 1 – 4.
2. प्रउगशस्त्रम् । .......... 5 – 7.

## XV सोमः (माध्यंदिनसवनम्) ।

1. ग्रावस्तुत्कर्म । .......... 1.
2. मरुत्वतीयशस्त्रम् । .......... 2 – 4.
3. निष्केवल्यशस्त्रम् .......... 5, 6.

## XVI सोमः (तृतीयसवनम्) ।

1. आदित्यग्रहः । .......... 1.
2. आर्भवपवमानस्तोत्रम् । .......... 2 (१–१५).
3. सावित्रग्रहः । .......... 2 (१६–३५).





4. वैश्वदेवशस्त्रम् । .......... 3 – 5.
5. पात्नीवतग्रहः । .......... 6.
6. आग्निमारुतशस्त्रम् । .......... 7, 8.
7. सोमयागदेवतामीमांसा । .......... 9.
8. उक्थ्यम् । .......... 10.

## XVII सोमः ।

1. षोळशी । .......... 1 – 4 (१५).
2. अतिरात्रप्रशंसा । .......... 4 (१६–२३).
3. पर्यायशस्त्राणि । .......... 5 – 7.

## XVIII सोमः ।

1. आश्विनशस्त्रम् । .......... 1 – 4.
2. हारियोजनग्रहः । .......... 5 (१–१७).
3. शाकलहोमः । .......... 5 (१८–२०).
4. ज्योतिष्टोमसमापनम् । .......... 5 (२१) – 6 (४).
5. अवभृथः । .......... 6 (५) – 8 (८).
6. अनूबन्ध्या । .......... 8 (९) – 9 (२१).
7. उदवसानीयेष्टिः । .......... 9 (२२–३६).

## XIX गवामयनम् ।

1. अग्निचयनम् । .......... 1 – 4.
2. चतुर्विंशमहः । .......... 5 – 7.

## XX अभिप्लवषळहः ।

1. अभिप्लवषळहप्रशंसा । .......... 1.
2. ज्योतिः प्रथममहः । .......... 2.
3. गौर्द्वितीयमहः । .......... 3, 4.
4. आयुस्तृतीयमहः । .......... 5, 6.

## XXI अभिप्लवषळहः ।

1. गौश्चतुर्थमहः । .......... 1, 2.
2. आयुः पञ्चममहः । .......... 3.

3. ज्योतिः षष्ठमहः । .......................................... 4, 5.
4. अभिप्लवषळहशस्त्रच्छन्दोविचारः । .............................. 6, 7.


## XXII पृष्ठ्यषळहः ।


1. प्रथममहः । .......................................... 1, 2.
2. द्वितीयमहः । .......................................... 3, 4.
3. तृतीयमहः । .......................................... 5, 6.


## XXIII पृष्ठ्यषळहः ।


1. चतुर्थमहः । .......................................... 1 – 3.
2. पञ्चममहः । .......................................... 4 – 6.
3. षष्ठमहः । .......................................... 7 – 11.


## XXIV अभिजित् ।


1. प्रातःसवनशस्त्रक्लृप्तिः । .......................................... 1, 2.
2. माध्यंदिनशस्त्रक्लृप्तिः तृतीयसवनं च । .......................... 3.
3. स्वरसामानः । .......................................... 4 – 7.
4. तृतीयसवने वैश्वदेवशस्त्रे विशेषः । .......................... 8.


## XXV विषुवान् विश्वजिच्च ।


1. विषुवत्कालः । .......................................... 1 (१–१०).
2. प्रातःसवनशस्त्रक्लृप्तिः । .......................................... 1 (११) – 2 (३२).
3. माध्यंदिनसवनशस्त्रक्लृप्तिः । .................................. 3 – 8 (६).
4. तृतीयसवनशस्त्रक्लृप्तिः । .......................................... 8 (७) – 9 (२८).
5. विश्वजित् । .......................................... 10 – 13 (१७).
6. विश्वजिदनुष्ठातुर्व्रतम् । .......................................... 13 (१८) – 14 (२२).


## XXVI छन्दोमाः ।


1. गवामयनसत्रे अह्नां क्रमः । .......................................... 1, 2.
2. छन्दोमानां सामान्यतो निरूपणम् । .............................. 3.
3. प्रथमच्छन्दोमशस्त्रक्लृप्तिः । .......................................... 4 – 6.
4. द्वितीयच्छन्दोमशस्त्रक्लृप्तिः । .......................................... 7 – 9.
5. तृतीयच्छन्दोमशस्त्रक्लृप्तिः । .......................................... 10 – 14.




## XXVII दशममहः ।


1. दशमाहःसंबन्धिविशेषविचारः । .......................................... 1, 2.
2. दशमाहःशस्त्रक्लृप्तिः । .......................................... 2 – 6.
3. मानसस्तोत्रशस्त्रकर्म । .......................................... 7, 8.
4. तनूवदनप्रशंसा । .......................................... 9.
5. ऋत्विक्कर्म । .......................................... 10 – 11 (१६).
6. दशरात्रभेदाः । .......................................... 11 (१७–२६).
7. दशरात्रस्य सर्वच्छन्दोभाक्त्वम् । .............................. 12.


## XXVIII होत्रकशस्त्राणि (प्रातःसवनम्) ।


1. प्रैषनिगदार्थवादः । .......................................... 1 – 2 (३).
2. मैत्रावरुणकर्माणि । .......................................... 2 (४) – 3 (२२).
3. प्रस्थितयाज्याः । .......................................... 3 (२३–३८).
4. अच्छावाकीयम् । .......................................... 4 – 6 (२०).
5. ऋतुप्रैषमीमांसा । .......................................... 6 (२१–२७).
6. होत्रकशस्त्रसामान्यविचारः । .............................. 6 (२८) – 8 (२०).


## XXIX होत्रकशस्त्राणि (माध्यंदिनसवनम्) ।


1. ग्रावस्तुत्कर्म । .......................................... 1.
2. दधिघर्मादिप्रचारः । .......................................... 2.
3. होत्रकशस्त्रक्लृप्तिः । .......................................... 3 – 8.


## XXX होत्रकशस्त्राणि (तृतीयसवनम्) ।


1. आदित्यग्रहप्रचारादि । .......................................... 1 (१–२१).
2. मैत्रावरुणशस्त्रक्लृप्तिः । .......................................... 1 (२२) – 3 (२२).
3. ब्राह्मणाच्छंसिशस्त्रक्लृप्तिः । .......................................... 4, 5.
4. अच्छावाकशस्त्रक्लृप्तिः । .......................................... 6, 7.
5. छन्दोमेषु विशेषः । .......................................... 8.
6. अतिरात्रवाजपेयाप्तोर्यामादिषु विशेषः । .......................... 9.

## अथ
## कौषीतकिब्राह्मणम्

अस्मिन् वै लोक उभये देवमनुष्या आसुः ।१। ते देवाः स्वर्गँल्लोकं यन्तोऽग्निमचुः ।२। त्वं नोऽस्य लोकस्याध्यक्ष एधीति ।३। तानग्निरुवाच ।४। अथ यद् वोऽहं घोरसंस्पर्श-तमोऽस्मि ।५। अनपचायितारो मनुष्याः ।६। कथं वस्तद् भविष्यति यन्मनुष्येष्विति ।७। ते देवा ऊचुः ।८। तस्य वै ते वयं घोरास्तनूर्विनिधास्यामः ।९। अथ यैव ते शिवा शग्मा[1] यज्ञिया तनूः ।१०। तयेह मनुष्येभ्यो भविष्यसीति ।११। तस्याप्सु पवमानामदधुः ।१२। वायौ पावकाम् ।१३। आदित्ये शुचिम् ।१४। अथ यैवास्य शिवा शग्मा[1] यज्ञिया तनूरासीत् ।१५। तयेह मनुष्येभ्योऽतपत् ।१६। एता वा अग्नेस्तन्वः ।१७। तद् यदेता देवता यजति ।१८। अत्राग्निः साङ्गः सतनुः[2] प्रीतो भवति ।१९। ता वै तिस्रो भवन्ति ।२०। त्रयो वा इमे लोकाः ।२१। इमानेव तल्लोकानाप्नोति ।२२ ॥1॥

[1] L. P. शग्म्या [2] L. P. सतनः

पौर्णमासं प्रथमायै तन्त्रं भवति ।१। आमावास्यं द्वितीयायै ।२। तेन हास्य दर्शपूर्णमासा-वन्वारब्धौ भवतः ।३। ईळितवत्यौ हव्यवाड्वत्यौ प्रथमायै संयाज्ये ।४। तत् संयाज्यारूपम् ।५। द्व्यग्नी द्वितीयायै ।६। द्वौ ह्यग्नी यजति ।७। सप्तदशसामिधेनीका तृतीया ।८। सप्तदश-सामिधेनीका वा इष्टिपशुबन्धाः ।९। तदिष्टिपशुबन्धानाप्नोति ।१०। सद्वन्तावाज्यभागौ भवतः ।११। असानीति वा अग्नीनाधत्ते ।१२। स्यामिति कामयते ।१३। स यदि ह वा अपि स्वैषावीर इव सन्नग्नीनाधत्ते ।१४। क्षिप्र एव संभवति ।१५। क्षिप्रे भोग्यतामश्नुते ।१६। यः सद्वन्तौ कुरुते ।१७। विराजौ संयाज्ये ।१८। श्रीर्विराळन्नाद्यम् ।१९। श्रियो विराजो ऽन्नाद्यस्योपाप्त्यै ।२०। ता वै गायत्र्यो भवन्ति ।२१। गायत्रो वा अग्निर्गायत्रच्छन्दाः ।२२। स्वेनैव तच्छन्दसाग्नीनाधत्ते ।२३। ता वा उपांशु भवन्ति ।२४। रेतःसिक्तिर्वा अग्न्याधेयम् ।२५। उपांशु वै रेतः सिच्यते ।२६। अभिरूपा भवन्ति ।२७। यद् यज्ञेऽभिरूपं तत् समृद्धं यज्ञस्यैव समृद्ध्यै ।२८। द्वादश दद्यात् ।२९। द्वादश वै मासाः संवत्सरः ।३०। संवत्सरस्यै-वाप्त्यै[1] ।३१। अश्वं त्रयोदशं ददाति ।३२। यस्त्रयोदशो मासस्तस्याप्त्यै[2] ।३३ ॥2॥

[1] ER. omits [2] L. P. Here ends *Khaṇḍa* 1

देवासुरा वा एषु[1] लोकेषु संयत्ता आसुः ।१। तेभ्योऽग्निरपाक्रामत् ।२। स ऋतून् प्राविशत् ।३। ते देवा हत्वासुरान् विजित्याग्निमन्वैच्छन् ।४। तं यमश्च वरुणश्चान्वपश्यताम् ।५। तमुपामन्त्रयन्त ।६। तमज्ञपयन् ।७। तस्मै वरमददुः ।८। स हैतं वरं वव्रे ।९। प्रयाजान् मे अनुयाजाँश्च केवलान् घृतं चापां पुरुषं चौषधीनामिति ।१०। तस्मादाहुराग्नेयाः प्रयाजानुयाजा आग्नेयमाज्यमिति ।११। ततो वै देवा अभवन् ।१२। परासुराः ।१३। भवत्यात्मना ।१४। परास्य द्वेष्यो य एवं वेद[2] ।१५। तदाहुः कस्मिन्नृतौ पुनरादधीतेति ।१६। वर्षास्विति हैक आहुः ।१७। वर्षासु वै सर्वे कामाः ।१८। सर्वेषामेव कामानामाप्त्यै ।१९। मध्यावर्षे पुनर्वसू नक्षत्रमुदीक्ष्य पुनरादधीत ।२०। पुनर्मा वसु वित्तमुपनमत्विति ।२१। अथो पुनःकामस्योपाप्त्यै ।२२। तद् वै न तस्मिन् काले पूर्वपक्षे पुनर्वसुभ्यां संपद्यते ।२३। यैवैषाषाढ्या उपरिष्टादमावास्या भवति ।२४। तस्यां पुनरादधीत ।२५। सा पुनर्वसुभ्यां संपद्यते ।२६। उपाप्तोऽमावास्यायां कामो भवति ।२७। उपाप्तो वर्षासु ।२८। उपाप्तः पुनर्वस्वोः ।२९। तस्मात् तस्यां पुनरादधीत ।३०। पञ्चकपालः पुरोळाशो भवति ।३१। पञ्चपदा पङ्क्तिः ।३२। पाङ्क्तो वै यज्ञो यज्ञस्यैवाप्त्यै ।३३ ॥3॥

[1] IO. त्रिषु [2] L. P. Here ends *Khaṇḍa* 2

विभक्तिभिः प्रयाजानुयाजान् यजति ।१। ऋतवो वै प्रयाजानुयाजाः ।२। ऋतुभ्य एनं तत् समाहरति ।३। अग्न आ याहि वीतयेऽग्निं दूतं वृणीमहेऽग्निनाग्निः समिध्यतेऽग्निर्वृत्राणि जङ्घनदग्नेः स्तोमं मनामहेऽग्ना यो मर्त्यो दुव इत्येतासामृचां प्रतीकानि विभक्तयः ।४। ता वै षड् भवन्ति ।५। षड् वा ऋतवः ।६। ऋतुभ्य एवैनं तत् पुनः समाहरति[1] ।७। यथायथमुत्तमौ प्रयाजानुयाजौ यजति[2] ।८। तथा हास्य प्रयाजानुयाजेभ्योऽनितं भवति ।९। वार्त्रघ्नः पूर्व आज्यभागः पाप्मन एव वधाय ।१०। अथो हास्य पौर्णमासात् तन्त्रादनितं भवति ।११। अग्निं स्तोमेन बोधयेत्यग्नये बुद्धिमते पूर्वं कुर्यादिति हैक आहुः ।१२। स्वपितीव वा एतस्याग्निर्योऽग्निमुद्वासयते ।१३। तदेवैनं तत् पुनः प्रबोधयतीति ।१४। वार्त्रघ्नस्त्वेव स्थितः ।१५। अग्न आयूंषि पवस इत्युत्तरस्य पुरोनुवाक्या ।१६। पवस इति तत् सौम्यं रूपम् ।१७। केवलाग्नेयो हि यज्ञक्रतुः ।१८। तद् यत् पवमानस्य कीर्तयति ।१९। तथा हास्य सौम्यादाज्यभागादनितं भवति ।२० ॥4॥

[1] L. P. add इति [2] L. P. omit

पदपङ्क्त्यो याज्यापुरोनुवाक्याः ।१। पञ्चपदा पङ्क्तिः ।२। पाङ्क्तो वै यज्ञो यज्ञस्यैवाप्त्यै[1]



।३। व्यतिषक्ता भवन्ति ।४। व्यतिषक्ता इव वा इमे प्राणा आत्मानं भुञ्जन्तीति ।५। सा सर्वैव ससामिधेनीकोपांशु भवत्यापूर्वाभ्यामनुयाजाभ्याम् ।६। आ ह्यतो विभक्तयोऽनुप्रोता भवन्ति ।७। अथो सर्वे वै कामा विभक्तिषु ।८। तस्मादुपांशु भवन्ति ।९। सर्वेषामेव कामानामाप्त्यै ।१०। उच्चैस्त्वेवोत्तमेनानुयाजेन यजति ।११। उच्चैः सूक्तवाकशंयुवाकावाह[2] ।१२। तद् यथाविदमित्याविर्नष्टं कुर्यात् ।१३। एवं तदाविः कामान् करोत्यापमिति ।१४। त्रयमु हैक उपांशु कुर्वन्ति विभक्तीरुत्तरमाज्यभागं हविरिति ।१५। एतावद्ध्यागन्तु भवतीति ।१६। सा वा उपांशु निरुक्ता भवति ।१७। द्वयं वा अग्ने रूपं निरुक्तं चानिरुक्तं च ।१८। तदेवास्य तेनाप्नोति ।१९। सर्वाग्नेयं हैके कुर्वन्ति ।२०। न तथा कुर्यात् ।२१। तस्यै पुनरुत्स्यूतो जरत्संव्यायः पुनःसंस्कृतः कद्रथोऽनड्वान् हिरण्यं वा दक्षिणा ।२२। पुनःकर्म ह्येतत् ।२३। आदित्या द्वितीया ।२४। प्रतिष्ठा वा अदितिः ।२५। प्रतिष्ठित्या एव प्रतिष्ठित्या एव ।२६ ॥5॥

[1] L. P. Here ends *Khaṇḍa* 4 [2] L. P. °शंयोर्वाका°

## इति प्रथमदशके प्रथमोऽध्यायः

घर्मो वा एष प्रवृज्यते यदग्निहोत्रम् ।१। तदसौ वै घर्मो योऽसौ तपति ।२। एतमेव तत् प्रीणाति ।३। स वै सायं च प्रातश्च जुहोति ।४। अग्नये सायं सूर्याय प्रातः ।५। सौर्यं वा अहराग्नेयी रात्रिः ।६। मुखत एव तदहोरात्रे प्रीणाति ।७। पयसा जुहुयात् ।८। एष ह वै सर्वासामोषधीनां रसो यत् पयः ।९। सर्वैरेव तद् रसैरग्नीन् प्रीणाति ।१०। तदु वा आहुर्यद-शनस्यैव जुहुयात् ।११। सर्वं वा इदमग्नेरन्नम् ।१२। स्वेनैव[1] तदन्नेनाग्नीन् प्रीणातीति ।१३। गार्हपत्येऽधिश्रित्याहवनीये जुहुयात् ।१४। श्रपणो वै गार्हपत्यः ।१५। आहवन[2] आहवनीयः ।१६। तस्माद् गार्हपत्येऽधिश्रित्याहवनीये जुहुयात् ।१७। द्व्यन्तानङ्गारान् करोति ।१८। इमावेव तल्लोकौ वितारयति ।१९। तस्माद्धीमौ लोकौ सह सन्तौ नानेव ।२०। अथ यदधिश्रित्यावद्योतयति[3] ।२१। श्रपयत्येवैनत्[4] तत् ।२२। अथ यदपः प्रत्यानयति ।२३। आपः कृत्स्नानि ह वै सर्वाणि हवींषि भवन्ति ।२४। हविष एव कृत्स्नतायै ।२५। अथ यत् पुनरवद्योतयति[3] ।२६। अप एव तच्छ्रपयति ।२७। त्रिरुपसादमुदग्घोमीयमुद्वासयति त्रैवि-ध्याय ।२८। त्रिवृद्धि देवकर्म ।२९। अनुच्छिन्दन्निव[5] हरेत् ।३०। तथा ह यजमानोऽप्रच्या-वुको भवति ।३१। अथोपवेषेण दक्षिणतोऽङ्गारानुपस्पृशति नमो देवेभ्य इति ।३२। न हि नमस्कारमति देवाः ।३३। सुप्रत्यूळ्हानङ्गारान् प्रत्यूहेत् ।३४। तथा हास्य नान्तम-चारिणी चन नश्यति ।३५ ॥1॥

[1] P. स्वेन वै  [2] P. omits  [3] L. P. °वज्योतयति  [4] P. एनं (for एनत्)  [5] L. (var.) अनुछिन्नन्निव; wrongly reports IO. reading as अनुच्छिन्दन्तिव; P. अनुच्छिन्नं निव

चतुरुन्नयेत् ।१। चतुष्टयं वा इदं सर्वम् ।२। अस्यैव सर्वस्याप्त्यै ।३। पञ्चकृत्व उन्नयेत् ।४। पाङ्क्तो वै यज्ञो यज्ञस्यैवाप्त्यै[1] ।५। उपसदोऽग्निहोत्रे वेदितव्याः ।६। उन्नीयोत्तरेण गार्हपत्यमुपसादयति ।७। तदिमँल्लोकमाप्नोति ।८। आहवनीये होष्यन् द्वितीयम् ।९। तदन्तरिक्षलोकमाप्नोति ।१०। हुत्वा तृतीयम् ।११। तदमुँल्लोकमाप्नोति ।१२। पालाशीं समिधमभ्यादधाति ।१३। सोमो वै पलाशः ।१४। सा प्रथमा सोमाहुतिः ।१५। प्रादेश-मात्री भवति ।१६। प्रादेशमात्रं हीम आत्मनोऽधि[2] प्राणाः ।१७। द्व्यङ्गुलं समिधोऽति-हृत्यानुदृभन्निवाभिजुहोति ।१८। द्व्यङ्गुले वा इदं मुखस्यान्नं धीयते ।१९। धूमायन्त्यां ग्रामकामस्य जुहुयात् ।२०। ज्वलन्त्यां ब्रह्मवर्चसकामस्य ।२१। अङ्गारेषु पशुकामस्य ।२२। अभ्याधायेति त्वेव स्थितम् ।२३। अत्र ह्येवैते सर्वे कामा उपाप्यन्त[3] इति ।२४। उभे आहुती हुत्वा जपति ।२५। या यज्ञस्य समृद्धस्याशीः सा मे समृध्यतामिति ।२६।



या वै यज्ञस्य समृद्धस्याशीः सा यजमानस्य भवति ।२७। उत्तरावतीराहुतीर्जुहुयात् ।२८। उत्तरोत्तरिण[4] एव तत् स्वर्गाँल्लोकानाप्नोति ।२९। स्रुचो बुध्नेनाङ्गारानुपस्पृशति ।३०। स्वर्ग एव तल्लोके[5] यजमानं दधाति ।३१ ॥2॥

[1] L. P. Here ends *Khaṇḍa* 1  [2] L. P. अभि (for अधि)  [3] P. उपायन्त
[4] P. उत्तरोत्तरेण  [5] P. तं लोके

द्विरुदीचीं स्रुचमुद्यच्छति ।१। रुद्रमेव तत् स्वायां दिशि प्रीत्वावसृजति ।२। तस्माद्धूय-मानस्योत्तरतो न तिष्ठेत् ।३। नेदेतस्याखलस्य[1] देवस्य परिप्राध्वेऽसानीति[2] ।४। तामुत्तरतः सायमुपमार्ष्टि प्रतीचीम् ।५। आदित्यं तदस्तं नयति ।६। दक्षिणत ऊर्ध्वां प्रातः ।७। आदित्यं तदुन्नयति ।८। यत् पूर्वमुपमार्ष्टि तत् कूर्चे निलिम्पति ।९। ओषधीस्तेन[3] प्रीणाति ।१०। यद् द्वितीयं तद् दक्षिणेन कूर्चमुत्तानं पाणिं निदधाति ।११। पितॄंस्तेन प्रीणाति ।१२। अथ यद् द्विष्प्रदेशिन्या प्राश्नाति ।१३। गर्भान् पूर्वेण प्रीणाति ।१४। तस्मादनश्नन्तो गर्भाः प्राणन्ति ।१५। वयांस्युत्तरेण ।१६। तस्माद् वयांसि बहु किंच किंचिदिव भक्षयन्ति श्वेत-मिव प्रस्नावयन्ति[4] ।१७। अथ यत् स्रुचा भक्षयति[5] ।१८। भूतं च तेन भव्यं च प्रीणाति ।१९। अथ यत् स्रुचं निर्लेळ्हि ।२०। सर्पदेवजनाँस्तेन प्रीणाति ।२१। अथ यत् स्रुचं मार्जयते ।२२। रक्षोदेवजनाँस्तेन प्रीणाति ।२३। अथ यत् प्राचीरुदीचीरप[6] उत्सिञ्चति ।२४। गन्धर्वाप्सरसस्तेन प्रीणाति ।२५। अथ यत् प्राचीमुदीचीं[7] स्रुचमुद्दिशति ।२६। रुद्रमेव तत् स्वायां दिशि दधाति ।२७। एवमग्निहोत्रेण सर्वाणि भूतानि प्रीणाति[8] ।२८ ॥3॥

[1] L. P. °स्याघलस्य  [2] L. P. परिप्रार्धे°  [3] P. ओषधींस्तेन  [4] L. प्रस्नापयन्ति
[5] IO. भक्षयन्ति  [6] L. P. प्रागुदीचीरप  [7] L. P. प्रागुदीचीं  [8] L. P. Here ends *Khaṇḍa* 2

आहवनीय एव जुहुयादिति हैक आहुः ।१। सर्वेषु त्वेव जुहुयात् ।२। होमाय ह्येत आधीयन्ते ।३। चतस्रो गार्हपत्ये ।४। चतस्रोऽन्वाहार्यपचने ।५। द्वे आहवनीये ।६। ता दश संपद्यन्ते ।७। दशदशिनी विराट् ।८। श्रीर्विराळन्नाद्यम् ।९। श्रियो विराजोऽन्नाद्यस्यो-पाप्त्यै ।१०। स य एवं विराट्संपन्नमग्निहोत्रं जुहोति ।११। सर्वान्[1] कामानाप्नोति[2] ।१२। अथ यद्धुत्वाग्नीनुपतिष्ठते ।१३। प्रीत्वैव तद् देवेष्वन्ततोऽर्थं वदते ।१४। यद्वेव वत्सं स्पृशति ।१५। तस्माद् वात्सप्रम् ।१६। तथा ह यजमानात् पशवोऽनुत्क्रामुका भवन्ति ।१७। अथ यदप आचम्य व्रतं विसृजते ।१८। अप्स्वेव तद् व्रतं दधाति ।१९। ता अस्य

व्रतं गोपायन्त्या पुनर्होमात्[3] ।२०। अथो यत् प्रवत्स्यँश्च प्रोषिवाँश्चाग्नीनुपतिष्ठते ।२१। अभिवादो हैष देवतायै यदुत्काशं भवति ।२२। अथो अग्निभ्य एवैतदात्मानं परिददाति ।२३। ये चैनमन्वञ्चो भवन्ति[4] ।२४। अथ यदरण्योरग्नीन्त्समारोपयते[5] ।२५। देवरथो वा अरणी ।२६। देवरथ एवैनाँस्तत् समारोपयते ।२७। स एतेन देवरथेन स्वस्ति स्वर्गँल्लोकं समश्नुते ।२८। यद्वेव पुनः पुनर्निर्मन्थते ।२९। तेनो हैवास्य पुनराधेयमुपाप्तं भवति[6] ।३०। ये वै के चानन्दा अन्ने पाने मिथुने ।३१। रात्र्या एव ते संतता अव्यवच्छिन्नाः क्रियन्ते ।३२। तेषां रात्रिः कारोतरः ।३३। य उ वै के चानन्दाः ।३४ ॥4॥

[1] IO. सर्वं [2] L. P. Here ends *Khaṇḍa* 3 [3] L. P. Here ends *Khaṇḍa* 4
[4] L. P. Here ends *Khaṇḍa* 5 [5] L. P. समारोहयते [6] L. P. Here ends *Khaṇḍa* 6

अन्नादेव ते सर्वे जायन्ते ।१। ते देवा अब्रुवन् ।२। कथं न्विमान् वयमानन्दानस्मादृशस्यैव प्रतिगृह्णीयामेति ।३। तेऽपामूर्ध्वं रसमुदौहन् ।४। ता ओषधयश्च वनस्पतयश्च समभवन् ।५। ओषधीनां च वनस्पतीनां चोर्ध्वं रसमुदौहन् ।६। तत् फलमभवत् ।७। फलस्योर्ध्वं रसमुदौहन् ।८। तदन्नमभवत् ।९। अन्नस्योर्ध्वं रसमुदौहन् ।१०। तद् रेतोऽभवत् ।११। रेतस ऊर्ध्वं रसमुदौहन् ।१२। स पुरुषोऽभवत् ।१३। सोऽयं पुरुषो यत् प्राणिति वापानिति वा ।१४। न तत् प्राणेन नापानेनाहेति प्राणिषं वापानिषं वेति ।१५। वाचैव तदाह ।१६। तत् प्राणापानौ वाचमपीतो वाङ्मयौ भवतः ।१७। अथ यच्चक्षुषा पश्यति ।१८। न तच्चक्षुषाहेत्यद्राक्षमिति ।१९। वाचैव तदाह ।२०। तच्चक्षुर्वाचमप्येति वाङ्मयं भवति ।२१। अथ यच्छ्रोत्रेण शृणोति ।२२। न तच्छ्रोत्रेणाहेत्यश्रौषमिति ।२३। वाचैव तदाह ।२४। तच्छ्रोत्रं वाचमप्येति वाङ्मयं भवति ।२५। अथ यन्मनसा संकल्पयते ।२६। न तन्मनसाहेति समचीक्लृपमिति ।२७। वाचैव तदाह ।२८। तन्मनो वाचमप्येति वाङ्मयं भवति ।२९। अथ यदङ्गैः सुशीमं वा दुःशीमं वा स्पृशति ।३०। न तदङ्गैराहेति सुशीमं वा दुःशीमं वास्प्रक्षमिति[1] ।३१। वाचैव तदाह ।३२। तत् सर्व आत्मा वाचमप्येति वाङ्मयो भवति ।३३। तदेतदृचाभ्युदितम् ।३४। नेन्द्रादृते पवते धाम किंचनेति ।३५। वाग् वा इन्द्रः ।३६। न ह्यृते वाचः पवते धाम किंचन ।३७ ॥5॥

[1] L. P. वास्प्राक्षमिति; IO. वास्पृक्षमिति

स वै सायं जुहोत्यग्निर्ज्योतिर्ज्योतिरग्निरिति[1] ।१। तं ज्योतिः सन्तं ज्योतिरित्याह ।२। स सत्यं वदति ।३। तस्यायं वाङ्मय आत्मा सत्यमयो भवति ।४। सत्यमया उ देवाः ।५।



अथ स्वाहेति जुहोति ।६। तस्यैतां देवाः सत्यहुतस्याहुतिं प्रतिगृह्णन्ति ।७। रात्र्या उ शीर्षन्त्सत्यं वदति ।८। स यदि ह वा अपि तत ऊर्ध्वं मृषा वदति ।९। सत्यं हैवास्योदितं भवति ।१०। रात्र्या उ हि शीर्षन्त्सत्यं वदति ।११। अथ प्रातर्जुहोति सूर्यो ज्योतिर्ज्योतिः सूर्य इति ।१२। तं ज्योतिः सन्तं ज्योतिरित्याह ।१३। स सत्यं वदति ।१४। तस्यायं वाङ्मय आत्मा सत्यमयो भवति ।१५। सत्यमया उ देवाः ।१६। अथ स्वाहेति जुहोति ।१७। तस्यैतां देवाः सत्यहुतस्याहुतिं प्रतिगृह्णन्ति ।१८। अह्न उ शीर्षन्त्सत्यं वदति ।१९। स यदि ह वा अपि तत ऊर्ध्वं मृषा वदति ।२०। सत्यं हैवास्योदितं भवति ।२१। अह्न उ हि शीर्षन्त्सत्यं वदति ।२२। स वा एषोऽग्निरुद्यत्यादित्य आत्मानं जुहोति ।२३। असावस्तं[2] यन्त्सायेऽग्नावादित्य[3] आत्मानं जुहोति ।२४ ॥6॥

[1] L. P. *Khaṇḍa* 7 ends with जुहोति [2] L. reports all MSS. excepting IO. read अथास्तं; P. अथास्तं [3] P. यं (for यन्); L. P. omit आदित्य

रात्रिरेवाहन् जुहोत्यहो रात्रौ[1] ।१। प्राण एवापाने जुहोत्यपानः प्राणे ।२। तानि वा एतानि षड् जुह्वत्यन्योन्य आत्मानम् ।३। स य[2] एतानि षड् जुह्वति वेद ।४। अजुह्वत एवास्याग्निहोत्रं[3] हुतं भवति ।५। जुह्वत एवास्य द्विर्हुतं भवति य एवं वेद ।६। स यदि ह वा अपि सुरुशादेवं[4] विद्वानग्निहोत्रं जुहोति ।७। प्रति हैवास्यैते देवा आहुती[5] गृह्णन्ति ।८। यस्यो ह वा अपि देवाः सकृदश्नन्ति ।९। तत एव सोऽमृतः ।१०। सत्यमयो ह वा अमृतमयः संभवति य एवं वेद ।११। तद् यथा ह वै श्रद्धादेवस्य सत्यवादिनस्तपस्विनो हुतं भवति ।१२। एवं हैवास्य हुतं भवति ।१३। य एवं विद्वानग्निहोत्रं जुहोति ।१४। तस्मादेवंविदग्निहोत्रं जुहुयादिति[6] ।१५। उदिते होतव्य३मनुदित इति मीमांसन्ते ।१६ ॥7॥

[1] L. P. रात्र्यां [2] L. P. यो ह वा (for स य) [3] L. P. omit अग्निहोत्रं [4] L. सुरिशादेवं;(var.) सुरिशानेवं, सुरिषादेवं; P. सुरिशानेनेवं [5] L. P. आहुती देवा (for देवा आहुती) [6] L. P. Here ends *Khaṇḍa* 8

स य उदिते जुहोति ।१। प्रवसत एवैतन्महते देवायातिथ्यं करोति ।२। अथ योऽनुदिते जुहोति ।३। संनिहितायैवैतन्महते देवायातिथ्यं करोति ।४। तस्मादनुदिते होतव्यम् ।५। तद्धापि वृषशुष्मो वातावतः[1] पूर्वेषामेको जीर्णिः शयानो रात्र्यामेवोभे आहुती हूयमाने दृष्ट्वोवाच ।६। रात्र्यामेवोभे आहुती जुह्वतीति ।७। रात्र्यां हीति स होवाच ।८। वक्तास्मो

न्वेव वयममुँल्लोकं[2] परेत्य पितृभ्यः ।९। अथो एवैनं[3] न[4] श्रद्धातारः ।१०। यद्वैवैतदुभये-द्युरग्निहोत्रमहूयत ।११। अन्येद्युर्वा तदेतर्हि हूयते ।१२। रात्र्यामेवेत्येतदेव कुमारी गन्धर्व-गृहीतोवाच ।१३। रात्र्यामेवोभे आहुती जुह्वतीति ।१४। रात्र्यां होति[5] सा होवाच ।१५। संधौ जुहुयात् ।१६। समुद्रो ह वा एष सर्वंहरो यदहोरात्रे ।१७। तस्य हैते गाधे तीर्थे यत् संध्ये[6] ।१८। तद् यथा गाधाभ्यां तीर्थाभ्यां समुद्रमतीयात् तादृक् तत् ।१९। यत् संधौ जुहोति ।२०। अथो देवसेना ह वा एषाध्वगा हनिष्यन्ती[7] यदहोरात्रे ।२१। तस्या हैते पक्षसी यत् संध्ये[6] ।२२। तद् यथा पक्षाभ्यां क्षिप्रमध्वानमन्वियात् तादृक् तत् ।२३। यत् संधौ जुहोति ।२४। अथो मृत्योर्ह वा एतौ विराजबाहू[8] यदहोरात्रे ।२५। तद् यथा विराजबाहुभ्यां[9] परिजिग्रहीष्यन्नन्तरेणातिमुच्येत तादृक् तत् ।२६। यत् संधौ जुहोति ।२७ ॥8॥

[1] L. (var.) वाघावत:     [2] L. P. यममुं लोकं     [3] L. P. एनं     [4] L. (var.) नो, न:; P. न:
[5] L. (var.) हैति     [6] L. (var.) संधे     [7] L. (var.) हनिष्यन्ति, हनिष्यति     [8] L. P. व्राजबाहू
[9] L. P. व्राजबाहुभ्यां

तदु ह स्माह कौषीतकिः ।१। सायमस्तमिते पुरा तमसस्तस्मिन् काले जुहुयात् ।२। स देवयानः केतुः ।३। तमेवारभ्य स्वस्ति स्वर्गँल्लोकमेति[1] ।४। प्रातः पुरोदयादपहते तमसि तस्मिन् काले जुहुयात् ।५। स देवयानः केतुः ।६। तमेवारभ्य स्वस्ति स्वर्गँल्लोकमेति[1] ।७। अथ[2] योऽतोऽन्यथाग्निहोत्रं जुहोति ।८। श्यामशबलौ हास्याग्निहोत्रं विखिदतः[3] ।९। अहर्वै शबलः ।१०। रात्रिः श्यामः ।११। स यो महारात्रे जुहोति ।१२। श्यामो हास्याग्निहोत्रं विखिदति[4] ।१३। अथ यो महाह्ने जुहोति ।१४। शबलो हास्याग्निहोत्रं विखिदति[4] ।१५। तद् वै खलु यदैव कदाचन जुहुयात् ।१६। हुतसमृद्धिमेवोपासीतेति हुतसमृद्धिमेवोपासीतेति ।१७ ॥9॥

[1] L. P. समश्नुते (for एति)     [2] L. अथो     [3] L. (var.) विषिदत:, विषीदत:; P. विषीदत:
[4] L. (var.) विषिदति, विषीदति; P. विषीदति

## इति प्रथमदशके द्वितीयोऽध्यायः



यद् दर्शपूर्णमासयोरुपवसति ।१। न ह वा अव्रतस्य देवा हविरश्नन्ति ।२। तस्मादुप-वसति ।३। उत मे देवा हविरश्नीयुरिति ।४। पूर्वां पौर्णमासीमुपवसेदिति पैङ्ग्यम् ।५। उत्तरामिति कौषीतकम् ।६। यां पर्यस्तमयमुत्सर्पेदिति सा स्थितिः ।७। पूर्वां[1] पौर्णमासी-मुपवसेदनिर्ज्ञाय पुरस्तादमावास्यायां चन्द्रमसम् ।८। यदुपवसति तेन पूर्वां प्रीणाति ।९। यद् यजते तेनोत्तराम् ।१०। उत्तरामुपवसेत् ।११। उत्तरामु ह वै समुद्रो विजते सोम-मनु दैवतम् ।१२। एतद् वै देवसत्यं यच्चन्द्रमाः ।१३। तस्मादुत्तरामुपवसेत् ।१४ ॥1॥

[1] L. P. उत्तरां

अथ यत् पुरस्तात् सामिधेनीनां जपति ।१। स्वस्त्ययनमेव तत् कुरुते ।२। हिंकृत्य सामिधेनीरन्वाह ।३। वज्रो वै हिंकारः ।४। वज्रेणैव तद् यजमानस्य पाप्मानं हन्ति ।५। त्रिर्हिंकरोति ।६। त्रिवृद् वै वज्रः ।७। वज्रमेव तदभिसंपादयति ।८। एतेन वै देवास्त्रिवृता वज्रेणैभ्यो लोकेभ्योऽसुराननुदन्त ।९। तथो एवैतद् यजमान एतेनैव त्रिवृता वज्रेणैभ्यो लोकेभ्यो द्विषतो भ्रातृव्यान् नुदते ।१०। एकादश सामिधेनीरन्वाह ।११। एकादशाक्षरा वै त्रिष्टुप् ।१२। त्रैष्टुभ इन्द्रः ।१३। तदुभा इन्द्राग्नी आप्नोति ।१४। त्रिः प्रथमया त्रिरुत्तमया पञ्चदश संपद्यन्ते ।१५। पञ्चदश वै पूर्वपक्षापरपक्षयोरहानि ।१६। तत् सामिधेनीभिः पूर्वपक्षापरपक्षावाप्नोति ।१७। अथो वज्रो वै सामिधेन्यः ।१८। पञ्चदशो वै वज्रः ।१९। वज्रेणैव तद् यजमानस्य पाप्मानं हन्ति ।२०। यद्वेव त्रिः प्रथमां त्रिरुत्तमाम् ।२१। यज्ञस्यैव तद् बर्सौ[1] नह्यति स्थेम्नेऽविस्रंसाय ।२२। तासां वै त्रीणि षष्टिशतान्य-क्षराणां भवन्ति ।२३। त्रीणि वै षष्टिशतानि संवत्सरस्याह्नाम् ।२४। तत् सामिधेनीभिः संवत्सरस्याहान्याप्नोति ।२५। ता वै गायत्र्यो भवन्ति ।२६। गायत्रो वा अग्निर्गा-यत्रच्छन्दाः ।२७। स्वेनैव तच्छन्दसाग्निं स्तौति ।२८। अभिरूपा भवन्ति ।२९। यद् यज्ञे ऽभिरूपं तत् समृद्धं यज्ञस्यैव समृद्ध्यै ।३०। उत्तमायै तृतीये वचने प्रणवेन निगदमुप-संदधाति ।३१ ॥2॥

[1] L. (var.) बहिरसौ, बर्हिसौ, बर्हसौ, बर्हिरसौ; P. बर्हिरसौ

अग्ने महाँ असि ब्राह्मण भारतेति ।१। अग्निर्वै भरतः ।२। स वै देवेभ्यो हव्यं भरति ।३। अथ यद् यजमानस्यार्षेयमाह ।४। न ह वा अनार्षेयस्य देवा हविरश्नन्ति ।५।

तस्मादस्यार्षेयमाह ।६। अथैतं पञ्चदशपदं निगदमुपसंदधाति ।७। एषा[1] ह वै सामिधेनीनां निवित् ।८। तस्मात् पञ्चदशपदो भवति ।९। पञ्चदश हि सामिधेन्यः ।१०। स वा अच्छन्दस्कृतो भवति ।११। द्वयं वा इदं सर्वं छन्दस्कृतं चाच्छन्दस्कृतं च ।१२। तेन सर्वेणाग्निं स्तवानीति ।१३। तस्य सप्त पदानि समस्यावस्येत् ।१४। सप्त वै छन्दांसि ।१५। सर्वेषामेव छन्दसामाप्त्यै ।१६। अथ चत्वार्यथ चत्वारि ।१७। चतुष्टयं वा इदं सर्वम् ।१८। अस्यैव सर्वस्याप्त्यै[2] ।१९। अथ यद् व्यवग्राहं देवता आवाहयति ।२०। नाना ह्याभ्यो हवींषि गृहीतानि भवन्ति ।२१। [3-]तस्माद् व्यवग्राहं देवता आवाहयति[-3] ।२२। अथ यदग्निमग्निनावाहयति[4] ।२३। एषा[5] वा अग्नेर्यज्ञिया तनूर्यास्य हव्यवाट् ।२४। सा वा असौ यददोऽमुष्यादित्यस्योपरिष्टाद् दिवीव[6] भाति ज्योतिरिव[7] ।२५। तद् यदाहाग्निमग्न आ वहेति ।२६। तामावहेत्येव तदाह ।२७। अथ यद् देवाँ आज्यपाँ आवाहयति ।२८। प्रयाजानुयाजाँस्तदावाहयति ।२९। अथ यदग्निं होत्रायावाहयति ।३०। स्विष्टकृतं तदावाहयति ।३१। अथ यत् स्वं महिमानमावाहयति ।३२। वायुं तदावाहयति ।३३। वायुर्वा अग्नेः स्वो महिमा ।३४ ॥3॥

[1] L. P. एष [2] L. P. Here ends *Khaṇḍa* 2 [3-3] L. P. omit [4] P. यदग्निमग्निमावाहयति
[5] L. P. add ह [6] L. P. व्यव [7] L. P. add तस्मात्पुरुषं पुरुषं प्रत्यादित्यः

तेन हि संपद्य[1] महिमानं गच्छति ।१। यद्वेव वाचान्वाह वाचा यजति ।२। तेनो हैवास्य स्वो महिमेष्टो भवति ।३। आ च वह जातवेदः सुयजा च यजेत्याह[2] ।४। आ वह च जातवेदो देवान्त्सुयजा च देवता यजेत्येवैनं तदाह ।५। अथ यत् परस्तात् सामिधेनीनां जपति ।६। वज्रो वै सामिधेन्यः ।७। तमेवैतच्छमयति पुरस्ताच्चोपरिष्टाच्च ।८। अथ यत् स्रुगादापनेन स्रुचावादापयति ।९। देवरथमेव तद् युनक्ति देवेभ्यो हविः प्रदास्यन् ।१०। स एतेन देवरथेन स्वस्ति स्वर्गँल्लोकं समश्नुते[3] ।११। प्रयाजान् यजति ।१२। ऋतवो वै प्रयाजाः ।१३। ऋतूनेव तत् प्रीणाति ।१४। ते वै पञ्च भवन्ति ।१५। तैर्यत् किंच पञ्चविधमधिदैवतमध्यात्मं तत् सर्वमाप्नोति ।१६। समिधो यजति वसन्तमेव ।१७। वसन्ते वा इदं सर्वं समिध्यते ।१८। तनूनपातं यजति ग्रीष्ममेव ।१९। ग्रीष्मो हि तन्वं तपति ।२०। इळो यजति वर्षा एव ।२१। वर्षाभिर्हीळितमन्नाद्यमुत्तिष्ठति ।२२। बर्हिर्यजति शरदमेव ।२३। शरदि हि बर्हिष्ठा ओषधयो भवन्ति ।२४। स्वाहाकृतिमन्तं यजति[4] हेमन्तमेव ।२५। हेमन्ते वा इदं सर्वं स्वाहाकृतम् ।२६। तदाहुर्यत् पञ्च प्रयाजाः



षड्ऋतवः क्वैतं षष्ठमृतुं यजतीति ।२७। यदेव चतुर्थे प्रयाजे समानयति तदेनमितरेष्वनुविभजति ।२८ ॥4॥

[1] L. P. संपाद्य [2] L. omits आह [3] L. P. Here ends *Khaṇḍa* 3 [4] P. यजन्ति

अथ यदुत्तमे प्रयाजे देवताः समावपति ।१। प्रयाजभाज एवैनास्तत् करोति ।२। तद् यथाग्निः सर्वेषु हविःषु भागी भवति ।३। एवं तदग्नेर्भागे देवता भागिनीः करोति ।४। नात्राग्निं होत्रादित्याह ।५। पशवो वै प्रयाजाः ।६। रुद्रः स्विष्टकृत् ।७। नेद् रुद्रेण यजमानस्य पशून् प्रसजानीति[1] ।८। स्वाहा देवा आज्यपा जुषाणा अग्न आज्यस्य व्यन्त्विति हैक आहुः ।९। न तथा कुर्यात् ।१०। अर्धं ह वै यज्ञस्याज्यमर्धं हविः ।११। स यद्धान्यतरद् ब्रूयात् ।१२। अर्धं ह वै यज्ञस्य समिष्टं स्यादर्धमसमिष्टम्[2] ।१३। तस्मात् स्वाहा देवा आज्यपा जुषाणा अग्न आज्यस्य हविषो व्यन्त्वित्येव ब्रूयात्[3] ।१४। अथ यत् पौर्णमास्यां वार्त्रघ्नावाज्यभागौ भवतः ।१५। पौर्णमासेन वा इन्द्रो वृत्रमहन् ।१६। अथ यदमावास्यायां वृधन्वन्तौ ।१७। क्षयं वा अत्र चन्द्रो गच्छति ।१८। तमेवैतदाप्याययति तं वर्धयति ।१९ ॥5॥

[1] L. (var.) प्रवृणजानीति, प्रसृजानीति; P. प्रवृहाजानीति [2] IO. अष्टितम् (for असमिष्टम्)
[3] L. P. Here ends *Khaṇḍa* 4

तौ वै जुषाणयाज्यौ भवतः ।१। समानहविषौ[1] हि प्रयाजैर्भवतः ।२। अथो ब्रह्म वै जुषाणः ।३। ब्रह्मणैव तद् देवेभ्यो हविः प्रयच्छति ।४। तौ वै त्रिवृतौ भवतः ।५। येयजामहो निगदो वषट्कारः ।६। चक्षुर्वा आज्यभागौ ।७। त्रिवृद् वै चक्षुः शुक्लं कृष्णं लोहितमिति ।८। तौ न पशौ न सोमे करोति ।९। पशुना वै चक्षुष्मानध्वरः ।१०। नेच्चतुरक्षं बीभत्समध्वरं करवाणीति ।११। अथ यदावत्यो हूतवत्यः पुरोनुवाक्या भवन्ति ।१२। प्रवत्यः प्रत्तवत्यो याज्याः ।१३। हूत्वैव तद् देवेभ्यो हविः प्रयच्छति ।१४। ता वै गायत्रीत्रिष्टुभो भवन्ति ।१५। ब्रह्म वै गायत्री ।१६। क्षत्रं त्रिष्टुप् ।१७। ब्रह्मक्षत्राभ्यामेव तद् देवेभ्यो हविः प्रयच्छति ।१८। अथो एतावान् वै छन्दसो विकारः ।१९। सर्वेणैव तच्छन्दसो विकारेण देवेभ्यो हविः प्रयच्छति ।२०। ऋगन्ते वषट्करोति ।२१। तथा हास्य सर्वा याज्या रूपवत्यो भवन्ति ।२२। षळिति वषट्करोति ।२३। षड् वा ऋतवः ।२४। ऋतूनेव तत् प्रीणाति ।२५ ॥6॥

[1] IO. समौ (for समान)

बार्हतराथन्तरं वषट्कुर्यात् पुरस्ताद् दीर्घमुपरिष्टाद्ध्रस्वम् ।१। यद्ध्रस्वं तद् रथन्तरम् ।२। यद् दीर्घं तद् बृहत् ।३। अथो इयं वै रथन्तरमसौ बृहत् ।४। अनयोरेव तत् प्रतितिष्ठति ।५। अथो एतावान् वै वाचो विकारः ।६। सर्वेणैव तद् वाचो विकारेण देवेभ्यो हविः प्रयच्छति ।७। भूर्भुव इति पुरस्ताद् येयजामहस्य जपति ।८। वषट्कृत्यानुजपत्योजः[1] सहः सह ओजः स्वरिति[2] ।९। वज्रो वै वषट्कारः ।१०। तमेवैतच्छमयति पुरस्ताच्चोपरिष्टाच्च ।११। अथो एते एव वषट्कारस्य प्रीयतमे तनू यदोजश्च सहश्च ।१२। ताभ्यामेवैनं शमयति[3] ।१३। अथ यदग्निं प्रथमं देवतानां यजति ।१४। अग्निर्वै देवानां मुखम् ।१५। मुखत एव तद् देवान् प्रीणाति ।१६। अथ यत् पौर्णमास्यामग्नीषोमौ यजति ।१७। अग्नीषोमौ वा अन्तर्वृत्र आस्ताम् ।१८। ताविन्द्रो नाशक्नोदभि वज्रं प्रहर्तुम् ।१९। ताभ्यामेतं भागमकल्पयत् पौर्णमासम् ।२०। तौ वा उपांशु निरुक्तौ भवतोऽजामितायै ।२१। यदुपांशु यजति तेन सोमं प्रीणाति ।२२। यन्निरुक्तं तेनाग्निम् ।२३ ॥7॥

[1] L. P. omit वषट्कृत्यानुजपति [2] L. P. add उपरिष्टाद्वषट्कारस्य [3] L. P. तच्छमयति; Here ends *Khaṇḍa* 5

अथ यदमावास्यायामिन्द्राग्नी यजति ।१। प्रतिष्ठे वा इन्द्राग्नी प्रतिष्ठित्या एव ।२। अथ यत् [1-]संनयन्निन्द्रं यजति महेन्द्रं वा[-1] ।३। एतज्ज्योतिर्वा अमावास्या ।४। न ह्यत्र चन्द्रो दृश्यते ।५। अथ यदसंनयन् पुरोळाशावन्तरेणोपांश्वाज्यस्य यजत्यजामितायै ।६। अथ यत् संनयन्त्सान्नाय्यस्यान्तरेणोपांश्वाज्यस्य यजति तस्योक्तं ब्राह्मणम् ।७। अथ यदग्निं स्विष्टकृतमन्ततो यजति ।८। एष ह वै देवेभ्यो हविः प्रयच्छति ।९। यो वा अन्नं विभजत्यन्ततः स भजते ।१०। अथो रुद्रो वै स्विष्टकृत् ।११। अन्तभाग् वा वा एषः ।१२। तस्मादेनमन्ततो यजति ।१३। तस्य सच्छन्दसौ याज्यापुरोनुवाक्ये निगदो व्यवैति ।१४। तेनाजामि भवति ।१५। वषट्कृत्याप उपस्पृशति ।१६। शान्तिर्वै भेषजमापः ।१७। शान्तिरेवैषा भेषजं[2] यज्ञे क्रियते[3] ।१८। अथ यत् प्रदेशिन्यामिळायाः पूर्वमञ्जनमधरोष्ठे[4] निलिम्पते ।१९। उत्तरमुत्तरोष्ठे[5] ।२०। अयं वै लोकोऽधरोष्ठः[6] ।२१। असौ लोक उत्तरोष्ठः[7] ।२२। अथ यदोष्ठावन्तरेण तदिदमन्तरिक्षम् ।२३। तद् यत् प्राश्नाति ।२४। इमानेव तल्लोकाननुसंतन्वन् प्रीणाति ।२५ ॥8॥

[1-1] L. P. सन्नयन्नमावास्यायामिन्द्रं यजति [2] L. P. add अन्ततो [3] L. P. Here ends *Khaṇḍa* 6 [4] L. P. °मधरौष्ठे [5] L. P. °मुत्तरौष्ठे [6] L. P. °धरौष्ठः [7] L. P. उत्तरौष्ठः



अथ यदिळामुपह्वयते ।१। सर्वेष्वेव तद् भूतेषूपहवमिच्छते ।२। अथो अन्नं वा इळा ।३। अन्नमेव तदात्मन् धत्ते ।४। अथो पशवो वा इळा ।५। पशूनामेवाप्त्यै ।६। तस्यां चतुरवानिति ।७। चतुष्टयं वा इदं सर्वम् ।८। अस्यैव सर्वस्याप्त्यै ।९। [1-]यदस्यां चतुरवानिति ।१०। तथा पञ्चपदी भवति ।११। पञ्चपदा पङ्क्तिः ।१२। पाङ्क्तो वै यज्ञो यज्ञस्यैवाप्त्यै[-1] ।१३। [2-]अथ यज्जपेनोत्तरेळां प्राश्नाति ।१४। ब्रह्म वै जपः ।१५। ब्रह्मणैवैनां तच्छमयति ।१६। अथ यदध्वर्युर्बर्हिषदं पुरोळाशं करोति ।१७। पितॄनेव तत् प्रीणाति[-2] ।१८। अथ यत् पवित्रवति मार्जयन्ते ।१९। शान्तिर्वै भेषजमापः ।२०। शान्तिरेवैषा भेषजं[3] यज्ञे क्रियते ।२१। अथ यदन्वाहार्यमाहरन्ति ।२२। एतद्दक्षिणौ वै दर्शपूर्णमासौ ।२३। तस्मादेनमाहरन्ति[4] ।२४। अथ यत् समिधमनुमन्त्रयते ।२५। इध्मस्य वा एषैकातिशिष्टा भवति ।२६। तस्मादेनामनुस्तौति[5] ।२७ ॥9॥

[1-1] L. P. अथ यदिडामुपहूयावघ्राति पशवो वा इडा पशूनेव तदात्मन्धत्ते [2-2] L. P. first read अथ यदध्वर्युः . . . प्रीणाति and then अथ यज्जपेन . . . तच्छमयति [3] L. P. add अन्ततो [4] L. P. read अन्वाहार्यम् (for एनम्) [5] L. P. Here ends *Khaṇḍa* 7

अथ यत् त्रीननुयाजान् यजति ।१। त्रयो वा इमे लोकाः ।२। इमानेव तल्लोकानाप्नोति ।३। अथ यत् सर्वमुत्तममाह ।४। प्रतिष्ठा वै स्विष्टकृत् प्रतिष्ठित्या एव ।५। अथ यत् सूक्तवाकमाह ।६। प्रतिष्ठा वै सूक्तवाकः प्रतिष्ठित्या एव ।७। अथ यद् द्यावापृथिव्योः कीर्तयति ।८। प्रतिष्ठे वै द्यावापृथिवी प्रतिष्ठित्या एव ।९। अग्निरिदं हविरजुषतेति हैक आहुः ।१०। न तथा कुर्यात् ।११। अभ्यावर्तते हास्य देवता पुनर्यज्ञ इति मन्वाना ।१२। पुनर्मे हविः प्रदास्यतीति ।१३। सा यजमानस्याशिषो निवर्तयति [1-]य इदं हविरित्याह[-1] ।१४। तस्माद्धविरजुषत हविरजुषतेत्येव ब्रूयात् ।१५। अथो या [2-]एवैतद् देवताः पुरस्ताद्[-2] यजति ।१६। ताभिरेवैतदन्ततः प्रतितिष्ठति ।१७। अथ यत् सूक्तवाके यजमानस्य नाम गृह्णाति ।१८। एष ह वै दैव आत्मा यजमानस्य यमृत्विजः संस्कुर्वन्ति ।१९। तस्मादस्य नाम गृह्णाति ।२०। अत्र हि जायते ।२१। उच्चैर्गृह्णीयाद् यद्यप्याचार्यः[3] स्यात् ।२२। तथा ह यजमानोऽप्रच्यावुको भवति ।२३। अथ पञ्चाशिषो [4-]वदत इळायां[-4] तिस्रस्ता अष्टौ ।२४। एताभिर्वै देवाः सर्वा अष्टीराश्नुवत ।२५। तथो एवैतद् यजमान एताभिरेव सर्वा अष्टीरश्नुते ।२६। अथ बर्हिषि प्राञ्चमञ्जलिं निधाय जपति नम उपेति ।२७। न हि नमस्कारमति देवाः ।२८। अथ यच्छंयोर्वाकमाह ।२९। प्रतिष्ठा वै शंयोर्वाकः प्रतिष्ठित्या एव ।३०। अथो शंयुर्ह वै बार्हस्पत्यः सर्वान् यज्ञाञ्छमयांचकार ।३१। तस्माच्छंयोर्वाकमाह

।३२। अथ यदप उपस्पृशति ।३३। शान्तिर्वै भेषजमापः ।३४। शान्तिरेवैषा भेषजं[5] यज्ञे क्रियते[6] ।३५ ।।10।।

[1–1] L. P. omit [2–2] L. P. एवैतत्पुरस्ताद्देवता [3] P. यद्यथाचार्यः [4–4] L. P. वदतीडायां [5] L. P. add अन्ततो [6] L. P. Here ends *Khaṇḍa* 8

अथ यद् गार्हपत्ये पत्नीसंयाजैश्चरन्ति ।१। गार्हपत्यभाजो वै पत्न्यः ।२। आहवनीयभाग् यजमानः ।३। तस्माद् गार्हपत्ये पत्नीसंयाजैश्चरन्ति ।४। ते वै चत्वारो भवन्ति ।५। आ चतुरं वै द्वन्द्वं मिथुनं प्रजननं प्रजात्यै ।६। ते[1] वा उपांशु भवन्ति ।७। रेतःसिक्तिर्वै पत्नीसंयाजाः ।८। उपांशु वै रेतः सिच्यते ।९। अभिरूपा भवन्ति ।१०। यद् यज्ञेऽभिरूपं तत् समृद्धं यज्ञस्यैव समृद्ध्यै ।११। अथ[2] सोमं त्वष्टारं देवानां पत्नीरग्निं गृहपतिमिति[3] ।१२। एता ह वै देवता मिथुनानामीशते ।१३। ता अत्र प्रीणन्ति[4] ।१४। ता अस्मै[5] प्रीता मिथुनानि दधति ।१५ ।।11।।

[1] ER. ता [2] ER. EM. omit [3] L. P. add यजति [4] L. प्रीणाति (var.) प्रीणंति
[5] L. P. अत्र

सोमं प्रथमं यजति ।१। रेतस्तत् सिञ्चति ।२। त्वष्टारं द्वितीयम् ।३। त्वष्टा वै रेतः सिक्तं विकरोति ।४। ततः पत्न्यः ।५। पत्नीसंयाजा ह्येते ।६। अथ यदग्निं गृहपतिमन्ततो यजति ।७। एतत्स्विष्टकृतो वै पत्न्यः ।८। तस्मादेनमन्ततो यजति ।९। [1–]अथ यदप उपस्पृशति तस्योक्तं ब्राह्मणम्[–1] ।१०। अथ यद्वृचं जपति स्वस्त्ययनमेव तत् कुरुते ।११। अथ यदिळामुपह्वयते यन्मार्जयते यच्छंयोर्वाकमाह तस्योक्तं ब्राह्मणम् ।१२। अथ यद् वेदे पत्नीं वाचयति ।१३। वृषा वै वेदः ।१४। योषा पत्नी ।१५। मिथुनमेव तत् पत्नीषु दधाति ।१६। तस्मात् पत्नी वेदतृणान्यन्तरोरू कुरुते ।१७। अथ यद् वेदं स्तृणाति ।१८। तेन हास्य दर्शपूर्णमासौ संततौ भवतः ।१९। अथो एतेनैवास्याग्निहोत्रं स्तीर्णबर्हिर्भवति[2] ।२०। अथ यद् वेदातिशेषमुपतिष्ठते ।२१। आशिषमेव तद् वदते ।२२। अथ यदाहवनीयमुपतिष्ठते ।२३। प्रीत्वैव तद् देवेष्वन्ततोऽर्थं वदते ।२४। अथ यदप उपस्पृशति ।२५। शान्तिर्वै भेषजमापः ।२६। शान्तिरेवैषा भेषजमन्ततो यज्ञे क्रियते ऽन्ततो[3] यज्ञे क्रियते[4] ।२७ ।।12।।

[1–1] L. P. omit [2] P. IO. स्तीर्णं° [3] L. P. omit अन्ततो [4] L. P. Here ends *Khaṇḍa* 9

## इति प्रथमदशके तृतीयोऽध्यायः



अनुनिर्वाप्यया वै देवा असुरानपाघ्नत ।१। तथो एवैतद् यजमानोऽनुनिर्वाप्ययैव द्विषतो भ्रातृव्यानपहते ।२। स वा इन्द्राय विमृध एकादशकपालं पुरोळाशं निर्वपति ।३। इन्द्रो वै मृधां विहन्ता ।४। स एवास्य मृधो विहन्ति ।५। अथो आमावास्यमेवैतत् प्रत्याहरति यत् पौर्णमास्यामिन्द्रं यजति ।६। अत्र संस्थितदर्शपूर्णमासो यजमानो यद्यपरपक्षे भङ्गं नीयात् ।७। नास्य यज्ञविकर्षः स्यात् ।८। अथ यदमावास्यायामदितिं यजति ।९। यज्ञस्यैव सभारतायै ।१०। सा संयाज्यातो विमृद्वती भवति ।११ ।।1।।

अथातोऽभ्युदितायाः ।१। एति ह वा एष यज्ञपथात् ।२। यस्योपवसथे पुरस्ताच्चन्द्रो दृश्यते ।३। सोऽग्नये दात्रेऽष्टाकपालं पुरोळाशं निर्वपति ।४। अग्निर्वै दाता ।५। स एवास्मै यज्ञं ददाति ।६। इन्द्राय प्रदात्रे सायं दोहितं दधि ।७। इन्द्रो वै प्रदाता ।८। स एवास्मै यज्ञं प्रयच्छति ।९। विष्णवे शिपिविष्टाय प्रातर्दोहिते पयसि चरुम् ।१०। यज्ञो वै विष्णुः ।११। स एवास्मै यज्ञं ददाति ।१२। तद् यदेता देवता यजति ।१३। नेद् यज्ञपथादयानीति ।१४। तिसृधन्वं दक्षिणा ।१५। तत् स्वस्त्ययनस्य रूपम् ।१६ ।।2।।

अथातोऽभ्युद्दृष्टायाः[1] ।१। एति ह वा एष यज्ञपथात् ।२। यस्योपवसथे पश्चाच्चन्द्रो दृश्यते ।३। सोऽग्नये पथिकृतेऽष्टाकपालं पुरोळाशं निर्वपति ।४। अग्निर्वै पथिकृत् ।५। स एवैनं[2] यज्ञपथमपिपातयति[3] ।६। इन्द्राय वृत्रघ्न एकादशकपालम् ।७। इन्द्रो वै वृत्रहा ।८। स एवैनं पुनर्यज्ञपथमपिपातयति[3] ।९। वैश्वानरीयं द्वादशकपालम् ।१०। असौ वै वैश्वानरो योऽसौ तपति ।११। एष एवैनं पुनर्यज्ञपथमपिपातयति[3] ।१२। तद् यदेता देवता यजति ।१३। नेद् यज्ञपथादयानीति ।१४। दण्डोपानहं दक्षिणा ।१५। तदभयस्य रूपम् ।१६ ।।3।।

[1] L. (var.) अभ्युद्रष्टाया, अभ्युदृष्टाया; wrongly reports IO. reading as अभ्युदृष्टाया; P अभ्युद्रष्टाया [2] L. P. add पुनः [3] L. P. °मपिपाथयति; L. (var.) °मभिपाथयति, °मपिपातयति

अथातो दाक्षायणयज्ञस्य ।१। दाक्षायणयज्ञेनेष्यन्[1] फाल्गुन्यां पौर्णमास्यां प्रयुङ्क्ते ।२। मुखं वा एतत् संवत्सरस्य यत् फाल्गुनी पौर्णमासी ।३। तस्मात् तस्यामदीक्षितायनानि प्रयुज्यन्ते ।४। अथो दक्षो ह वै पार्वतिरेतेन यज्ञेनेष्ट्वा सर्वान् कामानाप ।५। तद् यद् दाक्षायणयज्ञेन यजते ।६। सर्वेषामेव कामानामाप्त्यै ।७। नाशने काममापयीत[2] ।८। सोमं

राजानं चन्द्रमसं भक्षयानीति[3] मनसा ध्यायन्नश्नीयात् ।९। तदसौ वै सोमो राजा विचक्षणश्चन्द्रमाः ।१०। तमेतमपरपक्षं देवा अभिषुण्वन्ति ।११। तद् यदपरपक्षं दाक्षायणयज्ञस्य व्रतानि चरति ।१२। देवानामपि सोमपीथोऽसानीति ।१३। अथ यदुपवसथेऽग्नीषोमीयमेकादशकपालं पुरोळाशं निर्वपति ।१४। य एवासौ सोमस्योपवसथेऽग्नीषोमीयः ।१५। तमेवास्य[4] तेनाप्नोति ।१६। अथ यत् प्रातरामावास्येन यजते ।१७। ऐन्द्रं वै सुत्यमहः ।१८। तत् सुत्यमहराप्नोति ।१९। अथ यदमावास्याया[5] उपवसथ ऐन्द्राग्नं द्वादशकपालं पुरोळाशं निर्वपति ।२०। ऐन्द्राग्नं वै सामतस्तृतीयसवनम् ।२१। तत् तृतीयसवनमाप्नोति ।२२। अथ यन्मैत्रावरुणी पयस्या ।२३। मैत्रावरुणी वा अनूबन्ध्या ।२४। तदनूबन्ध्यामाप्नोति ।२५। स एष सोमो हविर्यज्ञाननुप्रविष्टः ।२६। तस्माददीक्षितो[6] दीक्षितव्रतो भवति ।२७ ॥4॥

[1] L. P. °यज्ञेनैष्यन्; IO. °यज्ञेन्नेषळ्  [2] L. P. काममापेति; L. (var.) काममापैति  [3] L. P. भक्षयामीति  [4] L. P. तमेव  [5] L. P. °वास्यायां  [6] IO. तस्माद्दीक्षितो

अथात इळादधस्य[1] ।१। इळादधेनेष्यन्नेतस्यामेव[2] पौर्णमास्यां प्रयुङ्क्ते तस्या उक्तं ब्राह्मणम् ।२। स एष पशुकामस्यान्नाद्यकामस्य यज्ञः ।३। तेन पशुकामोऽन्नाद्यकामो यजेत ।४। तत्र तथैव व्रतानि चरति ।५। दाक्षायणयज्ञस्य हि समासः[3] ।६। अथातः सार्वसेनियज्ञस्य ।७। सार्वसेनियज्ञेनेष्यन्नेतस्यामेव[2] पौर्णमास्यां प्रयुङ्क्ते तस्या उक्तं ब्राह्मणम् ।८। [4–]स एष तुस्तूर्षमाणस्य यज्ञः ।९। स य इच्छेद् द्विषन्तं भ्रातृव्यं स्तृण्वीयेति ।१०। [5–]स एतेन[–5] यजते स्तृणुते ह[–4] ।११। अथातः शौनकयज्ञस्य ।१२। शौनकयज्ञेनेष्यन्नेतस्यामेव[2] पौर्णमास्यां प्रयुङ्क्ते तस्या उक्तं ब्राह्मणम् ।१३। [6–]स एष प्रजातिकामस्य यज्ञः ।१४। तेन प्रजातिकामो यजेत ।१५। तद् यदध्वर्युर्हवींषि प्रजनयति तत् प्रजात्यै रूपम्[–6] ।१६ ॥5॥

[1] IO. इळादतस्य  [2] L. P. °नैष्य°  [3] L. P. Here ends *Khaṇḍa* 5  [4–4] L. P. here read १४–१६ and *Khaṇḍa* 6 ends with प्रजात्यै रूपम्  [5–5] L. P. सोऽनेन (for स एतेन); IO. स एनेन  [6–6] L. P. here read ९–११ and *Khaṇḍa* 7 ends with स्तृणुते ह

अथातो वसिष्ठयज्ञस्य ।१। वसिष्ठयज्ञेनेष्यन्[1] फाल्गुन्याममावास्यायां प्रयुङ्क्ते ।२। ब्रह्म वै पौर्णमासी ।३। क्षत्रममावास्या ।४। क्षत्रमिवैष यज्ञः ।५। क्षत्रेण शत्रून्त्सहा इति ।६। वसिष्ठोऽकामयत हतपुत्रः प्रजायेय प्रजया पशुभिरभि सौदासान् भवेयमिति ।७। स एतं



यज्ञक्रतुमपश्यद् वसिष्ठयज्ञम्[2] ।८। तेनेष्ट्वा प्राजायत[3] प्रजया पशुभिरभि सौदासानभवत् ।९। तथो एवैतद् यजमानो यद् वसिष्ठयज्ञेन यजते ।१०। प्रजायते प्रजया पशुभिरभि द्विषतो भ्रातृव्यान् भवति[4] ।११। अथातः साकंप्रस्थाय्यस्य ।१२। साकंप्रस्थाय्येनेष्यन्नेतस्यामेवामावास्यायां[1] प्रयुङ्क्ते तस्या उक्तं ब्राह्मणम् ।१३। स एष श्रैष्ठ्यकामस्य पौरुषकामस्य यज्ञः ।१४। तेन श्रैष्ठ्यकामः पौरुषकामो यजेत ।१५। तद् यत् साकं संप्रतिष्ठन्ते ।१६। साकं संप्रयजन्ते ।१७। साकं संभक्षयन्ते[5] ।१८। तस्मात् साकंप्रस्थाय्यः[6] ।१९ ॥6॥

[1] L. P. °नैष्य°  [2] L. P. IO. add तमाहरत्तेनायजत  [3] IO. प्रजायत  [4] L. P. Here ends *Khaṇḍa* 8  [5] L. P. भक्षयन्ते  [6] L. P. Here ends *Khaṇḍa* 9

अथातो मुन्ययनस्य ।१। मुन्ययनेनेष्यन्नेतस्यामेव[1] पौर्णमास्यां प्रयुङ्क्ते तस्या उक्तं ब्राह्मणम् ।२। स एष सर्वकामस्य यज्ञः ।३। तेन सर्वकामो यजेत[2] ।४। अथातस्तुरायणस्य ।५। तुरायणेनेष्यन्नेतस्यामेव[3] पौर्णमास्यां प्रयुङ्क्ते तस्या उक्तं ब्राह्मणम् ।६। स एष स्वर्गकामस्य यज्ञः ।७। तेन स्वर्गकामो यजेत ।८। अथ यत् कृष्णाजिनं प्रतिमुञ्चते ।९। ब्रह्म वै कृष्णाजिनम् ।१०। ब्रह्मणैव तदात्मानं[4] समर्धयति ।११। तानि वै त्रीणि हवींषि भवन्ति ।१२। त्रयो वा इमे लोकाः ।१३। इमानेव तल्लोकानाप्नोति[5] ।१४ ॥7॥

[1] L. P. °नेनैष्य°  [2] L. P. Here ends *Khaṇḍa* 10  [3] L. P. °णेनैष्य°  [4]. L. P. तद्यज्ञं  [5] L. P. Here ends *Khaṇḍa* 11

अथात आग्रयणस्य ।१। आग्रयणेनान्नाद्यकामो यजेत वर्षास्वागते श्यामाकसस्ये ।२। श्यामाकानुद्धर्तव[1] आह ।३। सा या तस्मिन् कालेऽमावास्योपसंपद्येत ।४। तयेष्ट्वाथैतयेष्ट्या यजेत ।५। यदि पौर्णमासी ।६। एतयेष्ट्वाथ पौर्णमासेन यजेत ।७। यद्यु नक्षत्रमुपेप्सेत्[2] ।८। पूर्वपक्षे नक्षत्रमुदीक्ष्य यस्मिन् कल्याणे[3] नक्षत्रे कामयेत तस्मिन् यजेत ।९। तस्यै सप्तदश सामिधेन्यः सद्वन्तावाज्यभागौ विराजौ संयाज्ये तस्योक्तं ब्राह्मणम् ।१०। सौम्यश्चरुः ।११। सोमो वै राजौषधीनाम् ।१२। तदेनं स्वया दिशा प्रीणाति ।१३। अथ यन्मधुपर्कं ददाति ।१४। एष ह्यारण्यानां रसः[4] ।१५ ॥8॥

[1] L. P. °नुद्धर्तवा  [2] IO. °त्रमपेप्सेत्  [3] L. P. omit  [4] L. P. Here ends *Khaṇḍa* 12

अथ वसन्त आगते पक्केषु वेणुयवेषु ।१। वेणुयवानुद्धर्तव[1] आह ।२। तस्या एतदेव पर्वैतत् तन्त्रमेषा देवतैषा दक्षिणैतद् ब्राह्मणम् ।३। तां हैक आग्नेयीं वा वारुणीं वा प्राजापत्यां वा कुर्वन्त्येतत्तन्त्रामेवैतद्ब्राह्मणाम्[2] ।४। अथ व्रीहिसस्ये वा यवसस्ये वागते ।५। आग्रयणीयानुद्धर्तव[1] आह ।६। तस्या एतदेव पर्वैतत् तन्त्रम् ।७। अथ यदैन्द्राग्नो द्वादशकपालः ।८। इन्द्राग्नी वै देवानां मुखम् ।९। मुखत एव तद् देवान् प्रीणाति ।१०। अथ यद् वैश्वदेवश्चरुः ।११। एते वै सर्वे देवा यद् विश्वेदेवाः ।१२। सर्वेषामेव देवानां प्रीत्यै ।१३। अथ यद् द्यावापृथिवीय एककपालः ।१४। द्यावापृथिवी वै सस्यस्य साधयित्र्यौ ।१५। प्रतिष्ठापृथिव्योर्व्रनासावनुवेद[3] ।१६। तद् यदेता देवता यजति ।१७। एताभिर्देवताभिः शान्तमन्नमत्स्यामीति ।१८ ॥9॥

[1] L. P. °नुद्धर्तवा [2] L. P. Here ends *Khaṇḍa* 13 [3] L. P. °सामनु°; L. (var.) °सावनु°

अथ यत् प्रथमजं गां ददाति ।१। प्रथमकर्म ह्येतत् ।२। यद्येतस्यै ग्लायात् ।३। पौर्णमासं वामावास्यं वा हविष्कुर्वीत नवानामुभयस्याप्त्यै ।४। अपि वा पौर्णमासे वामावास्ये वा हवींष्यनुवर्तयेद् देवतानामपरिहाणाय ।५। अपि वा यवाग्वैव सायंप्रातरग्निहोत्रं जुहुयान्नवानामुभयस्याप्त्यै ।६। अपि वा स्थालीपाकमेव गार्हपत्ये श्रपयित्वा नवानामेताभ्य आग्रयणदेवताभ्य आहवनीये जुहुयात् स्विष्टकृच्चतुर्थीभ्योऽमुष्यै[1] स्वाहामुष्यै स्वाहेति देवतानामपरिहाणाय ।७। अपि वाग्निहोत्रीमेव नवानादयित्वा तस्यै दुग्धेन सायंप्रातरग्निहोत्रं जुहुयादुभयस्याप्त्यै ।८। एत एतावन्तः पाताः ।९। तेषां येन कामयेत तेन यजेत ।१०। त्रिहविस्तु स्थिता ।११। त्रयो वा इमे लोकाः ।१२। इमानेव तल्लोकानाप्नोतीमानेव तल्लोकानाप्नोति[2] ।१३ ॥10॥

[1] L. (var.) °कृत्तच्चतु° [2] L. P. Here ends *Khaṇḍa* 14

## इति प्रथमदशके चतुर्थोऽध्यायः



अथातश्चातुर्मास्यानाम् ।१। चातुर्मास्यानि प्रयुञ्जानः फाल्गुन्यां पौर्णमास्यां प्रयुङ्क्ते ।२। मुखं वा एतत् संवत्सरस्य यत् फाल्गुनी पौर्णमासी ।३। मुखमुत्तरे फल्गू ।४। पुच्छं पूर्वे ।५। तद् यथा प्रवृत्तस्यान्तौ समेतौ स्याताम् ।६। एवमेवैतौ संवत्सरस्यान्तौ समेतौ ।७। तद् यत् फाल्गुन्यां पौर्णमास्यां वैश्वदेवेन यजते ।८। मुखत एव तत् संवत्सरं प्रीणाति ।९। अथो भैषज्ययज्ञा वा एते यच्चातुर्मास्यानि ।१०। तस्मादृतुसंधिषु प्रयुज्यन्ते ।११। ऋतुसंधिषु हि व्याधिर्जायते ।१२। तानि वा अष्टौ हवींषि भवन्ति ।१३। अष्टौ वै चतसृणां पौर्णमासीनां हवींषि भवन्ति ।१४। चतसृणां वै पौर्णमासीनां वैश्वदेवं समासः ।१५। अथ यदग्निर्मथ्यते ।१६। प्रजातिर्वै वैश्वदेवम् ।१७। तस्मादेतं दैवं गर्भं प्रजनयन्ति[1] ।१८। अथ यत् सप्तदश सामिधेन्यः सद्वन्तावाज्यभागौ विराजौ संयाज्ये तस्योक्तं ब्राह्मणम् ।१९। अथ यन्नव प्रयाजा नवानुयाजा अष्टौ हवींषि वाजिनं नवमम् ।२०। तन्नक्षत्रियां विराजमाप्नोति ।२१ ॥1॥

[1] L. P. IO. प्रजनयति

अथ यदग्नीषोमौ प्रथमौ देवतानां यजति ।१। दार्शपौर्णमासिके वा एते देवते ।२। तस्मादेनौ प्रथमौ यजति ।३। अथ यत् सवितारं यजति ।४। सविता वै[1] प्रसवानामीशे ।५। सवितृप्रसूततायै ।६। अथ यत् सरस्वतीं यजति ।७। वाग् वै सरस्वती ।८। वाचमेव तत् प्रीणाति ।९। अथ यत् पूषणं यजति ।१०। असौ वै पूषा योऽसौ तपति ।११। एतमेव तत् प्रीणाति ।१२। अथ यन्मरुतः स्वतवसो यजति ।१३। घोरा वै मरुतः स्वतवसः ।१४। भैषज्यमेव तत् कुरुते ।१५। अथ यद् वैश्वदेवी पयस्या ।१६। एते वै सर्वे देवा यद् विश्वेदेवाः ।१७। सर्वेषामेव देवानां प्रीत्यै ।१८। अथ यद् द्यावापृथिवीय एककपालः ।१९। प्रतिष्ठे वै द्यावापृथिवी प्रतिष्ठित्या एव ।२०। [2-]अथ यत् प्रथमजं गां ददाति ।२१। प्रथमकर्म ह्येतत्[-2] ।२२। अथ यत् पुरस्ताद् वोपरिष्टाद् वा शंयोर्वाकस्यानावाहितान् वाजिनो यजति ।२३। देवाश्वा[3] वै वाजिनः ।२४। तानेव तत् प्रीणाति ।२५। अत्र देवाः साश्वाः प्रीता भवन्ति ।२६। अथो ऋतवो वै वाजिनः ।२७। ऋतूनेव तत् प्रीणाति ।२८। अथ यत् परस्तात् पौर्णमासेन यजते ।२९। तथा हास्य पूर्वपक्षे वैश्वदेवेनेष्टं भवति ।३० ॥2॥

[1] L. omits [2-2] EM. omits [3] L. (var.) P. देवा अश्वा

वैश्वदेवेन वै प्रजापतिः प्रजा असृजत ।१। ताः सृष्टा अप्रसूता वरुणस्य [1-]यवान् जक्षुः[-1]

।२। ता वरुणो वरुणपाशैः प्रत्यमुञ्चत् ।३। ताः प्रजाः प्रजापतिं पितरमेत्योपाधावन् ।४। उप तं यज्ञक्रतुं जानीहि येनेष्ट्वा वरुणपाशेभ्यः सर्वस्माच्च पाप्मनः संप्रमुच्येमहीति ।५। तत एतं प्रजापतिर्यज्ञक्रतुमपश्यद् वरुणप्रघासान्[2] ।६। तमाहरत् तेनायजत ।७। तेनेष्ट्वा वरुणमप्रीणात् ।८। स प्रीतो वरुणो वरुणपाशेभ्यः सर्वस्माच्च पाप्मनः प्रजाः प्रामुञ्चत् ।९। प्र ह वा अस्य प्रजा वरुणपाशेभ्यः सर्वस्माच्च पाप्मनः संप्रमुच्यते[3] [4–]य एवं वेद[–4] ।१० ॥3॥

[1–1] P. यवां चक्षुः    [2] P. वरुणप्रघासं    [3] L. P. संप्रमुच्यन्ते; L. (var.) संप्रमुच्यत
[4–4] L. P. य एवं दिद्वान् वरुणप्रघासैर्यजते

अथ यदग्निं प्रणयन्ति ।१। यमेवामुं वैश्वदेवे मन्थन्ति ।२। तमेव तत् प्रणयन्ति ।३। अथ यन्मथ्यते[1] तस्योक्तं ब्राह्मणम् ।४। अथ यत् सप्तदश सामिधेन्यः सद्वन्तावाज्यभागौ विराजौ संयाज्ये तस्योक्तं ब्राह्मणम् ।५। अथ यन्नव प्रयाजा नवानुयाजा नवैतानि हवींषि ।६। तन्नक्षत्रियां विराजमाप्नोति ।७। समानानि पञ्च संचराणि हवींषि भवन्ति[2] पौष्णान्तानि वैश्वदेविकानि[2] ।८। तेषामुक्तं ब्राह्मणम्[3] ।९। अथ यदैन्द्राग्नो द्वादशकपालः ।१०। प्रतिष्ठे वा इन्द्राग्नी प्रतिष्ठित्या एव ।११ ॥4॥

[1] L. P. यदग्निर्मथ्यते    [2] L. P. omit    [3] L. P. Here ends *Khaṇḍa* 3

अथो मध्यस्थो वा इन्द्रः ।१। तस्मादेनं मध्यतो यजति ।२। अथ यद् वारुणी पयस्या ।३। इन्द्रो[1] वै वरुणः ।४। स उ वै पयोभाजनः ।५। तस्माद् वारुणी पयस्या ।६। अथ यन्मारुती पयस्या ।७। अप्सु वै मरुतः श्रिताः ।८। तस्मादेनान् पयसा यजति ।९। आपो हि पयः ।१०। अथो इन्द्रस्य वै मरुतः ।११। ऐन्द्रं पयः ।१२। तस्मान्मारुती पयस्या ।१३। अथ यत् काय एककपालः ।१४। प्रजापतिर्वै कः ।१५। तमेव तत् प्रीणाति ।१६। अथो सुखस्यैवैतन्नामधेयं कमिति ।१७। सुखमेव तदात्मन् धत्ते ।१८। अथ यन्मिथुनौ गावौ ददाति ।१९। तत् प्रजात्यै रूपम् ।२०। अथ यद् वाजिनो यजति ।२१। तेषामुक्तं ब्राह्मणम् ।२२। अथ यदप्सु वरुणं यजति ।२३। स्व एवैनं तदायतने प्रीणाति ।२४। अथ यत् परस्तात् पौर्णमासेन यजते ।२५। तथा हास्य पूर्वपक्षे[2] वरुणप्रघासैरिष्टं भवति[3] ।२६ ॥5॥

[1] L. P. इन्द्र उ    [2] L. (var.) पूर्वे पक्षे    [3] L. P. Here ends *Khaṇḍa* 4



ऐन्द्रो वा एष यज्ञक्रतुर्यत् साकमेधाः ।१। तद् यथा महाराजः पुरस्तात् सेनानीकानि[1] प्रत्यूह्याभयं[2] पन्थानमन्वियात् ।२। एवमेवैतत् पुरस्ताद् देवता यजति ।३। तद् यथादः सोमस्य महाव्रतम् ।४। एवमेवैतदिष्टिमहाव्रतम्[3] ।५। अथ यदग्निमनीकवन्तं प्रथमं देवतानां यजति ।६। अग्निर्वै देवानां मुखम् ।७। मुखत एव तद् देवान् प्रीणाति ।८। अथ यन्मध्यंदिने मरुतः सांतपनान् यजति ।९। मध्यंदिने वै संतपति ।१०। तस्मान्मध्यंदिने मरुतः सांतपनान् यजति ।११। अथो इन्द्रस्य वै मरुतः ।१२। ऐन्द्रो मध्यंदिनः ।१३। तस्मान्मध्यंदिने मरुतः सांतपनान् यजति ।१४। अथ यत् सायं गृहमेधीयेन चरन्ति ।१५। पुष्टिकर्म वा एतद् यद् गृहमेधीयः ।१६। सायं पोषः ।१७। तस्मात् पोषवन्तावाज्यभागौ भवतः[4] ।१८। यजमानमेव तत् पोषयति ।१९। अथ यत् प्रातः पूर्णदर्वेण चरन्ति ।२०। पूर्वेद्युःकर्मणैवैतत् प्रातःकर्मोपसंतनोति ।२१ ॥6॥

[1] L. P. सैनानीकानि    [2] L. P. प्रत्युह्याभयं    [3] P. एवमेतदिष्टि°    [4] L. P. यजति

अथ यन्मरुतः क्रीळिनो यजति ।१। इन्द्रस्य वै मरुतः क्रीळिनः ।२। तस्मादेनानिन्द्रेणोपसंहितान् यजति ।३। [1–]अथ यन्महेन्द्रमन्ततो यजति ।४। अन्तं वै श्रेष्ठी भजते ।५। तस्मादेनमन्ततो यजति[–1] ।६। अथ यदग्निं प्रणयन्ति यन्मथ्यते तस्योक्तं ब्राह्मणम् ।७। अथ यत् सप्तदश सामिधेन्यः सद्वन्तावाज्यभागौ विराजौ संयाज्ये तस्योक्तं ब्राह्मणम् ।८। अथ यन्नव प्रयाजा नवानुयाजा अष्टौ हवींषि स्विष्टकृन्नवमः[2] ।९। तन्नक्षत्रियां विराजमाप्नोति ।१०। समानानि षट् संचराणि हवींषि भवन्त्यैन्द्राग्नान्तानि[3] वारुणप्रघासिकानि[4] ।११। तेषामुक्तं ब्राह्मणम् ।१२। अथ यन्महेन्द्रं[5] यजति [6–]तस्योक्तं ब्राह्मणम्[–6] ।१३। अथ यद् वैश्वकर्मण एककपालः ।१४। असौ वै विश्वकर्मा योऽसौ तपति ।१५। एतमेव तत् प्रीणाति ।१६। अथ यदृषभं ददाति[7] ।१७। ऐन्द्रो हि यज्ञक्रतुः[8] ।१८ ॥7॥

[1–1] L. P. omit    [2] L. °न्नवमं    [3] L. P. omit भवन्ति    [4] L. P. omit    [5] L. P. add अन्ततो    [6–6] L. P. omit; instead read अन्तं वै श्रेष्ठी भजते तस्मादेनमन्ततो यजति
[7] IO. दधाति    [8] L. P. Here ends *Khaṇḍa* 5

अथ यदपराह्णे पितृयज्ञेन चरन्ति ।१। अपक्षयभाजौ वै पितरः ।२। तस्मादपराह्णे पितृयज्ञेन चरन्ति ।३। तदाहुर्यदपरपक्षभाजः पितरोऽथ कस्मादेनान् पूर्वपक्षे यजन्तीति ।४। देवा वा एते पितरः ।५। तस्मादेनान् पूर्वपक्षे यजन्ति ।६। अथ यद्येकां सामिधेनी-

मन्वाह।७। सकृदिव वै पितरः।८। तस्मादेकां सामिधेनीमन्वाह।९। सा वा अनुष्टुब् भवति।१०। वागनुष्टुप्।११। पराञ्च उ वै पितरः।१२। तानेवैतद् वाचानुष्टुभागमयति।१३। अथ यद् यजमानस्यार्षेयं नाह।१४। नेद् यजमानं प्रवृणजानीति।१५। अथैतं निगदमन्वाह तस्योक्तं ब्राह्मणम्।१६। अथ यत्[1] सोमं पितृमन्तं पितॄन् वा सोमवतः पितॄन् बर्हिषदः पितॄनग्निष्वात्तानित्यावाहयति।१७। दैवा वा एते पितरः।१८। तस्मादेनानावाहयति।१९। अथ यदग्निं कव्यवाहनमावाहयति।२०। एतत्स्विष्टकृतो वै पितरः।२१। तस्मादेनमावाहयति।२२। न हैके स्वं महिमानमावाहयन्ति यजमानस्यैष महिमेति वदन्तः।२३। आवाहयेदिति त्वेव स्थितम्।२४। अग्नेर्ह्येवैष महिमा[2]।२५। अथ यत् प्रयाजानुयाजेभ्यो बर्हिष्मन्ता उत्सृजति।२६। प्रजा वै बर्हिः।२७। नेत् प्रजां प्रवृणजानीति।२८। ते वै षड् भवन्ति।२९। षड् वा ऋतवः।३०। ऋतवः पितरः।३१। पितॄनेव तत् प्रीणाति।३२। अथ यज्जीवनवन्तावाज्यभागौ भवतः[3]।३३। यजमानमेव तज्जीवयति।३४। अथ यत् तिस्रस्तिस्र एकैकस्य हविषो भवन्ति।३५। त्रीणि वै हवींषि भवन्ति।३६। तेषां समवद्यति।३७। तस्मात् तिस्रस्तिस्र एकैकस्य हविषो भवन्ति।३८। अथो[4] देवकर्मणैवैतत् पितृकर्म व्यावर्तयति।३९। अथो परामु वै परावतं पितरो गताः।४०। आह्वयत्येवैनान्[5] प्रथमया।४१। द्वितीययागमयति।४२। प्रैव तृतीयया यच्छति।४३ ॥8॥

[1] L. omits [2] L. P. Here ends *Khaṇḍa* 6 [3] L. P. यजति [4] ER. तथो
[5] L. °वैनत्; P. °वैनां

अथ यदग्निं कव्यवाहनमन्ततो यजति।१। एतत्स्विष्टकृतो वै पितरः।२। तस्मादेनमन्ततो यजति।३। [1-]अथ यदप उपस्पृशति तस्योक्तं ब्राह्मणम्[-1]।४। अथ यदिळामुपहूयावघ्राय न प्राश्नन्ति।५। पशवो वा इळा।६। नेद् यजमानस्य पशून् प्रवृणजानीति[2]।७। अथ यदध्वर्युः पितृभ्यो ददाति।८। पितॄनेव तत् प्रीणाति।९। अथ यत् पवित्रवति मार्जयन्ते [1-]तस्योक्तं ब्राह्मणम्[-1]।१०। अथ यदृचं जपन्ति स्वस्त्ययनमेव तत् कुर्वते।११। अथ यदुदञ्चः परेत्य गार्हपत्याहवनीया उपतिष्ठन्ते।१२। प्रीत्वैव तद् देवेष्वन्ततोऽर्थं वदन्ते।१३। अथो[3] दक्षिणासंस्थो वै पितृयज्ञः।१४। तमेवैतदुदक्संस्थं कुर्वन्ति।१५। अथ यत् प्राञ्च उपनिष्क्रम्यादित्यमुपतिष्ठन्ते।१६। देवलोको वा आदित्यः।१७। पितृलोकः पितरः।१८। देवलोकमेव तत् पितृलोकादभ्युत्क्रामन्ति।१९। अथ यत् सूक्तवाके यजमानस्य नाम न गृह्णाति।२०। नेद् यजमानं प्रवृणजानीति।२१। अथ यत् पत्नीसंयाजैर्न चरन्ति।२२। नेत् पत्न्यः प्रवृणजामेति।२३। अथ यदुदञ्चः परेत्य त्र्यम्बकैश्चरन्ति[4]।२४। रुद्रमेव तत् स्वायां दिशि



प्रीणन्ति।२५। अथो दक्षिणासंस्थो वै पितृयज्ञः।२६। तमेवैतदुदक्संस्थं कुर्वन्ति।२७। अथ यदन्तत इष्टेष्ट्या यजते।२८। एतत्संस्था वै साकमेधाः।२९। तस्मादन्तत इष्टेष्ट्या यजते।३०। अथ यत् परस्तात् पौर्णमासेन यजते।३१। तथा हास्य पूर्वपक्षे साकमेधैरिष्टं भवति[5]।३२ ॥9॥

[1–1] L. P. omit [2] L. P. BM¹. BM². प्रवृणजामेति [3] ER. तथो [4] L. P. त्रियम्बकै°
[5] L. P. Here ends *Khaṇḍa* 7

त्रयोदशं वा एतन्मासमाप्नोति[1] यच्छुनासीर्येण यजते।१। एतावान् वै संवत्सरो यदेष त्रयोदशो मासः।२। तदत्रैव सर्वः[2] संवत्सर आप्तो भवति।३। [3-]अथ यच्छुनासीरौ यजति।४। शान्तिर्वै भेषजं शुनासीरौ।५। शान्तिरेवैषा भेषजमन्ततो यज्ञे क्रियते[-3]।६। [4-]स यद्यग्निर्मथ्यते[-4] यद् वैश्वदेवस्य तन्त्रं तत् तन्त्रम्।७। यद्यु न मथ्यते पौर्णमासमेव तन्त्रं भवति।८। प्रतिष्ठा वै पौर्णमासं प्रतिष्ठित्या एव[5]।९। अथ यत् सप्तदश सामिधेन्यः सद्वन्तावाज्यभागौ विराजौ संयाज्ये तस्योक्तं ब्राह्मणम्।१०। अथ यन्नव प्रयाजा नवानुयाजा अष्टौ हवींषि स्विष्टकृन्नवमः[6]।११। तन्नक्षत्रियां विराजमाप्नोति।१२। समानानि त्वेव पञ्च संचराणि हवींषि भवन्ति पौष्णान्तानि वैश्वदेविकानि[7]।१३। तेषामुक्तं ब्राह्मणम्।१४। अथ यच्छुनासीरौ यजति।१५। [8-]तयोरुक्तं ब्राह्मणम्[-8]।१६। अथ यद् वायुं यजति।१७। प्राणो वै वायुः।१८। प्राणमेव [9-]तदात्मन् धत्ते[-9]।१९। अथ यत् सौर्य एककपालः।२०। असौ वै सूर्यो योऽसौ तपति।२१। एतमेव तत् प्रीणाति।२२। अथ यच्छ्वेता दक्षिणा।२३। एतमेव तत् प्रीणाति।२४। एतस्यैव तद् रूपं क्रियते[10]।२५। अथ यत् प्रायश्चित्तप्रतिनिधीन् कुर्वन्ति यदाहुतीर्जुह्वति।२६। स्वस्त्ययनमेव तत् कुर्वते।२७। यज्ञस्यैव शान्त्यै।२८। यजमानस्य च भिषज्यायै[11]।२९। अथ यत् स्वैरग्निभिर्यजमानं संस्कुर्वन्ति।३०। देवरथो वा अग्नयः।३१। देवरथ एवैनं तत् समारोपयन्ति[12]।३२। स एतेन देवरथेन स्वर्गँल्लोकमेति।३३। सुकृतां यत्र लोकः सुकृतां यत्र लोकः[13]।३४ ॥10॥

[1] L. P. IO. एतं मास° [2] P. सर्वैः [3–3] L. P. omit [4–4] L. P. अथ यदग्निर्म°
[5] L. P. add अथ यद्यग्निर्मथ्यते तस्योक्तं ब्राह्मणम् [6] L. P. °न्नवमं [7] L. P. omit
[8–8] L. P. omit; instead read शान्तिर्वै भेषजं शुनासीरौ शान्तिरेवैषा भेषजमन्ततो यज्ञे क्रियते
[9–9] L. P. तत्प्रीणाति [10] L. P. Here ends *Khaṇḍa* 8 [11] L. P. Here ends *Khaṇḍa* 9
[12] L. P. संस्थापयन्ति [13] IO. adds सरस्वतिकण्टम् (L. reports as सरस्वतीकाण्डम्)

## इति प्रथमदशके पञ्चमोऽध्यायः

प्रजापतिः प्रजातिकामस्तपोऽतप्यत ।१। तस्मात् तप्तात् पञ्चाजायन्त ।२। अग्निर्वायुरादित्यश्चन्द्रमा उषाः पञ्चमी ।३। तानब्रवीद् यूयमपि तप्यध्वमिति ।४। तेऽदीक्षन्त ।५। तान् दीक्षितांस्तेपानानुषाः प्राजापत्याप्सरोरूपं कृत्वा पुरस्तात् प्रत्युदैत् ।६। तस्यामेषां मनः समपतत् ।७। ते रेतोऽसिञ्चन्त ।८। ते प्रजापतिं पितरमेत्याब्रुवन् ।९। रेतो वा [1–]असिचामहै तन्नो[–1] मामुया भूदिति ।१०। स प्रजापतिर्हिरण्मयं चमसमकरोदिषुमात्रमूर्ध्वमेवं तिर्यञ्चम् ।११। तस्मिन्नेनत्[2] समसिञ्चत् ।१२। तत उदतिष्ठत् सहस्राक्षः सहस्रपात् ।१३। सहस्रेण प्रतिहिताभिः[3] ।१४। स प्रजापतिं पितरमभ्यायच्छत् ।१५। तमब्रवीत् कथा माभ्यायच्छसीति ।१६। नाम मे कुर्वित्यब्रवीत् ।१७। न वा इदमविहितेन नाम्नान्नमत्स्यामीति ।१८ ॥1॥

[1–1] L. P. असिचामहा इदं नो [2] P. BM[1]. एतत् (for एनत्); L. तस्मिन् रेतः; (var.) तस्मिन्नेतत्
[3] L. P. Here ends *Khaṇḍa* 1

स वै त्वमित्यब्रवीद् भव एवेति ।१। यद् भव आपस्तेन ।२। न[1] ह वा एनं भवो हिनस्ति ।३। नास्य प्रजां नास्य पशून् नास्य ब्रुवाणं चन ।४। अथ य एनं द्वेष्टि ।५। स एव पापीयान् भवति ।६। न स य एवं वेद ।७। तस्य व्रतमार्द्रमेव वासः परिदधीतापो वै न परिचक्षीतेति[2] ।८। तं द्वितीयमभ्यायच्छत् ।९। तमब्रवीत् कथा माभ्यायच्छसीति ।१०। द्वितीयं मे नाम कुर्वित्यब्रवीत् ।११। न वा इदमेकेन नाम्नान्नमत्स्यामीति ।१२। स वै त्वमित्यब्रवीच्छर्व एवेति ।१३। यच्छर्वोऽग्निस्तेन ।१४। न ह वा एनं शर्वो हिनस्ति ।१५। नास्य प्रजां नास्य पशून् नास्य ब्रुवाणं चन ।१६। अथ य एनं द्वेष्टि ।१७। स एव पापीयान् भवति ।१८। न स य एवं वेद ।१९। तस्य व्रतं सर्वमेव नाश्नीयादिति[3] ।२०। तं तृतीयमभ्यायच्छत् ।२१। तमब्रवीत् कथा माभ्यायच्छसीति ।२२। तृतीयं मे नाम कुर्वित्यब्रवीत् ।२३। न वा इदं द्वाभ्यां नामभ्यामन्नमत्स्यामीति ।२४। स वै त्वमित्यब्रवीत् पशुपतिरेवेति ।२५। यत् पशुपतिर्वायुस्तेन ।२६। न ह वा एनं पशुपतिर्हिनस्ति ।२७। नास्य प्रजां नास्य पशून् नास्य ब्रुवाणं चन ।२८। अथ य एनं द्वेष्टि ।२९। स एव पापीयान् भवति ।३०। न स य एवं वेद ।३१। तस्य व्रतं ब्राह्मणमेव न परिवदेदिति[4] ।३२। तं चतुर्थमभ्यायच्छत् ।३३। तमब्रवीत् कथा माभ्यायच्छसीति ।३४। चतुर्थं मे नाम कुर्वित्यब्रवीत् ।३५। न वा इदं त्रिभिर्नामभिरन्नमत्स्यामीति ।३६। स वै त्वमित्यब्रवीदुग्र एव देव इति ।३७। यदुग्रो[5] देव ओषधयो वनस्पतयस्तेन ।३८। न ह वा एनमुग्रो देवो हिनस्ति ।३९। नास्य प्रजां



नास्य पशून् नास्य ब्रुवाणं चन ।४०। अथ य एनं द्वेष्टि ।४१। स एव पापीयान् भवति ।४२। न स य एवं वेद ।४३। तस्य व्रतं स्त्रिया एव विवरं नेक्षेतेति[6] ।४४ ॥2॥

[1] P. omits [2] L. P. omit अपो वै न परिचक्षीतेति; here ends *Khaṇḍa* 2
[3] L. P. Here ends *Khaṇḍa* 3 [4] L. P. Here ends *Khaṇḍa* 4 [5] IO. यदुग्र
[6] L. P. Here ends *Khaṇḍa* 5

तं पञ्चममभ्यायच्छत् ।१। तमब्रवीत् कथा माभ्यायच्छसीति ।२। पञ्चमं मे नाम कुर्वित्यब्रवीत् ।३। न वा इदं चतुर्भिर्नामभिरन्नमत्स्यामीति ।४। स वै त्वमित्यब्रवीन्महानेव देव इति ।५। यन्महान् देव आदित्यस्तेन ।६। न ह वा एनं महान् देवो हिनस्ति ।७। नास्य प्रजां नास्य पशून् नास्य ब्रुवाणं चन ।८। अथ य एनं द्वेष्टि ।९। स एव पापीयान् भवति ।१०। न स य एवं वेद ।११। तस्य व्रतमुद्यन्तमेवैनं नेक्षेतास्तं यन्तं चेति[1] ।१२। तं षष्ठमभ्यायच्छत् ।१३। तमब्रवीत् कथा माभ्यायच्छसीति ।१४। षष्ठं मे नाम कुर्वित्यब्रवीत् ।१५। न वा इदं पञ्चभिर्नामभिरन्नमत्स्यामीति ।१६। स वै त्वमित्यब्रवीद् रुद्र एवेति ।१७। यद् रुद्रश्चन्द्रमास्तेन ।१८। न ह वा एनं रुद्रो हिनस्ति ।१९। नास्य प्रजां नास्य पशून् नास्य ब्रुवाणं चन ।२०। अथ य एनं द्वेष्टि ।२१। स एव पापीयान् भवति ।२२। न स य एवं वेद ।२३। तस्य व्रतं विमूर्तमेव नाश्नीयान्मज्जानं चेति[2] ।२४। तं सप्तममभ्यायच्छत् ।२५। तमब्रवीत् कथा माभ्यायच्छसीति ।२६। सप्तमं मे नाम कुर्वित्यब्रवीत् ।२७। न वा इदं षड्भिर्नामभिरन्नमत्स्यामीति ।२८। स वै त्वमित्यब्रवीदीशान एवेति ।२९। यदीशानोऽन्नं तेन ।३०। न ह वा एनमीशानो हिनस्ति ।३१। नास्य प्रजां नास्य पशून् नास्य ब्रुवाणं चन ।३२। अथ य एनं द्वेष्टि ।३३। स एव पापीयान् भवति ।३४। न स य एवं वेद ।३५। तस्य व्रतमन्नमेवेच्छमानं न प्रत्याचक्षीतेति[3] ।३६। तमष्टममभ्यायच्छत् ।३७। तमब्रवीत् कथा माभ्यायच्छसीति ।३८। अष्टमं मे नाम कुर्वित्यब्रवीत् ।३९। न वा इदं सप्तभिर्नामभिरन्नमत्स्यामीति ।४०। स वै त्वमित्यब्रवीदशनिरेवेति ।४१। यदशनिरिन्द्रस्तेन ।४२। न ह वा एनमशनिर्हिनस्ति ।४३। नास्य प्रजां नास्य पशून् नास्य ब्रुवाणं चन ।४४। अथ य एनं द्वेष्टि ।४५। स एव पापीयान् भवति ।४६। न स य एवं वेद ।४७। तस्य व्रतं सत्यमेव वदेद्धिरण्यं च बिभृयादिति ।४८। स एषोऽष्टनामा ।४९। अष्टधा विहितो महान् देवः ।५०। आ ह वा अस्याष्टमात् पुरुषात् प्रजान्नमत्ति ।५१। वसीयान् वसीयान् हैवास्य प्रजायामाजायते य एवं वेद[4] ।५२ ॥3॥

[1] L. P. Here ends *Khaṇḍa* 6 [2] L. P. Here ends *Khaṇḍa* 7 [3] L. P. Here ends *Khaṇḍa* 8 [4] L. P. Here ends *Khaṇḍa* 9

प्रजापतिस्तपोऽतप्यत। ।१। स तपस्तप्त्वा प्राणादेवेमँल्लोकं प्रावृहत् ।२। अपानादन्तरिक्षलोकम् ।३। व्यानादमुँल्लोकम् ।४। स एताँस्त्रीँल्लोकानभ्यतप्यत ।५। सोऽग्निमेवास्माल्लोकादसृजत ।६। वायुमन्तरिक्षलोकादादित्यं दिवः ।७। स एतानि त्रीणि ज्योतींष्यभ्यतप्यत ।८। सोऽग्नेरेवर्चोऽसृजत ।९। वायोर्यजूंष्यादित्यात् सामानि ।१०। स एतां त्रयीं विद्यामभ्यतप्यत ।११। स यज्ञमतनुत ।१२। स ऋचैवाशंसत् ।१३। यजुषा प्राचरत् साम्नोदगायत् ।१४। अथैतस्या एव त्रय्यै विद्यायै तेजोरसं प्रावृहत् ।१५। एतेषामेव वेदानां भिषज्यायै ।१६। स भूरित्यृचां प्रावृहत् ।१७। भुव इति यजुषां स्वरिति साम्नाम् ।१८। तेन[1] दक्षिणतो ब्रह्मासीत् ।१९। तस्य[2] दक्षिणतो वर्षीयानुदीचीनप्रवणो यज्ञः संतस्थे ।२०। तस्य ह वै दक्षिणतो वर्षीयानुदीचीनप्रवणो[3] यज्ञः संतिष्ठते ।२१ ॥4॥

[1] L. केन; (var.) तेन [2] L. कस्य; (var.) तस्य [3] L. (var.). P. °चीनैवप्र°

यस्यैवं विद्वान् ब्रह्मा भवति[1] ।१। तदाहुर्यदृचा होता होता भवति यजुषाध्वर्युरध्वर्युः साम्नोद्गातोद्गाता केन ब्रह्मा ब्रह्मा भवतीति ।२। यमेवामुं त्रय्यै विद्यायै तेजोरसं प्रावृहत् ।३। तेन ब्रह्मा ब्रह्मा भवति ।४। तदाहुः किंविदं किंछन्दसं ब्रह्माणं वृणीतेति ।५। अध्वर्युमित्येके ।६। स परिक्रमाणां क्षेत्रज्ञो भवतीति ।७। छन्दोगमित्येके ।८। तथा हास्य त्रिभिर्वेदैर्हविर्यज्ञाः संस्क्रियन्त इति ।९। बह्वृचमिति त्वेव स्थितम् ।१०। एतत्परिसरणावितरौ[2] वेदौ ।११। अत्र च भूयिष्ठा होत्रा[3] आयत्ता भवन्तीति ।१२। ऋग्भिर्ग्रहा गृह्यन्ते ।१३। ऋक्षु सामानि गीयन्ते ।१४। तस्माद् बह्वृच एव स्यात् ।१५। तदाहुः कियद् ब्रह्मा यज्ञस्य संस्करोति कियदन्य ऋत्विज इति ।१६। अर्धमिति ब्रूयात् ।१७। द्वे वै यज्ञस्य वर्तनी ।१८। वाचान्या संस्क्रियते ।१९। मनसान्या ।२०। सा या वाचा संस्क्रियते ।२१। तामन्य ऋत्विजः संस्कुर्वन्ति ।२२। अथ या मनसा तां ब्रह्मा ।२३। तस्माद् यावदृचा यजुषा साम्ना कुर्युः ।२४। तूष्णीं तावद् ब्रह्मासीत ।२५। अर्धं हि तद् यज्ञस्य संस्करोति[4] ।२६। अथ यत्रैनं ब्रूयुः ।२७। [5–]ब्रह्मन् प्रचरिष्यामो ब्रह्मन् प्रणेष्यामो[–5] ब्रह्मन् प्रस्थास्यामो ब्रह्मन्त्स्तोष्याम इति वा[6] ।२८। ओमित्येतावता प्रसुयात् ।२९। एतद्ध वा एकमक्षरं त्रयीं विद्यां प्रति प्रति ।३० ॥5॥

[1] L. P. Here ends *Khaṇḍa* 10 [2] L. P. °परिचरणा° [3] IO. omits
[4] L. P. Here ends *Khaṇḍa* 11 [5–5] L. ब्रह्मन् प्रणेष्यामो ब्रह्मन् प्रचरिष्यामो; P. ब्रह्मन् प्रणेष्यामो ब्रह्मन् प्रचतरिष्यामो; L. (var.) प्रतरिष्यामो, प्रत्वरिष्यामो, प्रवरिष्यामो (for प्रचरिष्यामो)
[6] L. P. omit



तथा हास्य त्रय्या विद्यया प्रसूतं भवति ।१। ब्रह्मणि वै यज्ञः प्रतिष्ठितः ।२। यद् वै यज्ञस्य स्खलितं वोल्बणं वा भवति ।३। ब्रह्मण एव तत् प्राहुः ।४। तत् स त्रय्या विद्यया भिषज्यति ।५। अथ यद्यृच्युल्बणं स्यात् ।६। चतुर्गृहीतमाज्यं गृहीत्वा गार्हपत्ये प्रायश्चित्ताहुतिं जुहुयाद् भूः स्वाहेति ।७। तदृचमृचि दधाति ।८। [1–]ऋच ऋचे[–1] प्रायश्चित्तिं करोति ।९। अथ यदि यजुष्युल्बणं स्यात् ।१०। चतुर्गृहीतमाज्यं गृहीत्वान्वाहार्यपचने प्रायश्चित्ताहुतिं जुहुयाद्धविर्यज्ञ आग्नीध्रिये[2] सौम्येऽध्वरे भुवः स्वाहेति ।११। तद् यजुर्यजुषि दधाति ।१२। यजुषा यजुषे[3] प्रायश्चित्तिं करोति ।१३। अथ यदि साम्न्युल्बणं स्यात् ।१४। चतुर्गृहीतमाज्यं गृहीत्वाहवनीये प्रायश्चित्ताहुतिं जुहुयात् स्वः स्वाहेति ।१५। तत् साम सामन्[4] दधाति ।१६। साम्ना साम्ने[4] प्रायश्चित्तिं करोति ।१७। अथ यद्यविज्ञातमुल्बणं स्यात् ।१८। चतुर्गृहीतमाज्यं गृहीत्वाहवनीय एव प्रायश्चित्ताहुतिं जुहुयाद् भूर्भुवः स्वः स्वाहेति ।१९ ॥6॥

[1–1] L. P. ऋचर्चि [2] L. P. आग्नीध्रीये [3] L. P. यजुषि [4] L. P. साम्नि

एष ह वै यज्ञस्य व्यृद्धिं[1] समर्धयति य एताभिर्व्याहृतिभिः प्रायश्चित्तिं करोति ।१। न ह वा उपसृतो[2] ब्रूयान्नाहमेतद् वेदेत्येता व्याहृतीर्विद्वान्[3] ।२। सर्वं ह वा उ स वेद य एता व्याहृतीर्वेद ।३। तद् यथा ह वै दारुणः श्लेष्म संश्लेषणं स्यात् परिचर्मण्यं वा ।४। एवमेवैता व्याहृतयः सर्वस्यै[4] त्रय्यै विद्यायै संश्लेषिण्यः[5] ।५। अथ यद् ब्रह्मसदनात् तृणं निरस्यति ।६। शोधयत्येवैनत् तत् ।७। अथोपविशतीदमहमर्वावसोः सदसि सीदामीति ।८। अर्वावसुर्ह वै देवानां ब्रह्मा ।९। तमेवैतत् पूर्वं[6] सादयत्यरिष्टं यज्ञं तनुतादिति[7] ।१०। अथोपविश्य जपति बृहस्पतिर्ब्रह्मेति ।११। बृहस्पतिर्ह वै देवानां ब्रह्मा ।१२ ॥7॥

[1] L. P. व्यृद्धं [2] L. (var.) उपश्रुतो [3] IO. व्याहृतीभिर्वि° [4] L. P. omit
[5] IO. संश्लेषिणः; P. संश्लेषण्यः; L. P. Here ends *Khaṇḍa* 12 [6] P. पूर्वे [7] L. (var.) तनुथादिति

तस्मिन्नेवैतदनुज्ञामिच्छते ।१। प्रणीतासु प्रणीयमानासु वाचं यच्छत्या हविष्कृत उद्वादनात् ।२। एतद् वै यज्ञस्य द्वारम् ।३। तदेवैतदशून्यं[1] करोति ।४। इष्टे च स्विष्टकृत्यानुयाजानां प्रसवात् ।५। एतद्ध वै यज्ञस्य द्वितीयं द्वारम् ।६। तदेवैतदशून्यं करोति ।७। अथ यत्र ह तद् देवा यज्ञमतन्वत ।८। तत् सवित्रे प्राशित्रं परिजह्रुः ।९। तस्य पाणी

प्रचिच्छेद ।१०। तस्मै हिरण्मयौ प्रतिदधुः[2] ।११। तस्माद्धिरण्यपाणिरिति स्तुतः ।१२। तद् भगाय परिजह्रुः ।१३। तस्याक्षिणी निर्जघान ।१४। तस्मादाहुरन्धो भग इति ।१५। तत् पूष्णे परिजह्रुः ।१६। तस्य दन्तान् परोवाप ।१७। तस्मादाहुरदन्तकः पूषा करम्भभाग इति ।१८। ते देवा ऊचुः[3] ।१९ ।।8।।

[1] L. P. तदेतदशून्यं [2] L. (var.) प्रतिददुः [3] L. P. Here ends *Khaṇḍa* 13

इन्द्रो वै देवानामोजिष्ठो बलिष्ठस्तस्मा एनत् परिहरतेति ।१। तत् तस्मै परिजह्रुः ।२। तत् स ब्रह्मणा शमयांचकार ।३। तस्मादाहेन्द्रो ब्रह्मेति ।४। तत् प्रतीक्षते मित्रस्य त्वा चक्षुषा प्रतीक्ष इति ।५। मित्रस्यैवैनत् तच्चक्षुषा शमयति ।६। अथैनत् प्रतिगृह्णाति देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रति गृह्णामीति ।७। एताभिरेवैनत् तद् देवताभिः शमयति ।८। तद् व्यूह्य[1] तृणानि प्राग्दण्डं स्थण्डिले सादयति[2] पृथिव्यास्त्वा नाभौ सादयाम्यदित्या उपस्थ इति ।९। पृथिवी वा अन्नानां शमयित्री ।१०। शमयत्येवैनत् तत् ।११। तत आदाय प्राश्नात्यग्नेष्ट्वास्येन प्राश्नामीति ।१२। अग्निर्वा अन्नानां शमयिता ।१३। शमयत्येवैनत् तत् ।१४। अथापोऽन्वाचामति शान्तिरसीति ।१५। शान्तिर्वै भेषजमापः ।१६। शान्तिरेवैषा भेषजं[3] यज्ञे क्रियते ।१७ ।।9।।

[1] L. P. व्युह्य [2] L. P. निदधाति [3] L. P. भेषजमन्ततो

अथ प्राणान्त्संमृशते[1] ।१। तद् यदेवात्र प्राणानां क्रूरीकृतं यद् विलिष्टं तदेवैतदाप्याययति तद् भिषज्यति ।२। इन्द्रस्य त्वा जठरे सादयामीति नाभिमन्ततोऽभिमृशते[2] ।३। इन्द्रो ह्येवैनच्छमयांचकार[3] ।४। अथ यत् सावित्रेण जपेन प्रसौति ।५। सविता वै प्रसविता कर्मण एव प्रसवाय[4] ।६। प्रजापतिर्ह यज्ञं ससृजे ।७। सोऽग्न्याधेयेनैव रेतोऽसृजत ।८। देवान् मनुष्यानसुरानित्यग्निहोत्रेण ।९। दर्शपूर्णमासाभ्यामिन्द्रमसृजत ।१०। तेभ्य एतदन्नपानं ससृजे ।११। एतान् हविर्यज्ञान्त्सौम्यमध्वरमिति ।१२। अथो यं यं काममैच्छँस्तं तमेतैरयनैरापुः ।१३। अन्नाद्यमाग्रयणेन ।१४। तदाहुः कस्मादयनानीति ।१५। गमनान्येव भवन्ति कामस्य कामस्य स्वर्गस्य च लोकस्य ।१६ ।।10।।

[1] L. P. संमृशति [2] L. °भिमृशति; P. °भिमृशन्ति [3] L. P. °वैनत्तच्छम° [4] L. P. Here ends *Khaṇḍa* 14



चातुर्मास्यैराप्नुवन्त्स्वर्गाँल्लोकान्त्सर्वान् कामान्त्सर्वा अष्टीः[1] सर्वममृतत्वम् ।१। स एष प्रजापतिः[2] संवत्सरश्चतुर्विंशो यच्चातुर्मास्यानि ।२। तस्य मुखमेव[3] वैश्वदेवम् ।३। दर्शपूर्णमासौ पर्वाणि ।४। अहोरात्राण्यस्थिमज्जानानि[4] ।५। बाहू वरुणप्रघासाः ।६। प्राणोऽपानो व्यान इत्येतास्तिस्र इष्टयः ।७। आत्मा महाहविः ।८। या इमा अन्तर्देवतास्तदन्या इष्टीः[5] ।९। प्रतिष्ठा शुनासीर्यम्[6] ।१०। स एष प्रजापतिरेव संवत्सरश्चतुर्विंशो यच्चातुर्मास्यानि ।११। सर्वं वै प्रजापतिः संवत्सरश्चतुर्विंशः[7] ।१२। सर्वं चातुर्मास्यानि ।१३। तत् सर्वेण सर्वमाप्नोति य एवं वेद य एवं वेद[8] ।१४ ।।11।

[1] L. (var.), P. इष्टीः [2] L. P. प्रजापतिरेव [3] L. मुखमिव [4] L. P. °मज्जानि
[5] L. remarks 'so all the MSS.' [6] L. P. शुनासीरीयं [7] L. P. omit [8] L. P. Here ends *Khaṇḍa* 15

## इति प्रथमदशके षष्ठोऽध्यायः

वाग् दीक्षा ।१। वाचा हि दीक्षते ।२। प्राणो दीक्षितः ।३। वाचा वै दीक्षया देवाः प्राणेन दीक्षितेन सर्वान् कामानुभयतः परिगृह्यात्मन्नदधत ।४। तथो एवैतद् यजमानो वाचैव दीक्षया प्राणेन दीक्षितेन सर्वान् कामानुभयतः परिगृह्यात्मन् धत्ते ।५। आग्नावैष्णवमेकादशकपालं पुरोळाशं निर्वपति[1] ।६। अग्निर्वै देवनामवराध्यो विष्णुः परार्ध्यः ।७। तद् यश्चैव देवानामवराध्यो यश्च परार्ध्यः ।८। ताभ्यामेवैतत् सर्वा देवताः परिगृह्य सलोकतामाप्नोति ।९। तस्मात् कामं पूर्वो दीक्षित्वा संसुनुयात्[2] ।१०। पूर्वस्य ह्यस्य देवताः परिगृहीता भवन्ति ।११। अशरीराभिः प्राणदीक्षाभिर्दीक्षते ।१२ ॥1॥

[1] ER. निर्वपन्ति　　[2] L. P. संसनुयात्

प्राणा वै प्रयाजा अपाना अनुयाजाः ।१। तद् यत् प्रयाजानुयाजैश्चरन्ति ।२। तत् प्राणापाना दीक्षन्ते ।३। यद्धविषा तच्छरीरम् ।४। सोऽयं शरीरेणैव दीक्षमाणेन सर्वान् कामानाप्नोति ।५। प्राणापानैर्दीक्षमाणैः सर्वासां देवतानां सलोकतां सायुज्यम्[1] ।६। पञ्चदश सामिधेनीरन्वाह ।७। वज्रो वै सामिधेन्यः ।८। पञ्चदशो वै वज्रः ।९। वार्त्रघ्नावाज्यभागौ भवतः ।१०। वज्रो वार्त्रघ्नावाज्यभागौ ।११। त्रिष्टुभौ हविषो याज्यापुरोनुवाक्ये ।१२। वज्रस्त्रिष्टुप् ।१३। एतेन वै देवास्त्रिःसमृद्धेन वज्रेणैभ्यो लोकेभ्योऽसुराननुदन्त ।१४। तथो एवैतद् यजमान एतेनैव त्रिःसमृद्धेन वज्रेणैभ्यो लोकेभ्यो द्विषतो भ्रातृव्यान् नुदते ।१५। वज्रो वार्त्रघ्नावाज्यभागौ ता उक्तौ ।१६। अथातो हविषो याज्यापुरोनुवाक्ये ।१७। उप वां जिह्वा घृतमाचरण्यदित्यावती ।१८। तत् पुरोनुवाक्यारूपम् ।१९। प्रति वां जिह्वा घृतमुच्चरण्यदित्युद्वती ।२०। तद् याज्यारूपम् ।२१। त्रिष्टुभौ संयाज्ये ।२२। बलं वै वीर्यं त्रिष्टुप् ।२३। बलमेव तद् वीर्यं यजमाने दधाति ।२४ ॥2॥

[1] L. P. Here ends *Khaṇḍa* 1

आगुर उद्दृचमितीळायां च[1] सूक्तवाके चाह ।१। यदा वा आग्नावैष्णवः पुरोळाशो निरुप्यते ।२। अथैव दीक्षित इति ह स्माह ।३। तस्मादागुर उद्दृचमित्येव ब्रूयात् ।४। यथैव दीक्षितस्य न सूक्तवाके यजमानस्य नाम गृह्णाति ।५। देवगर्भो वा एष यद् दीक्षितः ।६। न वा अजातस्य गर्भस्य नाम कुर्वन्ति ।७। तस्मादस्य नाम न गृह्णाति[2] ।८। न वेदे पत्नीं वाचयति नैनं स्तृणाति ।९। असंस्थित इव वा अत्र यज्ञो यत् सौम्योऽध्वरः ।१०।



नेत् पुरा कालात् सौम्यमध्वरं संस्थापयानीति ।११।[3] तदाहुः कस्माद् दीक्षितस्याशनं नाश्नन्तीति ।१२। हविरेष भवति यद् दीक्षते ।१३। तद् यथा हविषोऽनवत्तस्याश्नीयादेवं तत् ।१४। कामं प्रसुतेऽश्नीयात् ।१५। तद् यथा हविषो यातयामस्याश्नीयादेवमु तत् ।१६। तदाहुः कस्माद् दीक्षितस्यान्ये नाम न गृह्णन्तीति ।१७। अग्निं वा आत्मानं दीक्षमाणोऽभिदीक्षते ।१८। तद् यदस्यान्ये नाम न गृह्णन्ति ।१९। नेदग्निमासीदामेति ।२०। यदु सोऽन्यस्य नाम न गृह्णाति ।२१। नेदेनमग्निभूतः[4] प्रदहानीति ।२२। यमेव द्विष्यात् ।२३। तस्य दीक्षितः सन् नाम ग्रसेतैव ।२४। तदेवैनमग्निभूतः[4] प्रदहति ।२५। अथ यमिच्छेत् ।२६ ॥3॥

[1] L. omits　　[2] L. P. Here ends *Khaṇḍa* 2　　[3] L. P. here read the passages VII. 3. १७ – VII. 4. ७ and after that VII. 3. १२ – १६　　[4] L. P. °मग्निर्भूतः

विचक्षणवत्या वाचा तस्य नाम[1] गृह्णीयात् ।१। सो तत्र प्रायश्चित्तिः ।२। चक्षुर्वै विचक्षणम् ।३। चक्षुषा हि विपश्यति ।४। एका[2] ह त्वेव व्याहृतिर्दीक्षितवादः सत्यमेव ।५। स यः सत्यं वदति ।६। स दीक्षित इति ह स्माह ।७। तदाहुः कस्माद् दीक्षितोऽग्निहोत्रं न जुहोतीति ।८। असुरा वा आत्मन्नजुहवुरुद्धातेऽनग्नौ[3] ।९। ते पराभवन्ननग्नौ जुह्वतः ।१०। अथ देवा इममेव प्राणमग्निमन्तरादधत ।११। तद् यत् सायं प्रातर्व्रतं प्रदीयते ।१२। अग्निहोत्रं हैवास्यैतदस्मिन्[4] प्राणेऽग्नौ संततमव्यवच्छिन्नं जुहोति[5] ।१३। एषाग्निहोत्रस्य संततिर्दीक्षासु ।१४। प्रोपसत्सु चरन्ति ।१५। का मीमांसा सुत्यायाम्[6] ।१६ ॥4॥

[1] P. adds न　　[2] L. P. एषा　　[3] BM¹. नाग्नौ (for अनग्नौ)　　[4] L. P. °स्यैतस्मिन्　　[5] L. P. हुतं भवति　　[6] L. P. Here ends *Khaṇḍa* 3

अथातः कैशिनी दीक्षा ।१। केशी ह दार्भ्यो दीक्षितो निषसाद ।२। तं ह हिरण्मयः शकुन आपत्योवाच ।३। अदीक्षितो वा असि दीक्षामहं वेद तां ते ब्रवाणि ।४। सकृदयजे तस्य क्षयाद् बिभेमि ।५। सकृदिष्टस्यो[1] हो त्वमक्षितिं वेत्थ तां त्वं मह्यमिति ।६। स ह तथेत्युवाच[2] ।७। तौ ह संप्रोचाते ।८। स ह स आस ।९। उलो वा वार्ष्णवृद्ध[3] इटन् वा काव्यः शिखण्डी वा याज्ञसेनः ।१०। यो वा स आस स स आस ।११। स होवाच ।१२ । शरीराणि वा एतयेष्ट्या दीक्षन्ते ।१३। या वा इमाः पुरुषे देवताः ।१४। यस्यैता दीक्षन्ते ।१५। स दीक्षित इति ह स्माह ।१६ ॥5॥

[1] L. P. °ष्टस्या　　[2] L. (var.) °त्योवाच　　[3] L. वार्ष्णिवृद्ध; P. वार्ष्णिवृद्ध

स यत्राध्वर्युरौद्ग्रभणानि जुहोति ।१। तदुप यजमानः पञ्चाहुतीर्जुहुयात् ।२। मनो मे मनसा दीक्षतां[1] स्वाहेति प्रथमाम् ।३। वाङ् मे वाचा दीक्षतां[1] स्वाहेति द्वितीयाम् ।४। प्राणो मे प्राणेन दीक्षतां[1] स्वाहेति तृतीयाम् ।५। मध्ये प्राणमाह ।६। मध्ये ह्ययं प्राणः ।७। चक्षुर्मे चक्षुषा दीक्षतां[1] स्वाहेति चतुर्थीम् ।८। श्रोत्रं मे श्रोत्रेण दीक्षतां[1] स्वाहेति पञ्चमीम् ।९। तदु ह स्माह कौषीतकिः ।१०। न होतव्याः ।११। अतिरिक्ता आहुतयः स्युर्यद्धूयेरन् ।१२। अध्वर्युमेव जुह्वतमन्वारभ्य प्रतीकैरनुमन्त्रयेत ।१३। मनो मे मनसा दीक्षतामिति[2] प्रथमाम् ।१४। वाङ् मे वाचा दीक्षतामिति[2] द्वितीयाम् ।१५। प्राणो मे प्राणेन दीक्षतामिति[2] तृतीयाम् ।१६। मध्ये प्राणमाह ।१७। मध्ये ह्ययं प्राणः ।१८। चक्षुर्मे चक्षुषा दीक्षतामिति[2] चतुर्थीम् ।१९। श्रोत्रं मे श्रोत्रेण दीक्षतामिति[2] पञ्चमीम् ।२०। दीक्षयत्यु हैवैता[3] याः पुरुषे देवताः ।२१। नो अतिरिक्ता आहुतयो हूयन्त इति ।२२। अथ खलु श्रद्धैव सकृदिष्टस्याक्षितिः ।२३। स यः श्रद्दधानो यजते ।२४। तस्येष्टं न क्षीयते ।२५। आपोऽक्षितिः ।२६। या इमा एषु लोकेषु याश्चेमा अध्यात्मम्[4] ।२७। स योऽम्मय्यक्षितिरिति[5] विद्वान् यजते ।२८। तस्येष्टं न क्षीयते ।२९। एतामु हैव तत् केशी[6] दाभ्यों हिरण्मयाय शकुनाय सकृदिष्टस्याक्षितिं प्रोवाच ।३०। अपराह्णे दीक्षते ।३१। अपराह्णे ह वा एष सर्वाणि भूतानि संवृङ्क्ते[7] ।३२। अपि ह वा एनं रजना[8] अतियन्ति ।३३। तस्माल्लोहितायन्निवास्तम्वेति[9] ।३४। एतम्वेवात्मानं दीक्षमाणोऽभिदीक्षते[10] ।३५। तद् यदपराह्णे[11] दीक्षते ।३६। सर्वेषामेव कामानामाप्त्यै[12] ।३७ ॥6॥

[1] P. दीक्षितां [2] P. दीक्षिता° [3] P. हि वै ता [4] L. (var.) अध्यात्मन् [5] L. यो मय्यक्षि°; P. यो मह्यक्षि° [6] P. adds ह [7] L. P. संपृङ्क्ते [8] L. रशना; (var.) रजना; wrongly reports IO. reading as रजता [9] L. °स्तमेति [10] L. P. add य एष तपति [11] L. P. तस्माद् (for तद् यद्) [12] L. P. Here ends *Khaṇḍa* 4

प्रायणीयेन वै देवाः प्राणमाप्नुवन्नुदयनीयेनोदानम् ।१। तथो एवैतद् यजमानः प्रायणीयेनैव[1] प्राणमाप्नोत्युदयनीयेनोदानम् ।२। तौ वा एतौ प्राणोदानावेव यत् प्रायणीयोदयनीये ।३। तस्माद् य एव प्रायणीयस्यर्त्विजस्त उदयनीयस्य स्युः ।४। समानौ हीमौ प्राणोदानौ[2] ।५। प्रायणीयेन ह वै देवाः स्वर्गँल्लोकमभिप्रयाय दिशो न प्रजज्ञुः ।६। तानग्निरुवाच ।७। मह्यमेकामाज्याहुतिं जुहुताहमेकां दिशं प्रज्ञास्यामीति ।८। तस्मा अजुहवुः ।९। स प्राचीं दिशं प्राजानात् ।१०। तस्मात् प्राञ्चमग्निं प्रणयन्ति ।११। प्राङ्[3] यज्ञस्तायते ।१२। प्राञ्च उ एवास्मिन्नासीना जुह्वति ।१३। एषा हि तस्य दिक् प्रज्ञाता ।१४। अथाब्रवीत् सोमः ।१५। मह्यमेकामाज्याहुतिं जुहुताहमेकां दिशं प्रज्ञास्यामीति ।१६। तस्मा अजु-



हवुः ।१७। स दक्षिणां दिशं प्राजानात् ।१८। तस्मात् सोमं क्रीतं दक्षिणा परिवहन्ति ।१९। दक्षिणा तिष्ठन्नभिष्टौति ।२०। दक्षिणा तिष्ठन् परिदधाति ।२१। दक्षिणो एवैनमासीना अभिषुण्वन्ति ।२२। एषा हि तस्य दिक् प्रज्ञाता ।२३। अथाब्रवीत् सविता ।२४। मह्यमेकामाज्याहुतिं जुहुताहमेकां दिशं प्रज्ञास्यामीति ।२५। तस्मा अजुहवुः ।२६। स प्रतीचीं दिशं प्राजानात् ।२७। तदसौ वै सविता योऽसौ तपति ।२८। तस्मादेतं[4] प्रत्यञ्चमेवाहरहर्यन्तं पश्यन्ति न प्राञ्चम् ।२९। एषा हि तस्य दिक् प्रज्ञाता ।३०। अथाब्रवीत् पथ्या स्वस्तिः ।३१। मह्यमेकामाज्याहुतिं जुहुताहमेकां दिशं प्रज्ञास्यामीति ।३२। तस्या अजुहवुः ।३३। सोदीचीं दिशं प्राजानात् ।३४। वाग् वै पथ्या स्वस्तिः ।३५। तस्मादुदीच्यां दिशि प्रज्ञाततरा वागुद्यते ।३६। उदञ्च उ एव यन्ति वाचं शिक्षितुम् ।३७। यो वा तत आगच्छति ।३८। तस्य वा शुश्रूषन्त इति ह स्माह ।३९। एषा हि वाचो दिक् प्रज्ञाता ।४० ॥7॥

[1] IO. प्रायणीयेन वै [2] ER. प्राणापानौ; L. P. Here ends *Khaṇḍa* 5 [3] L. P. प्राग् [4] L. P. °देनं

अथाब्रवीददितिः ।१। मह्यमेकामन्नाहुतिं[1] जुहुताहमेकां दिशं प्रज्ञास्यामीति ।२। तस्या अजुहवुः ।३। सोर्ध्वां दिशं प्राजानात् ।४। इयं वा अदितिः ।५। तस्मादस्यामूर्ध्वा ओषधय ऊर्ध्वा वनस्पतय ऊर्ध्वा मनुष्या उत्तिष्ठन्ति ।६। ऊर्ध्वोऽग्निर्दीप्यते ।७। यदस्यां किंचोर्ध्वमेव तदायत्तम् ।८। एषा हि तस्यै दिक् प्रज्ञाता[2] ।९। एवं वै देवाः प्रायणीयेन स्वर्गँल्लोकं प्राजानन् ।१०। तथो एवैतद् यजमान एवमेव[3] प्रायणीयेनैव स्वर्गँल्लोकं प्रजानाति ।११। ते समे स्यातां प्रायणीयोदयनीये ।१२। देवरथो वा एष यद् यज्ञः ।१३। तस्यैते[4] पक्षसी यत् प्रायणीयोदयनीये ।१४। ते यः समे कुरुते ।१५। यथोभयतःपक्षसा रथेनोग्रवाहणेन[5] धावयन्नध्वानं यत्राकूतं समश्नुवीत ।१६। एवं स स्वस्ति स्वर्गँल्लोकं समश्नुते ।१७। अथ यो विषमे कुरुते ।१८। यथान्यतरतःपक्षसा[6] रथेनोग्रवाहणेन[5] धावयन्नध्वानं यत्राकूतं न समश्नुवीत ।१९। एवं स न स्वस्ति स्वर्गँल्लोकं समश्नुते ।२०। तस्मात् समे एव स्यातां प्रायणीयोदयनीये ।२१ ॥8॥

[1] L. P. °मन्नस्याहुतिं [2] L. P. Here ends *Khaṇḍa* 6 [3] L. P. omit [4] L. P. तस्य हैते [5] L. P. omit उग्रवाहणेन [6] ER. °थान्यतःप°

शंय्वन्तं प्रायणीयं शंय्वन्तमुदयनीयम्[1] ।१। पथ्यां स्वस्तिं प्रथमां प्रायणीये यजति ।२। अथाग्निमथ सोममथ सवितारमथादितिम् ।३। स्वर्गं वै लोकं प्रायणीयेनाभिप्रैति ।४।

तद् यत् पुरस्तात् पथ्यां स्वस्तिं[1] यजति ।५। स्वस्त्ययनमेव तत् कुरुते स्वर्गस्य लोकस्य समष्ट्यै ।६। अग्निं प्रथममुदयनीये यजति ।७। अथ सोममथ सवितारमथ पथ्यां स्वस्ति-मथादितिम् ।८। इमं वै लोकमुदयनीयेन प्रत्येति ।९। तद् यत् परस्तात् पथ्यां स्वस्तिं यजति ।१०। स्वस्त्ययनमेव तत् कुरुतेऽस्य लोकस्य समष्ट्यै ।११। ता वै पञ्च देवता यजति ।१२। ताभिर्यत् किंच पञ्चविधमधिदैवतमध्यात्मं तत् सर्वमाप्नोति ।१३। तासां याज्यापुरोनुवाक्याः ।१४। ता वै स्वस्तिमत्यः पथिमत्यः पारितवत्यः प्रवत्यो नीतवत्यो भवन्ति ।१५। मरुतो ह वै देवविशोऽन्तरिक्षभाजना ईश्वरा यजमानस्य स्वर्गँल्लोकं यतो यज्ञपेशसं[2] कर्तोः ।१६। तद् यत् स्वस्तिमत्यः पथिमत्यः पारितवत्यः प्रवत्यो नीतवत्यो भवन्ति ।१७। नैनं मरुतो देवविशो हिंसन्ति ।१८। स्वस्ति स्वर्गँल्लोकं समश्नुते ।१९ ॥9॥

¹ L. P. Here ends *Khaṇḍa* 7     ² L. P. यज्ञवैशसं

ता वै विपर्यस्यति।१। याः प्रायणीयायां पुरोनुवाक्यास्ता उदयनीयायां याज्याः करोति ।२। या याज्यास्ताः पुरोनुवाक्याः[1] ।३। प्रेव वा एषोऽस्माल्लोकाच्च्यवते यः प्रायणीये-नाभिप्रैति ।४। तद् यद् विपर्यस्यति ।५। तदस्मिँल्लोके प्रतितिष्ठति ।६। प्रतिष्ठायाम-प्रच्युत्याम् ।७। अथो प्राणा वै छन्दांसि ।८। प्राणानेव तदात्मन् व्यतिषजत्यविवर्हाय[2] ।९। तस्माद्धीमे प्राणा [3–]विष्वञ्चो वान्तो न निर्वान्ति[–3] ।१०। त्वां चित्रश्रवस्तम यद् वाहिष्ठं तदग्नय इत्यनुष्टुभौ संयाज्ये ।११। ततिर्वै यज्ञस्य प्रायणीयम्[4] ।१२। वागनुष्टुप् ।१३। वाचा यज्ञस्तायते ।१४। नैते विपर्यस्यति ।१५। प्रतिष्ठे वै संयाज्ये ।१६। नेत् प्रतिष्ठे व्यतिषजानीति ।१७ ॥10॥

¹ L. P. Here ends *Khaṇḍa* 8     ² L. ०विबर्हाय; P. ०वबर्हाय     ³⁻³ L. (var.) विष्वञ्चो-वाञ्चोनुनिर्वाञ्चि (all MSS. excepting IO.); P. विष्वञ्चोऽवाञ्चोऽनुनिर्वाञ्चि     ⁴ L. P. add वागुदयनीयं

शंय्वन्तं भवति ।१। अभिक्रान्त्यै तद् रूपम् ।२। तद् यथोपप्रयाय स्वर्गस्य लोकस्य नेदीयस्तायां वसेदेवं तत् ।३। यद्धेव शंय्वन्तं भवति ।४। सर्वा ह वै देवताः प्रायणीये संगच्छन्ते ।५। स योऽत्र पत्नीः संयाजयेत् ।६। यथा संगतं[1] भूमानं देवानां पत्नीरभ्यवन-येदेवं तत् ।७। यस्तं तत्र ब्रूयात् ।८। संगतां[2] वा अयं भूमानं देवानां पत्नीरभ्यवानैषीत् ।९। सभामस्य पत्न्यभ्यवैष्यतीति तथा ह स्यात् ।१०। तस्मादु शंय्वन्तं भवति ।११।



देवतानामसमराय[3] ।१२। असुरा वा अस्यां दिशि [4–]देवान्त्समरुन्धन् येयं[–4] प्राच्युदीची ।१३। त एतस्यां दिशि सन्तः सोमं राज्यायाभ्यषिञ्चन्त ।१४। ते सोमेन राज्ञेभ्यो लोकेभ्योऽसुराननुदन्त ।१५। तथो एवैतद् यजमानः सोमेनैव राज्ञेभ्यो लोकेभ्यो द्विषतो भ्रातृव्यान् नुदते ।१६ ॥11॥

¹ L. P. संगतां     ² All MSS. read so     ³ L. P. Here ends *Khaṇḍa* 9
⁴⁻⁴ L. (var.), P. ०रुन्धन्नेयं

तं वै चतुर्भिः क्रीणाति गवा चन्द्रेण वस्त्रेण छागया ।१। आ चतुरं वै द्वन्द्वं मिथुनं प्रज-ननं प्रजात्यै ।२। तदसौ वै सोमो राजा विचक्षणश्चन्द्रमाः ।३। स इमं क्रीतमेव प्रविशति ।४। तद् यत् सोमं राजानं क्रीणाति ।५। असौ वै सोमो राजा विचक्षणश्चन्द्रमा अभिषु-तोऽसदिति ।६। तस्मै क्रीताय नवान्वाह ।७। नवेमे प्राणाः ।८। प्राणानेव तद् यजमाने दधाति ।९। सर्वायुत्वायास्मिँल्लोके ।१०। अमृतत्वायामुष्मिन् ।११। भद्रादभि श्रेयः प्रेहीति प्रवतीं प्रवर्त्यमानायान्वाह ।१२। बृहस्पतिः पुरएता ते अस्त्विति ।१३। ब्रह्म वै बृहस्पतिः।१४। ब्रह्मयशसस्यावरुद्ध्यै।१५। इमां धियं शिक्षमाणस्य देव वनेषु व्यन्तरिक्षं ततानेति त्रिष्टुभौ वारुण्यावन्वाह ।१६। क्षत्रं वै त्रिष्टुप् ।१७। क्षत्रं[1] वरुणः ।१८। क्षत्रयश-सस्यावरुद्ध्यै ।१९। सोम यास्ते मयो भुव इति चतस्रो गायत्रीः सौमीरन्वाह ।२०। ब्रह्म वै गायत्री ।२१। क्षत्रं सोमः ।२२। ब्रह्मयशसस्य च क्षत्रयशसस्य चावरुद्ध्यै ।२३। तासामुत्तमाया[2] अर्धर्चमुक्त्वोपरमति ।२४। अमृतं वा ऋक् ।२५। अमृतं तत् प्रविशति ।२६। अथो ब्रह्म वा ऋक् ।२७। उभयत एव तद् ब्रह्मार्धर्चौ[3] वर्म कुरुते ।२८। तद् यत्र क्वचार्धर्चेनोपरमेत्[4] ।२९। एतद्ब्राह्मणमेव तत् ।३०। या ते धामानि हविषा यजन्तीति प्रवतीं प्रपाद्यमानायान्वाह ।३१। आगन् देव ऋतुभिर्वर्धतु क्षयमित्यागतवत्यर्तुमत्या परि-दधाति ।३२। संवत्सरो वै सोमो राजेति ह स्माह कौषीतकिः ।३३। सोऽभ्यागच्छन्नृतु-भिरेव सहाभ्येतीति ।३४। अभिरूपा अन्वाह ।३५। यद् यज्ञेऽभिरूपं तत् समृद्धं यज्ञस्यैव समृद्ध्यै ।३६। ता वै नवान्वाह ।३७। तासामुक्तं ब्राह्मणम् ।३८। त्रिः प्रथमया त्रिरुत्त-मया त्रयोदश संपद्यन्ते ।३९। द्वादश वै मासाः संवत्सरः ।४०। संवत्सरस्यैवाप्त्यै[5] ।४१। अस्ति त्रयोदशो मासः ।४२। उपचरो विज्ञात इव तस्याप्त्यै तस्याप्त्यै[6] ।४३ ॥12॥

¹ P. adds वै     ² L. P. omit तासाम्     ³ P. ०र्धर्चौ     ⁴. L. P ०र्धर्चेन वा पादेन वोपरमेत
⁵ L. P. add अथ यत्त्रयोदशीमन्वाह     ⁶ L. P. Here ends *Khaṇḍa* 10

## इति प्रथमदशके सप्तमोऽध्यायः

आतिथ्येन ह वै देवा द्विपदश्च चतुष्पदश्च पशूनापुः[1] ।१। तथो एवैतद् यजमान आतिथ्येनैव द्विपदश्च[2] चतुष्पदश्च पशूनाप्नोति ।२। आसन्ने हविष्यातिथ्येऽग्निं मन्थन्ति ।३। शिरो वा एतद् यज्ञस्य यदातिथ्यम् ।४। प्राणोऽग्निः ।५। शीर्षँस्तत् प्राणं दधाति ।६। द्वादशाग्निमन्थनीया अन्वाह ।७। द्वादश वै मासाः संवत्सरः ।८। संवत्सरस्यैवाप्त्यै ।९। अभि त्वा देव सवितरिति सावित्रीं प्रथमामन्वाह ।१०। सवितृप्रसूततायै ।११। सवितृप्रसूतस्य ह वै न काचन रिष्टिर्भवत्यरिष्ट्यै ।१२। मही द्यौः पृथिवी च न इति द्यावापृथिवीयामन्वाह ।१३। प्रतिष्ठे वै द्यावापृथिवी प्रतिष्ठित्या एव ।१४। त्वामग्ने पुष्करादधीति मथितवन्तं तृचं मथ्यमानायान्वाह ।१५। उत ब्रुवन्तु जन्तव इति जातवतीं जाताय ।१६। आ यं हस्ते न खादिनमिति हस्तवतीं हस्तेन धार्यमाणाय ।१७। प्र देवं देववीतय इति प्रवतीं प्रह्रियमाणाय ।१८। आ जातं जातवेदसीत्यावतीमाहूयमानाय ।१९। अग्निनाग्निः समिध्यते त्वं ह्यग्ने अग्निनेति समिद्धवत्यौ समिध्यमानाय ।२०। तं मर्जयन्त सुक्रतुमिति परिदधाति स्वेषु क्षयेषु वाजिनमित्यन्तवत्या ।२१। अन्तो वै क्षयः ।२२। अन्तः परिधानीया ।२३। अन्तेऽन्तं दधाति ।२४ ।।1।।

[1] ER. पशूनाप्नुवन्ति (seems to be an error)  [2] IO. omits च

[1-]एतया न्वत्र च चातुर्मास्येषु च[-1] ।१। त्रिः प्रथमया त्रिरुत्तमया षोळश संपद्यन्ते ।२। षोळशकलं वा इदं सर्वम् ।३। अस्यैव सर्वस्याप्त्यै[2] ।४। अथ यत्र पशुरालभ्यते ।५। तदेतां पराचीमनूच्य यज्ञेन यज्ञमयजन्त देवा इति त्रिष्टुभा परिदधाति ।६। त्रैष्टुभाः पशवः पशूनामेवाप्त्यै ।७। त्रिः प्रथमया त्रिरुत्तमया सप्तदश संपद्यन्ते ।८। सप्तदशो वै प्रजापतिः ।९। एतद् वा आर्ध्नुकं[3] कर्म यत् प्रजापतिसंमितम् ।१०। सप्तदश सामिधेनीरन्वाह ।११। सप्तदशो वै प्रजापतिः ।१२। एतद् वा आर्ध्नुकं[3] कर्म यत् प्रजापतिसंमितम् ।१३। वार्त्रघ्नावाज्यभागौ भवतः पाप्मन एव वधाय ।१४। अथो हास्य पौर्णमासात् तन्त्रादनितं भवति ।१५। अतिथिमन्तौ हैके कुर्वन्ति ।१६। वार्त्रघ्नौ त्वेव स्थितौ ।१७। ऋग्याज्यौ स्यातामिति हैक आहुः ।१८। ऋग्याज्या वा एता देवता उपसत्सु भवन्तीति वदन्तः ।१९। जुषाणयाज्यौ त्वेव स्थितौ ।२०। सोमं सन्तं विष्णुरिति[4] यजति ।२१। तद् यदेवेदं क्रीतो विशतीव ।२२। तदु हैवास्य वैष्णवं रूपम् ।२३। यद्वेव सोमं सन्तं विष्णुरिति[4] यजति ।२४। अत्तैवैतेन[5] नाम्ना यद् विष्णुरिति ।२५। आद्योऽमुना यत् सोम इति ।२६।



तस्मात् सोम इति वदन्तो जुह्वत्येवं भक्षयन्ति ।२७। त्रिष्टुभौ हविषो याज्यापुरोनुवाक्ये ।२८। बलं वै वीर्यं त्रिष्टुप् ।२९। बलमेव तद् वीर्यं यजमाने दधाति ।३० ।।2।।

[1-1] L. P. This sentence occurs after सर्वस्याप्त्यै (VIII. 2. ४) and forms the beginning of *Khaṇḍa* 2  [2] L. P. Here ends *Khaṇḍa* 1  [3] L. P.आर्धुकं  [4] L. P. विष्णुमिति  [5] L. P. अत्रैवैतेन

होतारं चित्ररथमध्वरस्य यस्त्वा स्वश्वः सुहिरण्यो अग्न इति संयाज्ये अतिथिमत्यौ रथवत्यौ त्रिष्टुभावाग्नेय्यौ ।१। तद् यथा चतुःसमृद्धमेवं तत् ।२। उपनामुक उ एवैनं रथो भवति य एते कुरुते ।३। इळान्तं भवति ।४। अभिक्रान्त्यै तद् रूपम् ।५। तद् यथोपप्रयाय स्वर्गस्य लोकस्य नेदीयस्तायां वसेदेवं तत् ।६। उपांशुहविष एता इष्टयो भवन्ति दीक्षणीयाप्रायणीयातिथ्योपसदः ।७। रेतःसिक्तिर्वा एता इष्टयः ।८। उपांशु वै रेतः सिच्यते ।९। उत्सृजन्तः कर्माणि यन्ति ।१०। पत्नीसंयाजान्ता दीक्षणीया ।११। शंय्वन्ता प्रायणीया ।१२। इळान्तातिथ्या ।१३। देवता उपसत्सु प्रतियजति ।१४। उत्सर्गं वै प्रजापतिरेतैः कर्मभिः स्वर्गँल्लोकमैत् ।१५। तथो एवैतद् यजमान उत्सर्गमेवैतैः कर्मभिः स्वर्गँल्लोकमेति[1] ।१६ ।।3।।

[1] L. P. Here ends *Khaṇḍa* 2

शिरो वा एतद् यज्ञस्य यन्महावीरः ।१। तन्न प्रथमयज्ञे प्रवृञ्ज्यात् ।२। उपनामुक उ एवैनमुत्तरो यज्ञो भवति यः प्रथमयज्ञे न प्रवृणक्ति ।३। कामं तु योऽनूचानः श्रोत्रियः स्यात् तस्य प्रवृञ्ज्यात् ।४। आत्मा वै स यज्ञस्य ।५। आत्मनैव तद् यज्ञं समर्धयति ।६। तदसौ वै महावीरो योऽसौ तपति ।७। एतमेव तत् प्रीणाति ।८। तमेकशतेनाभिष्टुयात् ।९। शतयोजने ह वा एष हितस्तपति[1] ।१०। स शतेनैवैनं[2] शतयोजनमध्वानं समश्नुते ।११। अथ यैकशततमी स यजमानलोकः ।१२। तमेतमात्मानं यजमानोऽभिसंभवति ।१३। यमेतमादित्ये पुरुषं वेदयन्ते ।१४। स इन्द्रः स प्रजापतिस्तद् ब्रह्म ।१५। तदत्रैव यजमानः सर्वासां देवतानां सलोकतां सायुज्यमाप्नोति ।१६ ।।4।।

[1] L. P. इतस्तपति  [2] L. शतेनैवैतं; P. शतेनैव तं

अनवानमभिष्टुयात् प्राणानां संतत्यै ।१। संतता इव हीमे प्राणाः ।२। उच्चैर्निरुक्तमभिष्टुयात् ।३। प्राणा वै स्तुभः[1] ।४। निरुक्तो ह्येषः ।५। वाग्देवत्यो ह्येषः ।६। सावि-

त्रीः प्रथमा[2] अभिष्टौति ।७। सवितृप्रसूततायै ।८। सवितृप्रसूतस्य ह वै न काचन रिष्टिर्भवत्यरिष्ट्यै[3] ।९। ब्रह्म जज्ञानं प्रथमं पुरस्तादिति ।१०। अदो वै ब्रह्म जज्ञानं प्रथमं पुरस्तात् ।११। यत्रासौ तपति ।१२। तदेव तद् यजमानं दधाति ।१३। अञ्जन्ति यं प्रथयन्तो न विप्राः संसीदस्व महाँ असीत्यक्तवतीं च सन्नवतीं चाभिरूपे अभिष्टौति ।१४। भवा नो अग्ने सुमना उपेतौ तपो ष्वग्ने अन्तराँ अमित्रान् यो नः सनुत्यो अभिदासदग्न इति तिस्रस्तपस्वतीरभिरूपा अभिष्टौति ।१५। यद् यज्ञेऽभिरूपं तत् समृद्धं यज्ञस्यैव समृद्ध्यै ।१६। कृणुष्व पाजः प्रसितिं न पृथ्वीमिति राक्षोघ्नीरभिष्टौति रक्षसामपहत्यै ।१७। अग्निर्वै रक्षसामपहन्ता ।१८। ता वै पञ्च भवन्ति दिशां रूपेण ।१९। दिग्भ्य एवैतानि संनिर्हन्ति[4] ।२०। अथो यानेवाध्वर्युः प्रादेशानभिमिमीते[5] तानेवैताभिरनुवदति ।२१। परि त्वा गिर्वणो[6] गिरोऽधि द्वयोरदधा उक्थ्यं वच इत्यैन्द्र्यावभिरूपे अभिष्टौति ।२२। ऐन्द्रमेव स्वाहाकारमेताभ्यामनुवदति ।२३ ॥5॥

[1] L. स्तवः [2] P. प्रथमाम् [3] L. P. Here ends *Khaṇḍa* 3 [4] L. P. तन्निर्हन्ति
[5] IO. प्रदेशा° [6] L. गिर्वण

अथो यानेवाध्वर्युः शकलान् परिचिनोति तान् पूर्वयानुवदति ।१। यमुत्तममभि निदधाति तमुत्तरया ।२। शुक्रं ते अन्यद् यजतं ते अन्यदर्हन् बिभर्षि सायकानि धन्वेति पौष्णीं च रौद्रीं चाभिरूपे अभिष्टौति ।३। पौष्णं चैव रौद्रं च स्वाहाकारमेताभ्यामनुवदति[1] ।४। अथो यावेवाध्वर्युः सुवर्णरजतौ हिरण्यशकलौ करोति तावेवैताभ्यामनुवदति[2] ।५। पतङ्गमक्तमसुरस्य माययेति ।६। प्राणो वै पतङ्गः ।७। वायुर्वै प्राणः ।८। वायव्यमेव स्वाहाकारमेताभिरनुवदति ।९। अपश्यं त्वा मनसा चेकितानमित्येतदस्यायतने प्रजाकामस्याभिष्टुयात् ।१०। अथो उभे असंपन्नकारी[3] ।११। स्रक्के द्रप्सस्य धमतः समस्वरन्निति सर्वम् ।१२। पवित्रं ते विततं ब्रह्मणस्पत इति द्वे ।१३। वि यत् पवित्रं धिषणा अतन्वतेत्येका ।१४। ता द्वादश पावमान्यः ।१५। सौम्यमेव स्वाहाकारमेताभिरनुवदति ।१६। अयं वेनश्चोदयत् पृश्निगर्भा इति ।१७। इन्द्रो[4] वै वेनः ।१८। ऐन्द्रमेव स्वाहाकारमेताभिरनुवदति ।१९। तस्यैकामुत्सृजति नाके सुपर्णमुप यत् पतन्तमिति ।२०। सोऽयमात्मनोऽतीकाशः ।२१। तामुत्तरासु करोति ।२२। तेनो सानन्तरिता[5] भवति ।२३। उभयतो वेनं पापोक्तस्य पावमानीरभिष्टुयात् ।२४। आत्मा वै वेनः ।२५। पवित्रं[6] पावमान्यः ।२६। पुनात्येवैनं तत् ।२७ ॥6॥

[1] L. P. स्वाहाकारावेताभ्या° [2] ER. तावेताभ्या° [3] L. P. Here ends *Khaṇḍa* 4
[4] L. P. इन्द्र उ [5] L. P. °नन्तर्हिता [6] L. P. adds वै



गणानां त्वा गणपतिं हवामह इति ब्राह्मणस्पत्या अभिरूपा अभिष्टौति ।१। शिरो वा एतत् ।२। ब्रह्म वै ब्रह्मणस्पतिः ।३। ब्रह्मणैव तच्छिरः समर्धयति ।४। स यत्रोपाधिगच्छेद् बृहद् वदेम विदथे सुवीरा इति ।५। तद् वीरकामायै वीरं ध्यायात् ।६। लभते ह वीरम् ।७। का राधद्धोत्राश्विना वामिति नवाकूध्रीच्यः ।८। गायत्रच्छन्दस इव वा अकूध्रीच्यः ।९। गायत्र उ वै प्राणः ।१०। प्राणो वा अकूध्रीच्यः ।११। आ नो विश्वाभिरूतिभिरित्यानुष्टुभं तृचं सा वाक् ।१२। विष्णुर्योनिं कल्पयत्वित्येतदस्यायतने प्रजाकामस्याभिष्टुयात् ।१३। अथो उभे असंपन्नकारी[1] ।१४। प्रातर्यावाणा प्रथमा यजध्वमिति पूर्वाह्णे सूक्तम् ।१५। आ भात्यग्निरुषसामनीकमित्यपराह्णे ।१६। त्रैष्टुभे पञ्चर्चे तच्चक्षुः ।१७। ईळे द्यावापृथिवी पूर्वचित्तय इति जागतं पञ्चविंशं तच्छ्रोत्रम् ।१८। शिरो वा एतत् ।१९। तद् वै शिरः समृद्धं यस्मिन् प्राणो वाक् चक्षुः श्रोत्रमिति ।२०। तानेवास्मिंस्तद् दधाति ।२१। रुचितो घर्म इत्युक्तेऽरूरुचदुषसः पृश्निरग्रिय इति रुचितवतीमभिरूपामभिष्टौति ।२२। द्युभिरक्तुभिः परि पातमस्मानिति परिवत्या परिदधाति ।२३। अभिरूपा अभिष्टौति ।२४। यद् यज्ञेऽभिरूपं तत् समृद्धं यज्ञस्यैव समृद्ध्यै ।२५। ता एकशतमृचो भवन्ति तासामुक्तं ब्राह्मणम् ।२६ ॥7॥

[1] L. P. Here ends *Khaṇḍa* 5

[1]त्रयस्त्रिंशदुत्तराः ।१। [2–]त्रयस्त्रिंशद् वै सर्वा[–2] देवताः ।२। ता एवैतदुद्यन्तुमर्हन्ति ।३। ताभ्यो वै तत् समुन्नीतम्[3] ।४। अभिरूपा दोहनीया अभिष्टौति ।५। यद् यज्ञेऽभिरूपं तत् समृद्धं यज्ञस्यैव समृद्ध्यै ।६। आ सुते सिञ्चत श्रियमा नूनमश्विनोर्ऋषिरित्यासिक्तवत्यावभिरूपे अभिष्टौति ।७। उदु ष्य देवः सविता हिरण्ययेत्युद्यम्यमान उद्यतवतीमभिरूपामभिष्टौति ।८। प्रैतु ब्रह्मणस्पतिरिति प्रव्रजत्सु प्रवतीं ब्राह्मणस्पत्यामभिरूपामभिष्टौति ।९। नाके सुपर्णमुप यत् पतन्तमिति व्रजत्सु पतन्तमित्यभिरूपामभिष्टौति[4] ।१०। द्वाभ्यां यजेत् ।११। द्वन्द्वं वै वीर्यं सवीर्यतायै[5] ।१२। त्रिष्टुब्वतीभ्यां पूर्वाह्णे ।१३। त्रैष्टुभो ह्येषः ।१४। त्रीँल्लोकाँस्तब्ध्वा तिष्ठति ।१५। जगद्वतीभ्यामपराह्णे ।१६। जागतो ह्येषः ।१७। एतमु ह विशन्तं जगदनु सर्वं विशति ।१८। विपर्यस्य[6] दाशतयीभ्यां वषट्कुर्यादिति हैक आहुः ।१९। यथाम्नातमिति त्वेव स्थितम् ।२०। अथोत्तरा अभिरूपा अभिष्टौति ।२१। यद् यज्ञेऽभिरूपं तत् समृद्धं यज्ञस्यैव समृद्ध्यै ।२२। हविर्हविष्मो महि सद्म दैव्यमिति पुराहुतेः प्रापणात् ।२३। पुनर्हविषमेवैनं तदयातयामानं करोति ।२४। सूयवसाद् भगवती हि भूया इत्याशीर्वत्या परिदधाति ।२५। पशुभ्य एव तदाशिषं वदते ।२६। तथा ह यजमानात्

पशवोऽनुत्क्रामुका भवन्ति[7] ।२७। अथ वै सुते प्रवर्ग्य इत्याचक्षते स्तुते बहिष्पवमाने ।२८। तदश्विनौ देवा उपाह्वयन्त ।२९। एतस्मिन् काल आग्नीध्रिये[8] प्रवृञ्ज्युः ।३०। तद् यथैवाद उपसत्सु ।३१। एवमेवाप्यत्र सुत्यायाम् ।३२। अनवानमेवोपचारः ।३३। तद् यदा[9] कर्मापवृज्येत[10] ।३४। अथ पशुकर्म तायते ।३५। स एष महावीरो मध्यंदिनोत्सर्गः ।३६। तद् यदेतेन मध्यंदिने प्रचरन्ति ।३७। असौ वै महावीरो योऽसौ तपति ।३८। एतमेव तत् प्रीणाति[11] ।३९। एतस्यैव तद् रूपं क्रियते[12] ।४० ॥8॥

[1] L. P. add अथ यदप उपस्पृशति शान्तिर्वै भेषजमापः शान्तिरेवैषा भेषजमन्ततो यज्ञे क्रियतेऽथ यदवकाशैरुपतिष्ठते प्राणा वा अवकाशाः प्राणानेव तदात्मन्धत्तेऽथ यदप उपस्पृशति शान्तिर्वै भेषजमापः शान्तिरेवैषा भेषजमन्ततो यज्ञे क्रियते [2–2] IO. त्रयास्त्रिंशस्सर्वा [3] L. P. Here ends *Khaṇḍa* 6 [4] P. °त्यभिरूपा अभि° [5] L. (var.) सुवीर्यतायै [6] L. (var.), P. विपर्यस्यति [7] L. P. add अथ यदप उपस्पृशति शान्तिर्वै भेषजमापः शान्तिरेवैषा भेषजमन्ततो यज्ञे क्रियते [8] L. P. आग्नीध्रीये [9] L. P. यथा [10] P. कर्माप्रवृज्यते [11] L. P. प्रीणन्ति [12] L. P. Here ends *Khaṇḍa* 7

उपसदः ।१। असुरा एषु लोकेषु पुरोऽकुर्वत ।२। अयस्मयीमस्मिन् ।३। रजतामन्तरिक्षलोके ।४। हरिणीं हादो[1] दिवि चक्रिरे ।५। ते देवाः परिश्रितेष्वेषु[2] लोकेष्वेतं पञ्चदशं वज्रमपश्यन् ।६। तिस्रः सामिधेन्यः समनूक्ता नव संपद्यन्ते ।७। षड् याज्यापुरोनुवाक्याः ।८। ताः पञ्चदश ।९। एतेन वै देवाः पञ्चदशेन वज्रेणैभ्यो लोकेभ्योऽसुराननुदन्त ।१०। तथो एवैतद् यजमान एतेनैव पञ्चदशेन वज्रेणैभ्यो लोकेभ्यो द्विषतो भ्रातृव्यान् नुदते ।११। उपसद्याय मीळ्हुष इत्येतं तृचं पूर्वाह्णेऽनुब्रूयात् ।१२। उपसदो ह्येताः ।१३। तद् वै कर्म समृद्धं यत् प्रथमेनाभिव्याह्रियते ।१४। उपसद्यमिव वा एतदहरमुनादित्येन भवतीति ।१५। इमां मे अग्ने समिधमित्यपराह्णे तद् रात्रे रूपम् ।१६। समिद्धमिव वा इममग्निं सायं पर्यासत इति ।१७। अथ द्वितीयेऽहनि ।१८। इमां मे अग्ने समिधमिति पूर्वाह्णे तदह्नो रूपम् ।१९। समिद्धमिव वा एतदहरमुनादित्येन भवतीति ।२०। उपसद्याय मीळ्हुष इत्यपराह्णे तद् रात्रे रूपम् ।२१। उपसद्यमिव वा इममग्निं सायं पर्यासत इति ।२२। ते वा[3] उभे एव रूपे यज्ज्ञायेते[4] ।२३। तस्मादहरहर्विपर्यासमनुब्रूयात् ।२४। उभे रूपे उभौ कामा उपाप्तावसतामिति[5] ।२५ ॥9॥

[1] IO. हातो; BM¹. हायौ [2] L. (var.) परिस्तृतेष्वेषु, परिस्वृतेष्वेषु; P. परिश्रुतेष्वेषु [3] L. P. add एते [4] L. P. ज्ञायेते [5] L. P. उपाप्तावसत इति



अनवानमनुब्रूयात् प्राणानां संतत्यै ।१। संतता इव हीमे प्राणाः ।२। त्रिस्त्रिरेकैकामन्वाह[1] ।३। त्रयो वा इमे लोकाः ।४। इमानेव तल्लोकानाप्नोति ।५। ताः समनूक्ता नव संपद्यन्ते ।६। षड् वा ऋतवस्त्रय इमे लोकाः ।७। एतदेव तदभिसंपद्यन्ते ।८। नैतं निगदं ब्रूयाद् य एष[2] सामिधेनीषु ।९। उत्सृज्यन्ते ह निगदाः ।१०। जामि ह स्याद् य एतं निगदं ब्रूयात् ।११। नावाहयेच्चनेति[3] हैक आहुः ।१२। किमु देवतामनावाह्य यजेदिति ।१३। ऋच एवावाहयेत् ।१४। अग्निमा वह सोममा वह विष्णुमा वहेति ।१५। ता वै तिस्रो देवता यजति ।१६। त्रयो वा इमे लोकाः ।१७। इमानेव तल्लोकान् ज्योतिष्मतः करोति[4] ।१८ ॥10॥

[1] L. P. °कामनुब्रूयात् [2] L. (var.) एषु, in all MSS. except IO. [3] L. °च्चनेदिति; L. (var.), P. °च्चनेहिति [4] L. P. Here ends *Khaṇḍa* 8

गायत्र्यावाग्नेय्यौ ।१। गायत्रोऽयँल्लोकः ।२। तदिमँल्लोकमाप्नोति ।३। त्रिष्टुभौ सौम्यौ ।४। त्रैष्टुभोऽन्तरिक्षलोकः ।५। तदन्तरिक्षलोकमाप्नोति ।६। जगत्यौ वैष्णव्यौ ।७। जागतोऽसौ लोकः ।८। तदमुँल्लोकमाप्नोति ।९। ता वै विपर्यस्यति ।१०। याः पूर्वाह्णे पुरोनुवाक्यास्ता अपराह्णे याज्याः करोति ।११। या याज्यास्ताः पुरोनुवाक्याः ।१२। अयातयामतायै ।१३। वषट्कारेण ह वा ऋग् यातयामा भवति समानेऽहन् ।१४। अयातयामाभिर्मे वषट्कृतमसदिति ।१५। यद्वेव[1] विपर्यस्यति ग्रीवाणां स्थेम्ने ।१६। तस्माद्धासां ग्रीवाणां व्यतिषक्तानीव पर्वाणि भवन्ति ।१७। आज्यहविषो देवताः ।१८। पयोव्रतो यजमानः ।१९। तत् सलोम ।२०। ताः परोवरीयसीरभ्युपेयात् त्रीनग्रे स्तनानथ द्वावथैकम् ।२१। परस्पर एव तल्लोकान् वरीयसः कुरुते ।२२। नाभ्युन्नयेत ।२३। स्वर्गं ह वा एते लोकमभिप्रयन्ति य उपसद उपयन्ति ।२४ ॥11॥

[1] BM¹. IO. यद्वै

द्वादशो ह वा अन्तरुष्यात्[1] स्वर्गो लोकः ।१। स यः सकृदभ्युन्नयते ।२। यथैकरात्रं सार्थान् प्रोषितानन्प्रेयादेवं तत् ।३। यो द्वितीयम् ।४। यथा द्विरात्रमेवं तत् ।५। हीयते तृतीयेन ।६। [2–]स्वर्गाँल्लोकान् नान्वश्नुते[–2] ।७। अप्यनुगच्छेदिति ह स्माह पैङ्ग्यः ।८। न त्वेवाभ्युन्नयेत ।९। यत्रैव कामयेत ।१०। तत् पूर्वो गत्वा स्वर्गस्यैव[3] लोकस्यावस्येदिति ।११। समाप्तिः श्रेयसीति ह स्माह कौषीतकिः ।१२। [4–]सम्राजो भक्षेऽस्मै[–4] दध्यानयेयुर्न

व्रते ।१३। सोमो वै दधि ।१४। अनन्तर्हितौ ह्यस्य भक्षो भवति समाप्नोति ।१५। उत[5] यदि संक्रीणीयुः ।१६। या मध्यमोपसत् ।१७। तया द्व्यहमन्यतरे चरेयुः ।१८। आवपनं हि [6–]सा ।१९। इदमन्तरिक्षलोक[–6] आयतनेन ।२०। अथासमरमभ्युदैत्यथासमरमभ्युदैति[7] ।२१ ।।12।।

[1] L. P. अन्तरुष्याः; L. (var.) अन्तरुष्यात् [2–2] L. स्वर्गाल्लोकान्ना° [3] L. P. BM[1]. स्वर्गस्य [4–4] L. P. सम्राजोऽस्मै भक्षे [5] L. P. उते [6–6] L. (var.) सेघमन्त° [7] L. P. Here ends *Khaṇḍa* 9

## इति प्रथमदशकेऽष्टमोऽध्यायः



ब्रह्म वा अग्निः ।१। तद् यदुपवसथेऽग्निं प्रणयन्ति ।२। ब्रह्मणैव तद् यजमानस्य पाप्मानमपघ्नन्ति ।३। पुरस्तादाहवनीयेन ।४। पश्चाद् गार्हपत्येन ।५। उत्तरत आग्नीध्रियेण[1] ।६। दक्षिणतो मार्जालीयेन ।७। येऽन्तःसदसं तैर्मध्यतः ।८। तस्मादुपवसथे प्राञ्चमग्निं प्रणयन्ति ।९। वि धिष्ण्यान् हरन्ति ।१०। यजमानस्यैव पाप्मनोऽपहत्यै ।११। देवा वै दीक्षिष्यमाणा वाचमपासादयन्त[2] ।१२। बहु त्वमुच्चावचं निगच्छसि ।१३। सत्यमया उ वयं दममया बुभूषाम इति ।१४। सा दीक्षायामाभक्तिमैच्छत ।१५। तां देवास्तत्र नाभजन्त ।१६। सा प्रायणीये तामु तत्र नो एव ।१७। सा क्रये तामु तत्र नो एव ।१८। सातिथ्ये तामु तत्र नो एव ।१९। सो वा एतदुपसदो नाचनागच्छन्निर्विद्यैव[3] ।२०। तस्मादु तत्रोपांशु चरेयुः ।२१। यथैवैव[4] मिथः संभृण्वीरन् ।२२ ।।1।।

[1] L. P. आग्नीध्रीयेण [2] L. P. वाचमुपा° [3] L. °न्निर्विद्येव [4] L. यथैवैवं

सो वा एतदुपवसथेऽग्नौ प्रणीयमान आगच्छत् ।१। तां देवास्तत्राभजन्त ।२। तस्मादु तत्र प्रथमत एवोच्चैरनुब्रूयात् ।३। यथैनामागतामनुबुध्येरन्नाभक्तां[1] यज्ञे[2] ।४। प्र देवं देव्या धियेति प्रवन्तं तृचं प्रह्रियमाणायान्वाह ।५। इळायास्त्वा पदे वयमिति ।६। इयं वा इळा ।७। अस्यां हीदं सर्वमीट्टे ।८। जातवेदो नि धीमहीति निहितवतार्धर्चेन निधीयमानमनुस्तौति ।९। अग्ने विश्वेभिः स्वनीक देवैः सीद होतः स्व उ लोके चिकित्वान् नि होता होतृषदने विदान इति सन्नवतीभिः सन्नमनुस्तौति ।१०। त्वं दूतस्त्वमु नः परस्पा इति दूतवत्या परिदधाति ।११। अभिरूपा अन्वाह ।१२। यद् यज्ञेऽभिरूपं तत् समृद्धं यज्ञस्यैव समृद्ध्यै ।१३। ता वा [3–]अष्टौ भवन्ति ।१४। एताभिर्वै देवाः सर्वा अष्टीराश्नुवत ।१५। तथो एवैतद् यजमान एताभिरेव सर्वा[4] अष्टीरश्नुते[–3] ।१६। त्रिः प्रथमया त्रिरुत्तमया द्वादश संपद्यन्ते ।१७। द्वादश वै मासाः संवत्सरः ।१८। संवत्सरस्यैवाप्त्यै ।१९। ताः समनूक्ता अष्टादश गायत्र्यः संपद्यन्ते ।२०। आग्नेयमेव छन्दोभिः ।२१। यस्य ह कस्य च षट्त्समानस्य छन्दसस्ता गायत्रीमभिसंपद्यन्ते ।२२। यस्य सप्त ता उष्णिहम् ।२३। यस्याष्टौ ता अनुष्टुभम् ।२४। यस्य नव ता बृहतीम् ।२५। यस्य दश ताः पङ्क्तिम् ।२६। यस्यैकादश तास्त्रिष्टुभम् ।२७। यस्य द्वादश ता जगतीम् ।२८ ।।2।।

[1] BM[1]. यथैवैना°; ER. अथैना° [2] L. P. Here ends *Khaṇḍa* 1 [3–3] L. P. omit; instead read अष्टान्वाहाष्टाक्षरा गायत्री गायत्रो वा अग्निर्गायत्रच्छन्दाः स्वेनैव तच्छन्दसाग्निं प्रणयन्ति [4] IO. omits

वाक् च वै मनश्च हविर्धाने ।१। वाचि च वै मनसि चेदं सर्वं हितम् ।२। तद् यद्धवि-

र्धाने प्रवर्तयन्ति ।३। सर्वेषामेव कामानामाप्त्यै ।४। द्वे हविर्धाने भवतः ।५। छदिस्तृतीयमभिनिदधति ।६। तैर्यत् किंच त्रिविधमधिदैवतमध्यात्मं तत् सर्वमाप्नोति ।७। प्रेतां यज्ञस्य शंभुवेति प्रवर्तौ प्रवर्त्यमानाभ्यामन्वाह ।८। द्यावा नः पृथिवी इमं तयोरिद् घृतवत् पय इति ।९। आशीर्वती पूर्वा ।१०। अथो द्विदेवत्या द्वयोर्हविर्धानयोः ।११। यामध्वर्युर्वर्त्मन्याहुतिं जुहोति तां पूर्वयानुवदति ।१२। यद्धविर्धाने प्रवर्तयन्ति तदुत्तरया ।१३। यमे इव यतमाने यदैतमित्यभिरूपया हविर्धाने अनुस्तौति ।१४। प्र वां भरन् मानुषा देवयन्त इति ।१५। बहवो ह्येने हरन्ति ।१६। अधि द्वयोरदधा उक्थ्यं वचो विश्वा रूपाणि प्रति मुञ्चते कविरिति ।१७। यच्छदिस्तृतीयमभिनिदधति तत् पूर्वयानुवदति ।१८। यद्धविर्धाने परिश्रयन्ते[1] तदुत्तरया[2] ।१९। अतो रराट्यामेवोत्तरया ।२०। ते यदा मन्येतात्र नेङ्गयिष्यन्तीति ।२१। यदैने नभ्यस्थे कुर्युः ।२२। अथा वामुपस्थमद्रुहेति ।२३। यदा वै क्षेमोऽथोपस्थः ।२४ ॥3॥

[1] L. P. परिश्रयन्ति  [2] L. P. Here ends *Khaṇḍa* 3

परि त्वा गिर्वणो गिर इति परिवत्या परिदधाति ।१। अभिरूपा अन्वाह ।२। यद् यज्ञेऽभिरूपं तत् समृद्धं यज्ञस्यैव समृद्ध्यै ।३। ता वा अष्टौ भवन्ति ।४। एताभिर्वै देवाः सर्वा अष्टीराश्नुवत ।५। तथो एवैतद् यजमान एताभिरेव सर्वा अष्टीरश्नुते ।६। त्रिः प्रथमया त्रिरुत्तमया द्वादश संपद्यन्ते ।७। द्वादश वै मासाः संवत्सरः ।८। संवत्सरस्यैवाप्त्यै ।९। यद्वेव त्रिः प्रथमां त्रिरुत्तमाम् ।१०। यज्ञस्यैव तद् बर्सौ[1] नह्यति स्थेम्नेऽविस्रंसाय ।११। तदु होतारमभिभाषन्ते यथा होतरभयमसत् तथा कुर्विति ।१२। संप्रेषितः पुरर्चः प्रतिपदनाद्[2] दक्षिणस्य पादस्य प्रपदेन[3] प्रत्यञ्चँल्लोगमपास्यति ।१३। अपेतो जन्यं[4] भयमन्यजन्यं[4] च वृत्रहन् ।१४। अप चक्रा अवृत्सतेति[5] ।१५। अत उ ह चक्राणामभ्याचारः ।१६। तत उ ह तस्मा अर्धायाभयं भवति ।१७। स [6-]प्राङ् यन्[-6] दक्षिणस्य हविर्धानस्योत्तरं वर्त्मोपनिश्रयीत[7] ।१८। अयं वै लोको दक्षिणं हविर्धानम् ।१९। प्रतिष्ठा वा अयँल्लोकः ।२०। प्रतिष्ठाया[8] अनुच्छिन्नोऽयानीति[9] ।२१। यत्र तिष्ठन् परिदध्यात्[10] ।२२। न[11] तत इति वेति वेयात् ।२३। यस्तत इति वेति वेयात् ।२४। यस्तं तत्र ब्रूयात् ।२५। च्योष्यत इति तथा ह स्यात् ।२६। तस्मात्[12] परिधाय दक्षिणं बाहुमन्वावृत्य वाचंयमो यथेतं[13] प्रत्येत्य ।२७। यत्र [14-]प्रथमां तिष्ठन्नन्ववोचत्[-14] ।२८। तत् स्थित्वात्र चाग्निप्रहरणे च ।२९। अथ यथावसथमभ्युपेयात् ।३० ॥4॥

[1] L. (var.) बहिरसौ, बर्हिरसौ, बर्हिंसौ, बहिसौ, बर्हसो; P. बर्हिरसौ  [2] L. P. प्रतिवदनाद्



[3] IO. omits  [4] P. जज्ञं (for जन्यं)  [5] P. आवृत्सतेति  [6-6] L. P. प्राच्यं
[7] L. P. °निश्रयेत  [8] L. P. प्रतिष्ठायाम्  [9] °सानीति  [10] L. प्रतिदध्यात्
[11] P. परिदध्यान्नं (for परिदध्यात् न)  [12] L. P. omit  [13] L. P. यथैतं
[14-14] L. P. तिष्ठन् प्रथमामन्ववोचत्

ब्रह्म वा अग्निः क्षत्रं सोमः ।१। तद् यदुपवसथेऽग्नीषोमौ प्रणयन्ति ।२। ब्रह्मक्षत्राभ्यामेव तद् यजमानस्य पाप्मानमपघ्नन्ति ।३। तदु वा आहुरासीन एव होतैतां प्रथमामनुब्रूयात् ।४। सर्वाणि ह वै[1] भूतानि सोमं राजानं प्रणीयमानमनु प्रच्यवन्ते ।५। तद् यदासीनो होतैतामृचमन्वाह ।६। तदेव[2] सर्वाणि भूतानि यथायतनं[3] नियच्छतीति[4] ।७। सावीर्हि देव प्रथमाय पित्र इति सावित्रीं प्रथमामन्वाह ।८। सवितृप्रसूततायै ।९। सवितृप्रसूतस्य ह वै न काचन रिष्टिर्भवत्यरिष्ट्यै ।१०। उत्तिष्ठ ब्रह्मणस्पत इत्युत्थापयति प्रैतु ब्रह्मणस्पतिरिति प्रणयति ब्राह्मणस्पत्ये[5] अभिरूपे अन्वाह ।११। ब्रह्म वै ब्रह्मणस्पतिः ।१२। ब्रह्मणैव तद् ब्रह्म[6] समर्धयति ।१३। होता देवो अमर्त्य उप त्वाग्ने दिवेदिव इति केवलाग्नेयौ तृचावन्वाह ।१४। अग्निं हि पूर्वं[7] हरन्ति ।१५। तौ वा इतवन्तौ भवतः ।१६। ह्रियमाणं ह्यग्निं स्तौति ।१७। स यत्रोपाधिगच्छेद् भूतानां गर्भमा दध इति ।१८। तद् गर्भकामायै गर्भं ध्यायात् ।१९। लभते ह गर्भम् ।२०। अथाग्नीध्रेऽग्निं[8] निदधति ।२१। तदध्वर्युराहुतिं[9] जुहोति ।२२। तां संप्रत्येतामनुब्रूयादग्ने जुषस्व प्रति हर्य तद् वच इति ।२३। तस्या एवैषा याज्या जुषस्व प्रति हर्येत्यभिरूपा ।२४ ॥5॥

[1] IO. हास्मै (for ह वै)  [2] L. P. तत्  [3] L. P. यथायथं  [4] L. P. नियच्छसीति
[5] P. ब्राह्मणस्पते  [6] L. P. यज्ञं  [7] L. P. पूर्व्यं  [8] L. P. °ग्नीध्रीये°  [9] L. यदध्वर्यु°; (var.) तदध्वर्यु°; P. तद्यदध्वर्यु°

अथ केवलं सोमं प्राञ्चं हरन्ति ।१। तस्मात् केवलीः सौमीरन्वाह ।२। सोमो जिगाति गातुविदितीतवत् तृचमनुब्रुवन्ननुसमेति ।३। अथाध्वर्युराहवनीये पुनराहुतिं जुहोति ।४। तां संप्रत्येतामनुब्रूयादुप प्रियं पनिप्नतमिति ।५। तस्या एवैषा याज्याहुतीवृधमित्यभिरूपा ।६। अथ पूर्वया द्वारा राजानं प्रपादयन्ति ।७। तस्मिन्[1] प्रपाद्यमाने तमस्य राजा वरुणस्तमश्विनेति ।८। व्रजं च विष्णुः सखिवाँ अपोर्णुत इत्यभिरूपां प्रपाद्यमानायान्वाह ।९। अन्तश्च प्रागा अदितिर्भवासीति प्रपन्नवतीं[2] प्रपन्नाय[3] ।१०। श्येनो न योनिं सदनं धिया कृतं गणानां त्वा गणपतिं हवामहेऽस्तभ्नाद् द्यामसुरो विश्ववेदा इति सन्नवतीभिः सन्नम-

नुस्तौति ।११। एवा वन्दस्व वरुणं बृहन्तमित्याशीर्वत्या परिदधाति ।१२। अभिरूपा अन्वाह ।१३। यद् यज्ञेऽभिरूपं तत् समृद्धं यज्ञस्यैव समृद्ध्यै ।१४। ता वै विंशतिमन्वाह ।१५। ता विराजमभिसंपद्यन्ते ।१६। वैराजः सोमः ।१७। अन्नं विराळन्नं सोमः ।१८। अन्नेन तदन्नाद्यं समर्धयति ।१९। त्रिः प्रथमया त्रिरुत्तमया चतुर्विंशतिः संपद्यन्ते ।२०। चतुर्विंशतिर्वै संवत्सरस्यार्धमासाः ।२१। संवत्सरस्यैवाप्त्यै ।२२। एवं नु[4] यदि पूर्वया द्वारा राजानं प्रपादयेयुः[5] ।२३। यद्यु वा अपरया ।२४। तेनैव होतानुसमियात्[6] ।२५। आत्मा वै यज्ञस्य होता ।२६। प्राणः सोमः ।२७। नेत् प्राणादात्मानमपादधानीति ।२८। उत्तरतो दक्षिणा तिष्ठन् परिदधाति ।२९। यशो[7] वै सोमो राजान्नाद्यम् ।३०। अमुत एव[8] तदर्वागात्मन् यशो धत्ते[9] यशो धत्ते ।३१ ।।6।।

[1] IO. तस्मात् [2] L. P. प्रवर्तीं [3] IO. P. प्रपन्नायाह [4] L. तु [5] L. P. प्रपादयन्ति
[6] L. (var.) होता न समियात् [7] L. P. यश उ [8] L. wrongly states that IO. reads अमृतमेव
[9] L. P. add अर्वागात्मन्

## इति प्रथमदशके नवमोऽध्यायः



वज्रो वा एष यद् यूपः ।१। तद् यदुपवसथे यूपमुच्छ्रयन्ति ।२। वज्रेणैव तद् यजमानस्य पाप्मानमपघ्नन्ति ।३। स नापनत इव स्यात् ।४। अशनायतो वा एतद् रूपम् ।५। अभिनत इवोदरेण ।६। अथाहवनीयं पुनरभ्यावृत्तः[1] ।७। तद् वै सुहितस्य रूपम् ।८। अनशनायुका हास्य भार्या भवन्ति[2] य एवंरूपं यूपं[3] कुरुते ।९। पालाशं ब्रह्मवर्चसकामः कुर्वीत ।१०। बैल्वमन्नाद्यकामः ।११। खादिरं स्वर्गकामः ।१२। त्र्यरत्निः स्याल्लोकानां रूपेण ।१३। चतुररत्निः पशूनां रूपेण ।१४। पञ्चारत्निः पङ्क्त्यै रूपेण ।१५। षळरत्निर्ऋतूनां रूपेण ।१६। सप्तारत्निश्छन्दसां रूपेण ।१७। अष्टारत्निर्गायत्र्यै रूपेण ।१८। नवारत्निर्बृहत्यै रूपेण ।१९। दशारत्निर्विराजो रूपेण ।२०। एकादशारत्निस्त्रिष्टुभो रूपेण ।२१। द्वादशारत्निर्जगत्यै रूपेण ।२२ ।।1।।

[1] P. ०भ्यावृतः [2] L. P. भवति; L. (var.) भवन्ति [3] P. omits

एता मात्राः संपदो यूपस्य ।१। तासामेकां संपदमभिसंपाद्य यूपं कुर्वीत ।२। तदु वा आहुर्न मिनेद्[1] यूपम् ।३। अपरिमित एव स्यात् ।४। मितं ह वै मितेन जयति[2] ।५। अमितममितेन ।६। अपरिमितस्यावरुद्ध्यै[3] ।७। यत्रैव मनसा वेलां मन्येत [4–]तत् कुर्वीत[–4] ।८। तद् यूपस्य च वेदेश्चेति ह स्माह ।९। प्रजापतिर्वै मनः ।१०। यज्ञ उ वै प्रजापतिः ।११। स्वयं वै तद् यज्ञो यज्ञस्य जुषते ।१२। यन्मनो[5] मनसः ।१३। वाजपेययूप एवावधूतः सप्तदशारत्निः ।१४। सोऽष्टाश्रिर्निष्ठितो भवति ।१५। सर्वेषामेव कामानामष्ट्यै[6] ।१६। अथैनं[7] प्रणेनिजति ।१७। तद् यदेवेदं[8] परशुना क्रूरीकृत इव तष्ट इव भवति ।१८। तदेवास्यैतदाप्याययति तद् भिषज्यति ।१९। अथैनमभ्यञ्जति ।२०। तद् या[9] एवेमाः पुरुष[10] आपः ।२१। ता एवास्मिंस्तद् दधाति ।२२। स्वभ्यक्तं स्वयमेव यजमानः कुर्वीत ।२३। तथा ह यजमानोऽरूक्ष इव भवति[11] ।२४ ।।2।।

[1] L. P. मिमेद् [2] IO. यजति [3] P. अपरिमित एव (वा) स्यावरुद्ध्यै [4–4] L. P. omit
[5] P. omits मनो [6] ER. ०नामाप्त्यै [7] L. P. अथैतं [8] IO. यदेवैनं [9] ER. यद्
[10] L. (var.) पुरुषा, परुषा [11] L. P. Here ends *Khaṇḍa* 1

अञ्जन्ति त्वामध्वरे देवयन्त इत्यक्तवतीमभिरूपामज्यमानायान्वाह[1] ।१। उच्छ्रयस्व वनस्पते समिद्धस्य श्रयमाणः पुरस्ताज्जातो जायते सुदिनत्वे अह्नामूर्ध्व ऊ षु ण ऊतय

ऊर्ध्वो नः पाह्यंहसो नि केतुनेत्युच्छ्रितवतीश्चोद्वतीश्चोच्छ्रीयमाणायान्वाह[2] ।२। युवा सुवासाः परिवीत आगादिति परिवीतवत्या परिदधाति ।३। अभिरूपा अन्वाह ।४। यद् यज्ञेऽभिरूपं तत् समृद्धं यज्ञस्यैव समृद्ध्यै ।५। ता वै सप्तान्वाह ।६। सप्त वै छन्दांसि ।७। सर्वेषामेव छन्दसामाप्त्यै ।८। त्रिः प्रथमया त्रिरुत्तमयैकादश संपद्यन्ते ।९। एकादशाक्षरा त्रिष्टुप् ।१०। त्रैष्टुभाः पशवः पशूनामेवाप्त्यै ।११। इति न्वेकयूप एकपशौ च ।१२। अथ यद्येकयूप[3] एकादशिनीमालभेरन् ।१३। पशौ पशावेवाध्वर्युः संप्रेष्यति ।१४। पशौ पशावेव युवा सुवासाः परिवीत आगादिति सैव परिधानीया सा परिवीयमाणाय ।१५। इति न्वेकयूपे ।१६। अथ कथं यूपैकादशिन्यामिति ।१७। एता एव सप्त सप्तादशभ्योऽनुब्रूयात् ।१८। अथ यमुत्तमं संमिन्वन्ति ।१९। तस्मिन् यत् सूक्तस्य परिशिष्येत तदनुवर्तयेत् ।२०। [4–]प्रगाथस्योपरिष्टात् तत्[–4] ।२१। शृङ्गाणीवेच्छृङ्गिणां सं ददृश्र इति सर्वानेवाभिवदति[5] ।२२। युवा सुवासाः परिवीत आगादिति सैव परिधानीया सा परिवीयमाणाय ।२३ ॥3॥

[1] L. °पामाज्य°, P. °पाऽज्य° [2] L. °श्चोच्छ्रिय°; BM[1]. °श्चोच्छ्रय°; ER. omits उद्वतीश्च
[3] BM[1]. यद्यूप [4–4] L. P. पुरस्तात् प्रगाथस्य तत् [5] L. P. °वानुवदति

तमाहुरनुप्रहरेत् ।१। यजमानो वा एष यद् यूपः ।२। स्वर्गो लोक आहवनीयः ।३। तदेवैनं[1] स्वर्गँल्लोकं गमयति ।४। तत् स्वर्ग्यमिति ।५। तदु वा आहुस्तिष्ठेदेव ।६। यदिदमास्थानं स्वरोस्तत ईश्वरा[2] यदि नासुररक्षसान्यन्ववपातोः[3] ।७। [4–]तस्मादेष वज्र उद्यतो[–4] यज्ञवास्तौ तिष्ठेदेवासुररक्षसान्यपघ्नन्नपबाधमानो[5] यज्ञं चैव यजमानं चाभिगोपायन्निति ।८। अथ यूप्य एको द्रव्य एको गर्त्य एकः ।९। योऽवाचीनवकलः स[6] गर्त्यः ।१०। तस्याशां नेयात् ।११। अथ य ऊर्ध्ववकलो द्रव्यः स मानुषः ।१२। कामं तस्यापि कुर्वीत ।१३। अथ यस्य प्रसव्यादित्यस्यावृतमन्वावृत्ता[7] वकलाः ।१४। स [8–]यूप्यः स[–8] स्वर्ग्य एकस्थो भ्रातृव्यः ।१५। यो वानुवृतः पलाशैरा मूलात् स्यात् ।१६। सोऽनग्नः स पशव्यः ।१७। तं पशुकामः कुर्वीत[9] ।१८ ॥4॥

[1] L. P. तदेनं [2] P. ईश्वराय [3] L. P. °रक्षांस्यन्व° [4–4] L. P. तस्मात्त्वेष उद्यतो वज्रो
[5] L. P. °रक्षांस्यप° [6] L. (var.) °वकलस्य (for °वकलः सः) [7] L. P. प्रसव्या आदित्यस्यान्वावृत्ता
[8–8] L. (var.), P. यूप्यस्य [9] L. P. Here ends *Khaṇḍa* 2

अग्नीषोमयोर्वा एष आस्यमापद्यते यो दीक्षते ।१। तद् यदुपवसथेऽग्नीषोमीयं पशुमा-



लभते ।२। आत्मनिष्क्रयणो हैवास्यैष तेनात्मानं निष्क्रीणीयानृणो भूत्वाथ यजते ।३। तस्मादु तस्य नाश्नीयात् ।४। पुरुषो हि स प्रतिमया ।५। तदु वा आहुर्हविर्हविर्वा आत्मनिष्क्रयणम् ।६। हविषो हविष एव स तर्हि नाश्नीयात् ।७। य आत्मनिष्क्रयणमिति नाश्नीयात् ।८। तस्मादु काममेवाशितव्यम् ।९। अहोरात्रे वा अग्नीषोमौ ।१०। तद् यद् दिवा वपया चरन्ति ।११। तेनाहः प्रीतमाग्नेयम् ।१२। रात्रिमनु संतिष्ठते ।१३। तेन रात्रिः[1] सौमी प्रीता ।१४। सैषाहोरात्रयोरतिमुक्तिः ।१५। अत्यहोरात्रे[2] यज्ञेन मुच्यते[3] ।१६। नैनं ते आप्नुतः ।१७। य एवं विद्वानेतं पशुमालभते ।१८ ॥5॥

[1] IO. रात्री; BM[1]. रात्रः [2] L. P. इत्यहो° [3] L. मुच्येते

तमाहुर्द्विरूपः स्याच्छुक्लं च कृष्णं चाहोरात्रयो रूपेणेति[1] ।१। शुक्लं वा च[2] लोहितं चाग्नीषोमयो[3] रूपेणेति ।२। तस्यैकादश प्रयाजा एकादशानुयाजा एकादशोपयजः ।३। तानि त्रयस्त्रिंशत् ।४। त्रयस्त्रिंशद् वै सर्वे देवाः ।५। सर्वेषामेव देवानां प्रीत्यै ।६। प्राणा वै प्रयाजा अपाना अनुयाजाः ।७। तस्मात् समा भवन्ति ।८। समाना हीमे प्राणापानाः ।९। तदाहुः कस्मादृचा प्रयाजेषु यजति प्रतीकैरनुयाजेष्विति ।१०। रेतःसिक्तिर्वै[4] प्रयाजाः ।११। रेतोधेयमनुयाजाः ।१२। तस्मादृचा प्रयाजेषु यजति प्रतीकैरनुयाजेष्विति ।१३। अथ यत् सर्वमुत्तममाह ।१४। स्वर्ग एव तल्लोके यजमानं दधाति ।१५। आप्रीभिराप्रीणाति ।१६। सर्वेण ह वा एष आत्मना सर्वेण मनसा यज्ञं संभरते यो यजते ।१७। तस्य रिरिचान इवात्मा[5] भवति ।१८। तमस्यैताभिराप्रीभिराप्रीणाति ।१९। तद् यदाप्रीणाति ।२०। तस्मादाप्र्यो[6] नाम ।२१ ॥6॥

[1] L. P. रूपेण [2] L. P. थ [3] L. P. वाग्नी° [4] L. P. रेतःसिच्यं वै [5] L. P. इव वा एतस्यात्मा [6] L. P. °दाप्रियो

पर्यग्निं[1] पशुं करोति रक्षसामपहत्यै ।१। अग्निर्वै रक्षसामपहन्ता ।२। त्रिःप्रसवि पर्यग्निकरोति[2] ।३। तद् यथा तिस्रोऽग्निपुरः[3] कुर्यादेवं तत् ।४। तस्मात् पुनः परीहीत्यग्निधं[4] ब्रूयात् ।५। यमिच्छेन्न प्रच्यवेतेति[5] ।६। दैव्याः शमितार उत च मनुष्या आरभध्वमुपनयत मेध्या दुर आशासाना मेधपतिभ्यां मेधमिति ।७। तद्धैक आहुः ।८। यजमानो वै मेधपतिरिति ।९। को मनुष्य इति ब्रूयात् ।१०। देवतैव मेधपतिरिति ।११। षड्विंशतिरस्य वङ्क्र्य इति ।१२। पशव[6] उ ह वै वङ्क्र्यः ।१३। उभयतोऽसृक् पर्यवानिति ।१४।

असृग्भाजनानि ह वै रक्षांसि भवन्ति ।१५। नेद् रक्षसां भागेन दैवं भागं प्रसजानीति[7] ।१६। स एषोऽध्रिगुः संशासनमेव ।१७। अङ्गानि मा[8] परिकर्तोरिति ।१८। यद्ध वा अदुष्टं तद् देवानां हविः ।१९। न वै ते दुष्टं हविरदन्ति ।२०। नवकृत्वोऽध्रिगावववानिति[9] ।२१। नवेमे प्राणाः ।२२। प्राणानेव तद् यजमाने दधाति ।२३। सर्वायुत्वायास्मिँल्लोके ।२४। अमृतत्वायामुष्मिन् ।२५। त्रिः परिदधात्यपराक्त्वाय ।२६। सकृत् पुरस्तादाह ।२७। सकृदिव वै पितरः ।२८। पितृदेवत्य इव वै पशुरालभ्यमानो भवति ।२९। अथ यत् त्रिरुपरिष्टादाह ।३०। त्रिर्वै देवत्या[10] ।३१। देवदेवत्यमेवैनं तदयातयामानं करोति ।३२ ॥7॥

[1] L. P. पर्यग्नि [2] P. पर्यग्निं क० [3] L. P. ०ग्निः पुरः [4] ०त्यग्रीषं [5] L. P. Here ends *Khaṇḍa* 3 [6] P. परशव; BM¹. पशव [7] L. P. प्रसृजानीति [8] P. वा [9] L. (var.), P. ०वानीति [10] L. P. देवत्रा

परिधायोपांशु जपत्युभावपापश्वेति ।१। अपापो ह वै देवानां शमिता ।२। तस्मा[1] एवैनं तत् संप्रयच्छति ।३। स हि देवाननुवेद[2] ।४। अथ स्तोकीया अन्वाह ।५। स्तोकानेवैताभिरग्नये स्वदयति ।६। एता ह वा उ तेषां पुरोनुवाक्या एता याज्याः ।७। तस्मादभिरूपा भवन्ति ।८। स्वाहाकृतिभिश्चरित्वा वपया चरन्ति ।९। प्रयाजानेव तत् पशुभाजः कुर्वन्ति ।१०। न स्वाहाकृतीश्च वपां चान्तरेण वाचं विसृजेत ।११। प्राणा वै स्वाहाकृतयः ।१२। आत्मा वपा ।१३। नेत् प्राणांश्चात्मानं चान्येनान्तर्दधानीति[3] ।१४। अथ यदनुष्टुभोऽग्नीषोमीयस्य पशोः पुरोनुवाक्या भवन्ति ।१५। गायत्री वै सा यानुष्टुप् ।१६। गायत्रमग्नेश्छन्दः ।१७। अथ यत् त्रिष्टुभो याज्याः ।१८। क्षत्रस्यैतच्छन्दो[4] यत् त्रिष्टुप् ।१९। क्षत्रं सोमः ।२०। तद् यथाच्छन्दसं देवते प्रीणाति ।२१। अथ वै पशुमालभ्यमानं पुरोळाशोऽनुनिरुप्यते[5] ।२२। मेधो वा एष पशूनां यत् पुरोळाशः ।२३। समेधमेवैनं तद् यज्ञियं करोति ।२४। अथ यत्र पुरोळाशो[6] निरुप्यते[7] ।२५। तत् पुरोळाशस्विष्टकृदच्युतः ।२६। अग्निर्वै स्विष्टकृत् ।२७। तस्मादच्युतो भवति ।२८। वैश्वामित्रीं पुरोळाशस्विष्टकृतः पुरोनुवाक्यामनूच्य वैश्वामित्र्या यजति ।२९। ततिर्वै यज्ञस्य पुरोळाशः ।३०। वाग् वै विश्वामित्रः ।३१। वाचा यज्ञस्तायते[8] ।३२ ॥8॥

[1] IO. BM¹. तस्माद् [2] L. P. Here ends *Khaṇḍa* 4 [3] IO. ०न्तर्दधाति [4] L. P. ०स्यैवैत० [5] L. P. पुरोडाशो निरुप्यते; IO. पुरोळाशं निरुप्यते L. suggests the reading accepted here [6] P. पशुपुरो० [7] L. (var.) न निरुप्यते, न निरुप्येत, अनुनिरुप्यते; P. न निरुप्यते [8] L. P. Here ends *Khaṇḍa* 5



अथ मनोतामन्वाह ।१। सर्वा ह वै देवताः पशुमालभ्यमानमुपसंगच्छन्ते मम नाम ग्रहीष्यति[1] मम नाम ग्रहीष्यतीति ।२। तासां सर्वासां पशावेव मनांस्योतानि भवन्ति ।३। ता अत्र प्रीणाति ।४। तथा हासां[2] सर्वासाममोघायैवोपसमेतं भवति ।५। तदाहुर्यन्नानादेवताः पशव आलभ्यन्तेऽथ कस्मादाग्नेयमेवान्वाहेति ।६। तिस्रो वै देवानां मनोताः ।७। अग्निर्वै देवानां मनोता ।८। तस्मिन् ह्येषां मनांस्योतानि भवन्ति ।९। अथो वाग् वै देवानां मनोता ।१०। तस्यां ह्येषां मनांस्योतानि भवन्ति ।११। अथो गौर्वै देवानां मनोता ।१२। तस्यां ह्येषां मनांस्योतानि भवन्ति ।१३। अग्निः सर्वा मनोताः ।१४। अग्नौ मनोताः संगच्छन्ते ।१५। तस्मादाग्नेयमेवान्वाहेति ।१६। ता वै त्रयोदश भवन्ति ।१७। त्रयोदश वै पशोरवदानानि भवन्ति ।१८। त्रिः प्रथमया त्रिरुत्तमया सप्तदश संपद्यन्ते ।१९। सप्तदशो वै प्रजापतिः ।२०। एतद् वा आर्ध्नुकं[3] कर्म यत् प्रजापतिसंमितम् ।२१। सप्तदश सामिधेनीरन्वाह ।२२। सप्तदशो वै प्रजापतिः ।२३। एतद् वा आर्ध्नुकं[3] कर्म यत् प्रजापतिसंमितम् ।२४। अथ यत्र पशुरालभ्यते ।२५। तद् वनस्पतिरच्युतः ।२६। अग्निर्वै वनस्पतिः ।२७। स वै देवेभ्यो हविः श्रपयति[4] ।२८ ॥9॥

[1] IO. ग्रहीष्यतीति [2] P. adds: सर्वासां पशावेव मनांस्योतानि भवन्ति ता अत्र प्रीणाति तथा हासां [3] L. P. आर्धुकं [4] P. प्रयच्छति

तस्मादच्युतो भवति ।१। स उ वै पयोभाजनः ।२। अत्राग्निः सर्वेषु हविःषु भागी भवति ।३। तदाहुर्यद् धामभाजो देवा अथ कस्मात् पाथोभाग् वनस्पतिरिति ।४। धाम वै देवा यज्ञस्याभजन्त[1] ।५। पाथः पितरः ।६। पितृदेवत्य इव वै पशुः ।७। पितृदेवत्यं पयः ।८। तस्मादिति ब्रूयात् ।९। तदाहुः कस्मात् सौम्य एवाध्वरे प्रवृताहुती[2] जुह्वति न हविर्यज्ञ इति ।१०। अकृत्स्नैव वा एषा देवयज्या यद्धविर्यज्ञः ।११। अथैषैव कृत्स्ना देवयज्या यत् सौम्योऽध्वरः ।१२। तस्मात् सौम्य एवाध्वरे प्रवृताहुती[2] जुह्वति न हविर्यज्ञ इति ।१३। जुष्टो वाचो भूयासं जुष्टो वाचस्पतेर्देवि वाक् ।१४। यत् ते वाचो मधुमत्तमं तस्मिन् नो अद्य[3] धाः[4] स्वाहा सरस्वत्या[5] इति पुरस्तात् स्वाहाकारेण जुहोति ।१५। वाचं तदुत्सृजते ।१६। तस्माद् वागत ऊर्ध्वोत्सृष्टा यज्ञं वहति ।१७। मनसोत्तराम् ।१८। मनसा हि मनः प्रीतं[6] मनः प्रीतम्[7] ।१९ ॥10॥

[1] L. ०स्यायजन्त [2] P. प्रवृत्ता० [3] IO. अभ्य [4] L. P. धात् [5] IO. सरस्वत्य [6] L. P. add मनसा हि [7] L. P. Here ends *Khaṇḍa* 6

## इति प्रथमदशके दशमोऽध्यायः

अथातः प्रातरनुवाकः ।१। यदेवैनं प्रातरन्वाह ।२। तत् प्रातरनुवाकस्य प्रातरनुवाकत्वम् ।३। अथ यत् प्रपदो जपति[1] यदाहुतीर्जुहोति ।४। स्वस्त्ययनमेव तत् कुरुते ।५। हिंकृत्य प्रातरनुवाकमन्वाह ।६। वज्रो वै हिंकारः ।७। वज्रेणैव तद् यजमानस्य पाप्मानं हन्ति ।८। उच्चैर्निरुक्तमनुब्रूयात् ।९। एतद्ध वा एकं वाचोऽनन्ववसितं[2] पाप्मना[3] यन्निरुक्तम् ।१०। तस्मान्निरुक्तमनुब्रूयात् ।११। यजमानस्यैव पाप्मनोऽपहत्यै ।१२। अर्धर्चशोऽनुब्रूयात् ।१३। ऋक्संमिता वा इमे लोकाः ।१४। अयँल्लोकः पूर्वोऽर्धर्चः ।१५। असौ लोक उत्तरः ।१६। अथ यदर्धर्चावन्तरेण तदिदमन्तरिक्षम् ।१७। तद् यदर्धर्चशोऽन्वाह ।१८। एभिरेव तल्लोकैर्यजमानं समर्धयति ।१९। एष्वेव तल्लोकेषु यजमानं दधाति ।२० ॥1॥

[1] IO. जुह्वति [2] BM¹. वाचानन्ववसितं; IO. वाचोमन्ववसितं [3] P. पाप्मनो

अथ वै पङ्क्तेः पञ्च पदानि कथं सार्धर्चशोऽनूक्ता भवतीति[1] ।१। प्रणव उत्तरयोस्तृतीयः ।२। तथा सार्धर्चशोऽनूक्ता भवति ।३। आग्नेयं ऋतुमन्वाह ।४। तदिमँल्लोकमाप्नोति ।५। उषस्यमन्वाह ।६। तदन्तरिक्षलोकमाप्नोति ।७। आश्विनमन्वाह ।८। तदमुँल्लोकमाप्नोति ।९। गायत्रीमन्वाह ।१०। मुखमेव गायत्री ।११। अनुष्टुभमन्वाह ।१२। वागनुष्टुप् ।१३। मुखे तद् वाचं दधाति ।१४। मुखेन वै वाचं वदति ।१५। त्रिष्टुभमन्वाह ।१६। बलं वै वीर्यं त्रिष्टुप्[2] ।१७। बृहतीमन्वाह ।१८। गोअश्वमेव[3] बृहती ।१९। उष्णिहमन्वाह ।२०। अजाविकमेवोष्णिक् ।२१। जगतीमन्वाह ।२२। बलं वै वीर्यं जगती ।२३। बलं वीर्यं पुरस्तात् त्रिष्टुप् ।२४। बलं वीर्यमुपरिष्टाज्जगती[4] ।२५। मध्ये बार्हताश्चौष्णिहाश्च पशवः ।२६। बलेनैव तद् वीर्येणोभयतः पशून् परिगृह्य यजमाने दधाति ।२७। तथा ह यजमानात् पशवोऽनुत्क्रामुका भवन्ति ।२८। तद् यथा ह वा अस्मिँल्लोके मनुष्याः पशूनश्नन्ति ।२९। यथैभिर्भुञ्जते ।३०। एवमेवामुष्मिँल्लोके पशवो मनुष्यानश्नन्ति ।३१। एवमेभिर्भुञ्जते ।३२। स य एनानिह प्रातरनुवाकेनावरुन्धे ।३३। तमिहावरुद्धा अमुष्मिँल्लोके नाश्नन्ति ।३४। नैनेन प्रतिभुञ्जते ।३५। यथैवैनानस्मिँल्लोकेऽश्नाति[5] ।३६। यथैभिर्भुङ्क्ते ।३७। एवमेवैनानमुष्मिँल्लोकेऽश्नाति ।३८। एवमेभिर्भुङ्क्ते ।३९। पङ्क्तिमन्वाह ।४०। प्रतिष्ठा वै पङ्क्तिः ।४१। सर्वेष्वेव तद् भूतेषु यजमानं प्रतिष्ठापयति[6] ।४२ ॥2॥

[1] IO. भवति [2] L. P. add बलमेव तद् वीर्यं यजमाने दधाति [3] L. P. गोऽश्वमेव
[4] L. P. Here ends *Khaṇḍa* 2 [5] L. (var.) नाश्नाति (for अश्नाति) [6] L. P. Here ends *Khaṇḍa* 3



अथ सर्वा ह वै देवता होतारं प्रातरनुवाकमनुवक्ष्यन्तमाशंसमानाः प्रत्युपतिष्ठन्ते मया प्रतिपत्स्यते मया प्रतिपत्स्यत इति ।१। स य[1] एकां देवतामादिश्य प्रतिपद्येत ।२। अथेतराभ्यो देवताभ्यो वृश्च्येत[2] ।३। अनिरुक्तया प्रतिपद्यते ।४। तेनो न कस्यैचन देवताया आवृश्च्यते[3] ।५। आपो रेवतीः [4-]क्षयथा हि वस्व[-4] इति प्रतिपद्यते ।६। आपो वै सर्वा देवताः ।७। सर्वाभिरेव तद् देवताभिः प्रतिपद्यते ।८। उपप्रयन्तो अध्वरमित्युपसंदधाति ।९। उपेति तदस्य लोकस्य रूपम् ।१०। प्रयन्त इति तदमुष्य ।११। उपेति तदग्ने रूपम् ।१२। प्रयन्त इति तदमुष्यादित्यस्य ।१३। एवमेव सर्वासु प्रतिपत्सु सर्वेषु ऋतुषु ।१४ ॥3॥

[1] L. P. यद् [2] L. (var.), P. वृश्चेत [3] L. (var.), P. आवृश्चते [4-4] L. P. omit

आग्नेय [1-]उषस्य आश्विने[-1] पूर्वा पूर्वैव व्याहृतिरग्ने रूपम् ।१। उत्तरामुष्यादित्यस्य ।२। अथैतद् द्वे[2] नानाच्छन्दांस्यन्तरेण कर्ता[3] इव ।३। अथैते बलिष्ठे अरिष्टे अनार्ते देवते ।४। ताभ्यां प्रतिपद्यते ।५। समानेन सूक्तेन समारोहेत् ।६। तदकर्तस्कद्यँल्लोहस्य[4] रूपं स्वर्ग्यम् ।७। यत्र वा [5-]समानस्य ऋषे[-5] स्यात् ।८। तदनवानं संक्रामेत् ।९। अमृतं वै प्राणः ।१०। अमृतेन तन्मृत्युं तरति ।११। तद् यथा वंशेन वा मत्येन वा कर्तं[6] संक्रामेदेवं तत् ।१२। प्रणवेन संक्रामति ।१३। ब्रह्म वै प्रणवः ।१४। ब्रह्मणैव तद् ब्रह्मोपसंतनोति ।१५ ॥4॥

[1-1] P. उषस्याश्विने [2] L. P. C. वै [3] L. P. गर्ता [4] L. P. तदगर्तस्कन्द्यं रोहस्य
[5-5] L. P. समानस्यार्षेयः [6] L. P. गर्तं

शुद्धः प्रणवः स्यात् प्रजाकामानाम् ।१। मकारान्तः प्रतिष्ठाकामानाम् ।२। मकारान्तः प्रणवः स्यादिति हैक आहुः ।३। शुद्ध इति त्वेव स्थितः[1] ।४। मीमांसितः प्रणवः ।५। अथात इह शुद्ध इह पूर्ण इति ।६। शुद्ध एव प्रणवः स्याच्छस्त्रानुवचनयोर्मध्य इति ह स्माह कौषीतकिः ।७। तथा संहितं भवति ।८। मकारान्तोऽवसानार्थे ।९। प्रतिष्ठा वा अवसानं प्रतिष्ठित्या एव ।१०। अथो उभयोः कामयोराप्त्यै ।११। एत उ ह वै छन्दःप्रवाहा[2] अवरं छन्दः परं छन्दोऽतिप्रवहन्ति[3] ।१२। तस्यार्तिर्नास्ति[4] छन्दसा छन्दोऽतिप्रोळ्हस्य ।१३। अतियन्नेव[5] यं द्विष्यात् ।१४। तं मनसा प्रेव विध्येच्छन्दसां कृन्तत्रेषु ।१५। द्रवति वा सं वा शीर्यत इति ह स्माह ।१६। समानोदर्काण्युत्तमानि ऋतूनां पाङ्क्तान्यन्वाह ।१७।

रसो वा उदर्कः ।१८। पशवश्छन्दांसि ।१९। रसमेव तच्छन्दांस्यभ्युपनिवर्तन्ते ।२०। उपनिवर्तमिव वै पशवः ।२१ ॥5॥

[1] IO. स्थितं [2] L. (var.), P. छन्दःप्रवहा [3] L. (var.) °प्रवयन्ति [4] L. (var.), P. तस्याप्ति° [5] L. (var.) अतियन्तेव, अतियन्त्येव

सौयवसे रमन्ते ।१। सैकोना विराड् द्विरनूक्तया ।२। संप्रति[1] विराट् त्रिरनूक्तया ।३। एका विराजमत्येति[2] ।४। त्रयो वै यज्ञे कामाः ।५। यः संपन्ने यो न्यूने योऽतिरिक्ते ।६। यद् वै यज्ञस्य संपन्नं तत् स्वर्ग्यम् ।७। यन्न्यूनं तदन्नाद्यम् ।८। यदतिरिक्तं तत् प्रजात्यै ।९। तदत्रैव यजमानः सर्वान् कामानाप्नोति ।१०। अभूदुषा रुशत्पशुरित्याशीर्वत्या परिदधाति ।११। पशुभ्य एव तदाशिषं वदते ।१२। तथा ह यजमानात् पशवोऽनुत्क्रामुका भवन्ति ।१३। तस्यां वाचमुत्सृजते[3] ।१४। तदेनमजनीति देवेभ्यो निवेदयति ।१५। अत्र हि जायते ।१६। अया वाजं देवहितं सनेमेति द्विपदामभ्यस्यति ।१७। पशवो वा एतानि चतुरुत्तराणि छन्दांसि ।१८। यजमानच्छन्दसं द्विपदा ।१९। अधिष्ठायामेव तत् पशूनां यजमानं दधाति ।२०। अधीव वै पशून् पुरुषस्तिष्ठति ।२१ ॥6॥

[1] L. P. संपदि [2] L. P. Here ends *Khaṇḍa* 5 [3] L. P. °मुत्सृजति

त्रिःसप्तानि ऋतूनां छन्दांस्यन्वाह ।१। तदेकविंशतिः ।२। एकविंशो वै चतुष्टोमः स्तोमानां परमः ।३। तत् परमं स्तोममाप्नोति ।४। यद्वेवैकविंशतिः[1] ।५। द्वादश[2] मासाः पञ्चर्तवस्त्रय इमे लोकाः ।६। असावादित्य एकविंशः ।७। तेनैव तत्सलोकतायां यजमानमध्यूहति[3] ।८। तदाहुर्यदिमा हविर्यज्ञस्य वा पशोर्वा सामिधेन्योऽथ काः सौम्यस्याध्वरस्येति ।९। प्रातरनुवाक इति ब्रूयात् ।१०। अक्षरैर्ह वा इतरासां संवत्सरमुपेप्सति ।११। ऋग्भिरिह[4] ।१२। शतमात्रमनुब्रूयात् ।१३। शतायुर्वै पुरुषः ।१४। आयुरेवास्मिंस्तद् दधाति ।१५। विंशतिशतमनुब्रूयात् ।१६। विंशतिशतं वा ऋतोरहानि ।१७। तदृतुमाप्नोति ।१८। ऋतुना संवत्सरम् ।१९। ये च संवत्सरे कामाः ।२०। त्रीणि षष्टिशतान्यनुब्रूयात् ।२१। त्रीणि वै षष्टिशतानि संवत्सरस्याह्नाम् ।२२। [5–]तत् संवत्सरस्याहान्याप्नोति[–5] ।२३। सप्तविंशतिशतान्यनुब्रूयात् ।२४। सप्त[6] वै विंशतिशतानि[6] संवत्सरस्याहोरात्राणाम् ।२५। तत् संवत्सरस्याहोरात्रानाप्नोति[7] ।२६ ॥7॥

[1] L. यदेक° [2] L. P. add वै [3] L. P. Here ends *Khaṇḍa* 6 [4] L. ऋग्भिर्ह; P. ऋग्भिर्हि [5–5] L. P. संवत्सरस्यैवाप्त्यै [6] L. adds च [7] L. P. °होरात्राण्या°



सहस्रमनुब्रूयात् ।१। सर्वं वै तद् यत् सहस्रम् ।२। सर्वं प्रातरनुवाकः ।३। तत् सर्वेण सर्वमाप्नोति य एवं वेद ।४। तदु ह स्माह कौषीतकिः ।५। प्रजापतिर्वै प्रातरनुवाकः ।६। अपरिमित उ वै प्रजापतिः ।७। कस्तं मातुमर्हेदिति ।८। एषा हैव स्थितिः[1] ।९। तदाहुर्यत् सदस्युक्थानि शस्यन्तेऽथ कस्माद्धविर्धानयोः प्रातरनुवाकमन्वाहेति ।१०। शिरो [2–]वै यज्ञस्य[–2] यद्धविर्धाने ।११। [3–]वाक् प्रातरनुवाकः ।१२। वाचैव तच्छिरः समर्धयति[–3] ।१३। उदरं वै सदः ।१४। अन्नमुक्थानि ।१५। उदरसाचेयमु वा अन्नाद्यम् ।१६। तद् यथा ह वा अन[4] एवं[5] यज्ञः प्रतिमया ।१७। यथा धान्यमेवं प्रातरनुवाकः ।१८। यथा पात्राण्येवमुक्थानि ।१९। स योऽल्पकमन्वाह ।२०। यथाल्पधान्ये पात्राणि समृच्छेरन् ।२१। एवं तस्योक्थानि समृच्छन्ते ।२२। उक्थानामनु समरमीश्वरो यजमानं श्रेषोन्वेतोः ।२३। [6–]तदु वा आहुर्बहुमेवानुब्रूयात्[–6] ।२४। उक्थानि तत् परिवृंहति ।२५। या यज्ञस्य समृद्धस्याशीः सा मे समृध्यतामिति ।२६। या वै यज्ञस्य समृद्धस्याशीः सा यजमानस्य ।२७ ॥8॥

[1] L. P. Here ends *Khaṇḍa* 7 [2–2] L. P. वा एतद्यज्ञस्य [3–3] L. P. प्राणाश्छन्दांसि शीर्षंस्तत्प्राणं दधाति सदस्युक्थानि शस्यन्त [4] P. अन्न [5] P. एनं [6–6] L. P. तस्माद् बह्वृच एवानुब्रूयात्

अथो त्रीणि वा एतानि साहस्राण्यधियज्ञम् ।१। प्रातरनुवाक आश्विनं महाव्रतमिति[1] ।२। एतदुक्थं[2] महारात्रे[3] उपाकुर्यात् पुरा वाचो विसर्गात् ।३। यत्रैतत् पशवो मनुष्या वयांसीति वाचं व्यालभन्ते पुरा ततः ।४। वाचं ह वा एतद् भूतान्याप्याययन्ति यद् वाचंयमानि शेरते ।५। आपीनां वाचमव्यासिक्तां प्रथमत ऋध्नवानीति[4] ।६। न प्रातरनुवाकं चोपांश्वन्तर्यामौ चान्तरेण वाचं विसृजेत ।७। प्राणापानौ वा उपांश्वन्तर्यामौ ।८। वाक् प्रातरनुवाकः ।९। नेत् प्राणापानौ च वाचं चान्येनान्तर्दधानीति ।१०। तद्धैके कश्छन्दसां[5] योगमावेद धीर इति जपित्वाथापो रेवतीः [6–]क्षयथा हि वस्व[–6] इति प्रतिपद्यन्ते ।११। नापो रेवत्यै पुरस्तात् किंचन परिहरेदिति ।१२। तदिह स्थितमनाव्रस्काय तदिह स्थितमनाव्रस्काय[7] ।१३ ॥9॥

[1] L. P. omit [2] L. P. महदुक्थं [3] L. (var.), P. महारात्रम् [4] L. P. ऋध्नवामेति [5] L. P. छन्दसां [6–6] L. P. omit [7] L. P. Here ends *Khaṇḍa* 8

## इति द्वितीयदशके प्रथमोऽध्यायः

यज्ञो वा आपः ।१। [1–]तद् यदपोऽच्छ यन्ति[–1] ।२। यज्ञमेव [2–]तदच्छ यन्ति[–2] ।३। अथो ऊर्वा आपो रसः ।४। और्जेनैव[3] तद् रसेन हविः संसृजन्ति ।५। अथो अमृतत्वं वा आपः ।६। अमृतत्वमेव तदात्मन् धत्ते ।७। तद्ध स्म वै पुरा यज्ञमुहो रक्षांसि तीर्थेष्वपो गोपायन्ति ।८। तद् ये के चापोऽच्छ जग्मुः ।९। तदेव तान्त्सर्वान् जघ्नुः ।१०। तत एतत् कवषः सूक्तमपश्यत् पञ्चदशर्चं[4] प्र देवत्रा ब्रह्मणे गातुरेत्विति ।११। तदन्वब्रवीत् ।१२। तेन यज्ञमुहो रक्षांसि तीर्थेभ्योऽपाहन् ।१३। तत उ हैतदर्वाक् स्वस्त्यरिष्ट्याः[5] पुनः प्रत्यायन्ति ।१४। अथादोऽमुत्राप्स्वध्वर्युराहुतिं जुहोति ।१५। तां संप्रत्येतामनुब्रूयात् ।१६ ॥1॥

[1–1] L. यदप उच्छ्रयन्ति; L. (var.), P. यदपोच्छ्रयन्ति; C. reports a reading अपो यच्छन्ति
[2–2] L. P. तदुच्छ्रयन्ति [3] L. ऊर्जेव; L. (var.) ऊर्जेनैव, ऊर्जमेव; P. ऊर्जेनैव; BM[2]. ऊर्जेनेव
[4] ER. omits [5] L. P. स्वस्तिरिष्ट्या:; L. (var.) स्वस्त्यरिष्ट्या; IO. स्वस्त्यरिष्टा:

हिनोता नो अध्वरं देवयज्येति[1] ।१। तस्या एवैषा याज्या देवयज्येत्यभिरूपा ।२। आववृततीरध नु द्विधारा इत्यावृत्तासु ।३। प्रति यदापो अदृश्रमायतीरिति प्रतिख्यातासु ।४। समन्या यन्त्युप यन्त्यन्या इति समायतीषु[2] ।५। आपो न देवीरुप यन्ति होत्रियमिति होतृचमसेऽवनीयमानासु ।६। आ धेनवः पयसा तूर्ण्यर्था[3] इति ।७। आपो वै धेनवः ।८। आपो हीदं सर्वं धिन्वन्ति[4] ।९। अथाध्वर्युर्होतारमभ्यावृत्य तिष्ठति ।१०। तं होता पृच्छत्यध्वर्यवैषीरप३ः इति ।११। ऐषीर्यज्ञमित्येवैनं तदाह ।१२। उतेमनन्नमुरिति[5] प्रत्याह ।१३। अविदाम तद् यदास्यैषोष्मानंसत[6] तस्मा इत्येवैनं तदाह ।१४। प्रत्युक्तो होतैतं निगदं प्रतिपद्यते ।१५। ऊर्ग् वै रसो निगदः ।१६। और्जमेव तद् रसं निगदेन हविषि दधाति[7] ।१७। अम्बयो यन्त्यध्वभिरिति ।१८। आपो वा अम्बयः ।१९। अपो[8] हि यतीः स्तौति ।२०। एमा अग्मन् रेवतीर्जीवधन्या इत्यागतासु ।२१। आग्मन्नाप उशतीर्बर्हिरेदमित्यागतवत्या परिदधाति ।२२। अभिरूपा अन्वाह ।२३। यद् यज्ञेऽभिरूपं तत् समृद्धं यज्ञस्यैव समृद्ध्यै ।२४ ॥2॥

[1] P. देवयज्ययेति [2] L. P. add यन्ति वा आप उपयन्त्यन्या [3] L. तूर्ण्यर्थं [4] L. P. हिन्वन्ति
[5] L. P. °वन° [6] L. यदास्वप्स्वैषिष्मानंसत; (var.) °षीष्माणंसत, षीष्माणंसतस्; P. यदास्वप्स्वै शीर्ष्माणं सत [7] L. P. Here ends *Khaṇḍa* 1 [8] IO. आपो

अनूक्तः प्रातरनुवाक आसीत् ।१। अप्राप्तान्युक्थान्यासन्[1] ।२। तानेतस्मिन्त्संधावसुरा उपायन्[2] ।३। ते देवाः प्रतिबुध्य बिभ्यत एतं त्रिःसमृद्धं वज्रमपश्यन् ।४। आप



इति तत् प्रथमं वज्ररूपम् ।५। सरस्वतीति तद् द्वितीयं वज्ररूपम् ।६। पञ्चदशर्चं भवति ।७। तत् तृतीयं वज्ररूपम् ।८। एतेन वै देवास्त्रिःसमृद्धेन वज्रेणैभ्यो लोकेभ्योऽसुराननुदन्त ।९। तथो एवैतद् यजमान एतेनैव त्रिःसमृद्धेन वज्रेणैभ्यो लोकेभ्यो द्विषतो भ्रातृव्यान् नुदते[3] ।१०। माध्यमाः सरस्वत्यां सत्रमासत ।११। तद्धापि कवषो मध्ये निषसाद ।१२। तं हेम उपोदुः ।१३। दास्या वै त्वं पुत्रोऽसि न वयं त्वया सह भक्षयिष्याम इति ।१४। स ह क्रुद्धः प्रद्रवन्त्सरस्वतीमेतेन सूक्तेन तुष्टाव ।१५। तं हेयमन्वियाय[4] ।१६। तत उ हेमे निरागा इव मेनिरे ।१७। तं हान्वाद्रुत्योचुः[5] ।१८। ऋषे [6–]नमस्ते अस्तु[–6] मा नो[7] हासीः[8] ।१९। त्वं वै नः श्रेष्ठोऽसि ।२०। यं त्वेयमन्वेतीति ।२१। तं ह ज्ञपयांचक्रुः ।२२। तस्य ह क्रोधं विनिन्युः ।२३। स एष कवषस्यैव[9] महिमा सूक्तस्य चानुवेदिता ।२४ ॥3॥

[1] L. P. (var.) अप्राप्ता उक्था° [2] L. P. उदायन् [3] L. P. Here ends *Khaṇḍa* 2
[4] L. °मन्वेयाय [5] L. P. हान्वावृत्यो°; L. (var.) हान्वानृत्यो° [6–6] L. नमस्तेऽस्तु
[7] L. (var.) मा [8] L. P. हिंसी: [9] L. °स्यैष

अथ यत् सह पत्नीभिर्यन्ति ।१। गन्धर्वा ह वा इन्द्रस्य सोममप्सु प्रत्याहिता[1] गोपायन्ति ।२। त उ ह स्त्रीकामाः ।३। ते हासु मनांसि कुर्वते ।४। तद् यथा प्रमत्तानां यज्ञमाहरेदेवं तत् ।५। उपनामुक उ एवैनं यज्ञो भवति[2] ।६। [3–]ता वै[–3] विंशतिमन्वाह ।७। ता विराजमभिसंपद्यन्ते ।८। वैराजीर्वा आपः ।९। अन्नं विराळन्नमापः ।१०। अन्नेन तदन्नाद्यं समर्धयति ।११। त्रिः प्रथमया त्रिरुत्तमया चतुर्विंशतिः संपद्यन्ते ।१२। चतुर्विंशत्यक्षरा गायत्री ।१३। गायत्री प्रातःसवनं वहति ।१४। तदु ह [4–]प्रातःसवनरूपान्नापैति ।१५। इति न्वापोनप्त्रीयस्य[–4] ।१६ ॥4॥

[1] L. प्रत्यायिता; (var.) प्रत्यायेता [2] L. P. add य एवं वेद [3–3] L. omits
[4–4] L. P. प्रात:सवनरूपा न्वाप इतीति न्वा अपोनप्त्रियस्य here ends *Khaṇḍa* 3

अथ वा उपांशुः प्राण एव ।१। तं हूयमानमनुप्राण्यात् प्राणं मे पाहि प्राणं मे जिन्व स्वाहा त्वा सुभव सूर्यायेति ।२। स एव तस्य [1–]वषट्कारः स[–1] स्वाहाकारः ।३। न ह वै ता आहुतयो देवान्[2] गच्छन्ति या अवषट्कृता वास्वाहाकृता वा भवन्ति ।४। अन्तर्यामोऽपान एव ।५। तं हूयमानमन्ववान्यादपानं मे पाह्यपानं मे जिन्व स्वाहा त्वा सुभव सूर्यायेति ।६। स एव तस्य [1–]वषट्कारः स[–1] स्वाहाकारः ।७। न ह वै ता आहुतयो देवान्

गच्छन्ति या अवषट्कृता वास्वाहाकृता वा भवन्ति ।८। तौ वा एतौ प्राणापानावेव यदुपांश्वन्तर्यामौ ।९। तयोर्वा उदितेऽन्यमनुदितेऽन्यं जुह्वति ।१०। इमावेव तत् प्राणापानौ वितारयति[3] ।११। तस्माद्धीमौ प्राणापानौ सह सन्तौ नानेव ।१२। यद्वेवोदितेऽन्यमनुदितेऽन्यं जुह्वति ।१३। अहोरात्राभ्यामेव तदसुराननन्तरयन्ति[4] ।१४। उभयतो ह्यमुमादित्यमहोरात्रे पाप्मानं वा यजमान इति ह स्माह ।१५। अथ यस्यैता उभा उदिते जुह्वत्युभौ वाऽनुदिते ।१६। उदकयाजी स न सोमयाजी ।१७। यस्यैवैतौ यथायथं हूयेते स सोमयाजी[5] ।१८। इति न्वा उपांश्वन्तर्यामयोः[6] ।१९ ॥5॥

[1-1] L. (var.) वषट्कारस्य, वषट्कारश्च; P. वषट्कारस्य [2] IO. omits [3] L. वितारयन्ति
[4] L. °नन्तर्यन्ति (reports that all MSS. read as here) [5] L. (var. excepting IO.) P. सोमयाजीति [6] L. P. Here ends *Khaṇḍa* 4

अनूत्थेयः पवमानो न३ इति ।१। नानूत्थेय इत्याहुः ।२। ऋच एतदायतनं यत्रैतद्धोतास्ते ।३। अथादः[1] साम्नो यत्रामी साम गायन्ति ।४। स योऽनूत्तिष्ठति ।५। ऋचं स स्वादायतनाच्च्यवयति ।६। ऋचं स साम्नोऽनुवर्त्मानं[2] करोति ।७। तस्मादु नानूत्तिष्ठेत् ।८। नेदृचं स्वादायतनाच्च्यवयानीति ।९। नेदृचं साम्नोऽनुवर्त्मानं[3] करवाणीति ।१०। यदि तु स्वयं होता स्यात् ।११। अनूत्तिष्ठेत् ।१२। औपगात्रं ह्यस्य भवति ।१३। स्वर्गो वै लोकः स्वरः[4] साम ।१४। स्वर्गे लोके स्वरे सामन्यात्मानमतिसृजा इति ।१५। अथ पवमाने ह वा उ प्रातः सर्वा देवताः संतृप्यन्ति[5] ।१६। कथं तत्रापरिभक्षितो भवतीति ।१७ ॥6॥

[1] L. P. अथातः [2] L. (var.) °नुवर्तमानं [3] P. °नुवर्तमानं [4] L. P. स्वर [5] L. P. संतृप्यन्ते

स स्तुते पवमान एतं जपं जपेत् ।१। उपहूता देवा अस्य सोमस्य पवमानस्य विचक्षणस्य भक्ष उप मां देवा ह्वयन्तामस्य सोमस्य पवमानस्य विचक्षणस्य भक्षे मनसा त्वा भक्षयामि वाचा त्वा भक्षयामि प्राणेन त्वा भक्षयामि चक्षुषा त्वा भक्षयामि श्रोत्रेण त्वा भक्षयामीति ।२। स एष देवैः समुपहवः ।३। तथा हास्यासौ सोमो राजा विचक्षणश्चन्द्रमा भक्षो भक्षितो भवति ।४। यममुं देवा भक्षं भक्षयन्ति[1] ।५। अथ पशुः ।६। सोम एवैष प्रत्यक्षं यत् पशुः ।७। उदकपेयमिव[2] हि स्याद् यदेष नालभ्येत[3] ।८। सवनान्येतेन तीव्रीकरोति ।९। तद् यद् वपया चरन्ति ।१०। तेन प्रातःसवनं तीव्रीकृतम् ।११।



यच्छ्रपयन्ति यत् पशुपुरोळाशेन चरन्ति ।१२। तेन माध्यंदिनं सवनं तीव्रीकृतम् ।१३। अथ यदेनेन तृतीयसवने प्रचरन्ति ।१४। तेन तृतीयसवनं तीव्रीकृतम् ।१५। स एष सवनानामेव तीव्रीकारः ।१६। याश्च सोमपा देवताः ।१७। याश्च पशुभाजनाः ।१८। त्रयस्त्रिंशद् वै सोमपा देवताः ।१९। याः सोमाहुतीरन्वायत्ताः ।२०। अष्टौ वसव एकादश रुद्रा द्वादशादित्या इन्द्रो द्वात्रिंशः[4] ।२१। प्रजापतिस्त्रयस्त्रिंशः[5] ।२२। त्रयस्त्रिंशत् पशुभाजनाः ।२३। ता उभय्यः प्रीता भवन्ति यदेष[6] आलभ्यते ।२४ ॥7॥

[1] L. P. Here ends *Khaṇḍa* 5 [2] L. (var.) °मेव [3] L. (var.) आलभ्येत, आलभ्यते; P. आलभ्यते [4] P. द्वात्रिंशत् [5] P. °स्त्रिंशत् [6] L. य एष; (var.) यदेष

तमेतमैन्द्राग्नः स्यादिति हैक आहुः ।१। इन्द्राग्नी वै सर्वे देवाः ।२। तदेनेन सर्वान् देवान् प्रीणातीति वदन्तः ।३। तदु वा आहुरति तदिन्द्रं भाजयन्ति[1] ।४। आग्नेय एवैष स्यात् ।५। ऐन्द्राः पुरोळाशाः ।६। तत् सममिन्द्राग्नी भजेते इति ।७। अग्नेर्वै प्रातःसवनम् ।८। प्रातःसवन एष आलभ्यते ।९। अग्नेर्वा एतं सन्तमन्यस्मै हरन्ति येऽन्यदेवत्यं कुर्वन्ति ।१०। तद् यथान्यस्य सन्तमन्यस्मै हरेदेवं तत् ।११। अपि केवलं संवत्सरं संवत्सरसदामाग्नेय एव न च्यवेतेति ।१२। तद्धिहैक[2] आहुः ।१३। शिक्षायामेवावधृत आग्नेयः[3] ।१४। तस्य भुवो यज्ञस्य रजसश्च नेतेति[4] वपायै याज्या ।१५। प्र वः शुक्राय भानवे भरध्वमिति शुक्रवती पुरोळाशस्य ।१६। प्र कारवो मनना वच्यमाना इति हविष्मती हविषः ।१७। एकादशिनीस्त्वेवान्वायातयेयुरिति[5] सा स्थितिः ।१८। यदि पृष्ठोपायं[6] भवति ।१९ ॥8॥

[1] L. P. omit अति तदिन्द्रं भाजयन्ति [2] L. P. तद्धचुहैक [3] L. P. Here ends *Khaṇḍa* 6
[4] L. P. add भुवद्वती [5] L. P. एकादशिनीं त्वेवा° [6] L. पृष्ट्योपायं; (var.) as here

अथावाहने ।१। आ वह देवान् यजमानाय ।२। अग्निमग्न आ वह वनस्पतिमा वहेन्द्रं वसुमन्तमा वहेति ।३। तत् प्रातःसवनमावाहयति ।४। इन्द्रं रुद्रवन्तमा वहेति ।५। तन्माध्यंदिनं सवनमावाहयति ।६। इन्द्रमादित्यवन्तमृभुमन्तं विभुमन्तं वाजवन्तं बृहस्पतिवन्तं[1] विश्वदेव्यावन्तमा वहेति ।७। तत् तृतीयसवनमावाहयति ।८। अत उ हैके वनस्पतिमावाहयन्ति ।९। अन्तत आवाह्यः ।१०। तृतीयसवने ह्येनं यजन्तीति वदन्तः ।११। तदु वा आहुरात्मा वै पशुः ।१२। प्राणो वनस्पतिः ।१३। यस्तं तत्र ब्रूयात् ।१४। प्राणादात्मानमन्तरगान्न जीविष्यतीति[2] तथा ह स्यात् ।१५। तस्मात् पशुमेवोपसंधाय वनस्पतिरावाह्यः ।१६। मीमांसितः पशुः[3] ।१७। प्रजापतिः प्रजाः सृष्ट्वा रिरिचान

इवामन्यत ।१८। स हैक्षत ।१९। कथं नु तेन यज्ञक्रतुना यजेय येनेष्ट्वोप कामानाप्नुयामवान्नाद्यं रुन्धीयेति ।२०। स एतामेकादशिनीमपश्यत् ।२१। तामाहरत् तयायजत ।२२। तयेष्ट्वोप कामानाप्नोदवान्नाद्यमरुन्धत[4] ।२३। तथो एवैतद् यजमान एतयैवैकादशिन्येष्ट्वोप कामानाप्नोत्यवान्नाद्यं रुन्धे ।२४ ॥9॥

[1] L. P. °तिमन्तं  [2] BM¹. omits इति  [3] L. P. Here ends *Khaṇḍa* 7  [4] L. °मरुन्ध; P. °मरुन्धत्

तस्यै वा एतस्या एकादशिन्यै याज्यापुरोनुवाक्याश्चैव नाना ।१। मनोतायै च हविषः ।२। अथेतरत् समानम् ।३। आग्नेयः प्रथमः ।४। ब्रह्म वा अग्निः ।५। ब्रह्मयशसस्यावरुद्ध्यै ।६। सारस्वतो द्वितीयः ।७। वाग् वै सरस्वती ।८। वाचा वा इदं स्वदितमन्नमद्यतेऽन्नाद्यस्योपाप्त्यै ।९। सौम्यस्तृतीयः ।१०। क्षत्रं वै सोमः ।११। क्षत्रयशसस्यावरुद्ध्यै ।१२। पौष्णश्चतुर्थः ।१३। अन्नं वै पूषा ।१४। अन्नाद्यस्योपाप्त्यै ।१५। बार्हस्पत्यः पञ्चमः ।१६। ब्रह्म वै बृहस्पति : ।१७। ब्रह्मयशसस्यावरुद्ध्यै ।१८। वैश्वदेवः षष्ठः ।१९। विश्वरूपं वा इदमन्नमद्यतेऽन्नाद्यस्योपाप्त्यै ।२०। ऐन्द्रः सप्तमः ।२१। क्षत्रं वा इन्द्रः ।२२। क्षत्रयशसस्यावरुद्ध्यै ।२३। मारुतोऽष्टमः ।२४। आपो वै मरुतः ।२५। अन्नं वा[1] आपः ।२६। अन्नाद्यस्योपाप्त्यै ।२७। ऐन्द्राग्नो नवमः ।२८। ब्रह्मक्षत्रे वा इन्द्राग्नी ।२९। ब्रह्मयशसस्य च क्षत्रयशसस्य चावरुद्ध्यै ।३०। सावित्रो दशमः ।३१। सवितृप्रसूतं वा इदमन्नमद्यतेऽन्नाद्यस्योपाप्त्यै ।३२। वारुण एकादशः ।३३। क्षत्रं वै वरुणः ।३४। क्षत्रयशसस्यावरुद्ध्यै ।३५। एवं वै प्रजापतिर्ब्रह्मणा च क्षत्रेण च क्षत्रेण च ब्रह्मणा चोभयतोऽन्नाद्यं परिगृह्णानोऽवरुन्धान ऐत् ।३६। तथो एवैतद् यजमान एवमेव ब्रह्मणा च क्षत्रेण च क्षत्रेण च ब्रह्मणा चोभयतोऽन्नाद्यं परिगृह्णानोऽवरुन्धान एत्यवरुन्धान एति[2] ।३७ ॥10॥

[1] L. P. omit  [2] L. P. Here ends *Khaṇḍa* 8

## इति द्वितीयदशके द्वितीयोऽध्यायः



प्रजापतिर्वै यज्ञः ।१। तस्मिन्त्सर्वे कामाः सर्वममृतत्वम् ।२। तस्यैते गोप्तारो यद्धिष्ण्याः ।३। तान्त्सदः प्रसृप्स्यन् नमस्यति नमो नम इति ।४। न हि नमस्कारमति देवाः ।५। ते नमसिता होतारमतिसृजन्ते ।६। स एतं प्रजापतिं यज्ञं प्रपद्यते ।७। तदत्रैव यजमानः सर्वान् कामानाप्नोति[1] सर्वममृतत्वम्[2] ।८। अथ हविष्पङ्क्त्या चरन्ति ।९। पशवो वै हविष्पङ्क्तिः ।१०। पशूनामेवाप्त्यै ।११। तानि वै पञ्च हवींषि भवन्ति ।१२। दधि धानाः सक्तवः पुरोळाशः पयस्येति ।१३। पञ्चपदा पङ्क्तिः ।१४। पाङ्क्तो यज्ञः ।१५। पाङ्क्ताः पशवः ।१६। पाङ्क्तः पुरुषः ।१७। यज्ञस्य च पशूनां चाप्त्यै ।१८। सेयं[3] निरुप्यते पशूनामेव परिग्रहाय ।१९। अथो सवनानामेव तीव्रीकाराय ।२०। अथ वै हविष्पङ्क्तिः प्राण एव ।२१। तस्माद् येनैव मैत्रावरुणः प्रेष्यति तेन होता यजति ।२२। समानो ह्ययं प्राणः ।२३ ॥1॥

[1] L. P. Here ends *Khaṇḍa* 1  [2] L. P. omit  [3] ER. सोऽयं

तदाहुर्यया वै प्रातर्यजत्यृक् सा तदहर्यातयामा भवत्यथ कस्मादेषा सर्वेषु सवनेष्वयातयामेति ।१। यदेव सवनैर्वितारयन्नेति ।२। प्रातः प्रातःसावस्येति[1] प्रातःसवने ।३। माध्यंदिनस्य सवनस्येति[2] माध्यंदिने सवने ।४। तृतीयस्य सवनस्येति तृतीयसवने ।५। तेनायातयामा ।६। तदाहुः कस्मात् प्रातरेव पयस्या न माध्यंदिने[3] न तृतीयसवन इति ।७। यज्ञो वै मैत्रावरुणः ।८। एतद् वै यज्ञो जायते यत् प्रातःसवने ।९। पयोभाजनो वै तरुणः कुमारः ।१०। तद् यथा जाताय स्तनमुपदध्यादेवं तत् ।११। वृद्धो वा उत्तरयोः सवनयोः ।१२। यदा वै वर्धते ।१३। अतिस्तनो वै तदा ।१४। तस्मात् प्रातरेव पयस्या न माध्यंदिने[3] न तृतीयसवन इति ।१५ ॥2॥

[1] L. °सवनस्येति  [2] IO. सवनस्य  [3] L. P. मध्यन्दिने

हविरग्ने वीहीत्यनुसवनं पुरोळाशस्विष्टकृतो यजति ।१। अवत्सारो ह प्राश्रवणो[1] देवानां होतास ।२। तमेतस्मिन् द्युम्ने मृत्युः प्रत्यालिल्ये ।३। अग्निर्वै मृत्युः ।४। स हविरग्ने वीहीति हविषाग्निं प्रीत्वाथातिमुमुचे ।५। तथो एवैवंविद्वान्[2] होता हविरग्ने वीहीत्येव हविषाग्निं प्रीत्वाथातिमुच्यते ।६। एतैर्ह वा अन्तराकाशैर्देवाः स्वर्गँल्लोकं जग्मुः ।७। तानेतस्मिन् द्युम्ने मृत्युः प्रत्यालिल्ये ।८। अग्निर्वै मृत्युः ।९। ते हविरग्ने वीहीति हवि-

षाग्निं प्रीत्वाथातिमुमुचिरे ।१०। तथो एवैवंविद्वान् होता हविरग्ने वीहीत्येव हविषाग्निं प्रीत्वाथातिमुच्यते ।११। तानि वा एतानि षळक्षराणि हविरग्ने वीहीति ।१२। षळङ्गो ऽयमात्मा षड्विधः ।१३। तदात्मनैवात्मानं निष्क्रीयानृणो भूत्वाथ यजते ।१४। स एषो ऽवत्सारस्य प्राश्रवणस्य[3] मन्त्रः ।१५। स न मन्येत केन वा नु केन वा यजामीति[4] ।१६। ऋषिकृतेन मन्त्रेणर्चा यजामीत्येव[5] विद्यात्[6] ।१७। अथ सोम इति वै पशुमवोचाम ।१८। एवं पुरोळाशान् ।१९ ॥3॥

[1] L. प्रास्रवणो; (var.) प्राश्रवणो [2] L. P. एवं विद्वान् [3] L. प्रास्रवणस्य; (var.) प्राश्रवणस्य
[4] L. P. यजा इति [5] L. P. यजानीत्येवं [6] L. P. Here ends *Khaṇḍa* 3.

दश त्वा[1] एते सोमांशवः ।१। प्रन्नोंऽशुर्यमेतमभिषुण्वन्ति ।२। तृप्तोंऽशुरापः ।३। रसोंऽशुर्व्रीहिः ।४। वृषोंऽशुर्यवः ।५। शुक्रोंऽशुः पयः ।६। जीवोंऽशुः पशुः ।७। अमृतोंऽशुर्हिरण्यम् ।८। ऋगंशुर्यजुरंशुः सामांशुरिति ।९। एते वा उ दश सोमांशवः ।१०। यदा वा एते सर्वे संगच्छन्ते ।११। अथ सोमोऽथ सुतः[2] ।१२। पुरोळाशैश्चरित्वा द्विदेवत्यैश्चरन्ति ।१३। आत्मा वै यजमानस्य पुरोळाशाः ।१४। प्राणा द्विदेवत्याः ।१५। तद् यत् पुरोळाशैश्चरित्वा द्विदेवत्यैश्चरन्ति[3] ।१६। तथा ह यजमानः सर्वमायुरस्मिँल्लोक एत्याप्नोत्यमृतत्वमक्षितिं स्वर्गे लोके[4] ।१७। [5–]ते वा एते प्राणा एव यद् द्विदेवत्याः[–5] ।१८। वागेवेन्द्रः[6] ।१९। प्राणो वायुः ।२०। चक्षुर्मैत्रावरुणः ।२१। श्रोत्रमाश्विनः ।२२ ॥4॥

[1] L. P. न्वा [2] L. P. Here ends *Khaṇḍa* 4 [3] L. P. add प्राणानेव तद्यजमाने दधति (L. var. दधाति) सर्वायुत्वायास्मिँल्लोकेऽमृतत्वायामुष्मिन् [4] L. P. add ऐन्द्रवायवः प्रथमो
[5–5] L. P. omit here, but add after श्रोत्रमाश्विनः [२२] [6] L. P. वाग्वा इन्द्रः

तस्मादनवानं यजति प्राणानां संतत्यै ।१। संतता इव हीमे प्राणाः ।२। नानुवषट्करोति ।३। प्राणा वै द्विदेवत्याः ।४। संस्थानुवषट्कारः ।५। नेत् पुरा कालात् प्राणान्त्संस्थापयानीति[1] ।६। यक्ता इव हीमे प्राणाः ।७। ऐन्द्रवायवं पूर्वार्धे[2] सादयति ।८। पूर्वार्ध्यो[3] ह्येष एषां प्राणानामभिधानतम[4] इव ।९। अभित इतरौ पश्चादुपनिदधाति ।१०। अभित इव हीदं चक्षुश्च श्रोत्रं च ।११। तानवगृह्यास्ते ।१२। नेत् प्रवृत्तान्ता[5] इति ।१३। नापिदधाति ।१४। प्राणा वै द्विदेवत्याः ।१५। नेत् प्राणानपिदधानीति[6] ।१६। इदं ते सोम्यं मध्विति प्रस्थितानां याज्या मधुश्चुतां[7] मधुमती ।१७। अनुवषट्करोत्याहुतीनामेव शान्त्यै ।१८। आहुतीनां प्रतिष्ठित्यै ।१९। अथ होत्राः संयजन्ति ।२०। यजमानमेव तदनृणतायै[8]



संप्रमुञ्चन्ति ।२१। द्विदेवत्यानां प्रथमो भक्षः ।२२। अथेळाथ होतृचमसः ।२३। आत्मा वै यजमानस्य पुरोळाशाः ।२४। प्राणा द्विदेवत्याः ।२५। अन्नं पशव इळा ।२६। अन्नेन वै प्राणाश्चात्मा च संहितः ।२७। तस्माद् द्विदेवत्यानां प्रथमो भक्षः ।२८। अथेळाथ होतृचमसः ।२९। तानध्वर्यवे प्रयच्छति ।३०। नानुसृजत्या शेषस्यावनयनात्[9] ।३१। प्राणा वै द्विदेवत्याः ।३२। नेत् प्राणाननुसृजानीति ।३३। द्विरैन्द्रवायवस्य भक्षयति ।३४। द्विर्हि तस्य वषट्करोति ।३५। सकृन्मैत्रावरुणस्य ।३६। सकृदाश्विनस्य ।३७। सर्वतः परिहारमाश्विनस्य भक्षयति ।३८। सर्वतो ह्यनेन श्रोत्रेण शृणोति ।३९ ॥5॥

[1] IO. P. प्राणं सं० [2] L. P. पूर्वार्ध्यं [3] BM¹. पूर्वार्धो [4] L. P. ०धानत [5] L. P. प्रवर्तन्ता
[6] L. P. Here ends *Khaṇḍa* 5 [7] L. (var.) मधुश्र्युतां [8] L. P. तदृणतायै; L. (var.) तदनृणतायै [9] L. P. read only नानुसृजति (omit आ शेषस्यावनयनात्)

संस्रवान् होतृचमसेऽवनयति ।१। इळाभाज एवैनाँस्तत् करोति[1] ।२। अथोळामुपह्वयते ।३। [2–]उपोद्यच्छन्ति चमसान् ।४। होतृचमसमन्वारभते ।५। असंस्पर्शयन्नुपह्वयत इळाम्[–2] ।६। वज्रो वा आज्यम् ।७। रेतः सोमः ।८। नेद् वज्रेण रेतो हिनसानीति ।९। तस्यां न सुन्वदाह ।१०। नाशिषो निराह ।११। उपहूयेळामवघ्रायावस्यति ।१२। प्राश्नात्युत्तरेळाम् ।१३। अथाप आचम्य होतृचमसं भक्षयति ।१४। एतद् वै परममन्नाद्यं यत् सोमः ।१५। परममेवैतदन्नाद्यं सर्वे समुपहूय भक्षयन्ति[3] ।१६। अथ वै प्रत्युपहवोऽच्छावाकस्य ।१७। प्रत्येता वामा सूक्तायं सुन्वन् यजमानोऽग्रभीत् ।१८। उत प्रतिष्ठोतोपवक्तरुत नो गाव उपहूता इति ।१९। यदि नोपजुहूषति ।२०। उतोपहूत इत्यभ्यस्यति यद्युपजुहूषते[4] ।२१। प्रत्युपहूतोऽच्छावाको नि वर्तध्वं मानु गातेत्येतस्य सूक्तस्य यावतीः पर्याप्नुयात् तावतीरनुद्रवेत् ।२२। होता वाच्छावाकमप्रतिकामिनम्[5] ।२३। सो[6] तत्र प्रायश्चित्तिः[7] ।२४ ॥6॥

[1] L. P. Here ends *Khaṇḍa* 6 [2–2] L. P. omit; but instead read दक्षिणेनोत्तरेडां धारयन्त्सव्येन होतृचमसं च पात्रीं च संयच्छत्यसंस्पर्शयन् [3] L. P. Here ends *Khaṇḍa* 7
[4] L. ०जुहूषति [5] L. P. वाप्रतिकामिनमच्छावाकं [6] P. सा [7] L. P. Here ends *Khaṇḍa* 8

प्राणा वा ऋतुयाजाः ।१। तद् यदृतुयाजैश्चरन्ति ।२। प्राणानेव तद् यजमाने दधति ।३। स वा अयं त्रेधा विहितः प्राणः प्राणोऽपानो व्यान इति ।४। षळृतुनेति यजन्ति ।५।

प्राणमेव तद् यजमाने दधति ।६। चत्वार ऋतुभिरिति यजन्ति[1] ।७। अपानमेव तद् यजमाने दधति ।८। द्विर्ऋतुनेत्युपरिष्टात् ।९। व्यानमेव तद् यजमाने दधाति[2] ।१०। [3]तथा ह यजमानः सर्वमायुरस्मिँल्लोक एत्याप्नोत्यमृतत्वमक्षितिं स्वर्गे लोके ।११। ते वा एते प्राणा एव यदृतुयाजाः ।१२। तस्मादनवानं यजन्ति प्राणानां संतत्यै ।१३। संतता इव हीमे प्राणाः ।१४। नानुवषट्कुर्वन्ति ।१५। प्राणा वा ऋतुयाजाः ।१६। संस्थानुवषट्कारः ।१७। नेत् पुरा कालात् प्राणान्त्संस्थापयामेति[4] ।१८। युक्ता इव हीमे प्राणाः ।१९। तदाहुः कस्माद्धोता यक्षद्धोता यक्षदित्येव सर्वेभ्यः प्रेष्यतीति ।२०। वाग् वै होता ।२१। वाग् यक्षद् वाग् यक्षदित्येव तदाह ।२२। अथो सर्वे वा एते सप्त होतारः ।२३। अपि वा ऋचाभ्युदितम् ।२४। सप्त होतार ऋतुशो यजन्तीति ।२५। अथ यद् द्विरुपरिष्टाद् व्यादिशत्यजामितायै ।२६। ते वै द्वादश भवन्ति ।२७। द्वादश वै मासाः संवत्सरः ।२८। संवत्सरस्यैवाप्त्यै ।२९। स योऽत्र भक्षयेत् ।३०। यस्तं तत्र ब्रूयात् ।३१। अशान्तो भक्षोऽननुवषट्कृतः ।३२। प्राणानस्य[5] व्यगान्न जीविष्यतीति[6] तथा ह स्यात् ।३३। य उ वै न भक्षयेत् ।३४। यस्तं तत्र ब्रूयात् ।३५। प्राणो भक्षः ।३६। प्राणादात्मानमन्तरगान्न जीविष्यतीति तथा हैव[7] स्यात् ।३७। लिम्पेदिवैवावेव जिघ्रेदत्र च द्विदेवत्येषु चेति ।३८। तदु तत्र शासनं वेदयन्ते ।३९। अथ यदमू व्यतिचरतः ।४०। नान्योन्यमनुप्रपद्येते अध्वर्यू ।४१। तस्मादृतुर्ऋतुं नानुप्रपद्यत[8] ऋतुर्ऋतुं नानुप्रपद्यते[9] ।४२ ॥7॥

[1] L. P. omit [2] L. दधति; wrongly states that IO. reads दधति; according to L. all other MSS. read दधाति [3] L. P. here add सर्वायुत्वायास्मिँल्लोकेऽमृतत्वायामुष्मिन् [4] L. P. प्राणान् संस्थापयानीति; IO. प्राणं संस्थापयामीति [5] L. प्राणान्त्स; (var.) प्राणानस्य [6] IO. जीवतीति; BM¹. P. जीविष्यति [7] ER. ह [8] L. °द्यते तस्माद् [9] L. P. Here ends *Khaṇḍa* 9

## इति द्वितीयदशके तृतीयोऽध्यायः



अथात आज्यम् ।१। आज्येन वै देवाः सर्वान् कामानाजयन्त्सर्वममृतत्वम् ।२। तथो एवैतद् यजमान आज्येनैव सर्वान् कामानाजयति सर्वममृतत्वम् ।३। तद् वा इदं षड्विधमाज्यम् ।४। तूष्णींजपस्तूष्णींशंसः पुरोरुक् सूक्तमुक्थवीर्यं याज्येति ।५। षळृतुः संवत्सरः षड्विधः ।६। एतेन वै देवाः षड्विधेनाज्येन षळृतुं संवत्सरमाप्नुवन् षड्विधम् ।७। संवत्सरेण सर्वान् कामान्त्सर्वममृतत्वम् ।८। तथो एवैतद् यजमान एतेनैव षड्विधेनाज्येन षळृतुं संवत्सरमाप्नोति षड्विधम् ।९। संवत्सरेण सर्वान् कामान्त्सर्वममृतत्वम् ।१०। अथ यत् पुरस्तात् तूष्णींजपं जपति ।११। स्वर्गो वै लोको यज्ञः ।१२। तद् यत् पुरस्तात् तूष्णींजपं जपति ।१३। स्वस्त्ययनमेव तत् कुरुते स्वर्गस्य लोकस्य समष्ट्यै ।१४। अथैतं तूष्णींशंसमुपांशु शंसति ।१५। सर्वेषामेव कामानामाप्त्यै ।१६। अग्निर्ज्योतिर्ज्योतिरग्निरिति ।१७। तदिमँल्लोकँल्लोकानामाप्नोति ।१८। प्रातःसवनं यज्ञस्य ।१९। इन्द्रो ज्योतिर्ज्योतिरिन्द्र इति ।२०। तदन्तरिक्षलोकँल्लोकानामाप्नोति[1] ।२१। माध्यंदिनं सवनं यज्ञस्य ।२२। सूर्यो ज्योतिर्ज्योतिः सूर्य इति ।२३। तदमुँल्लोकँल्लोकानामाप्नोति ।२४। तृतीयसवनं यज्ञस्य ।२५। अथ वै निविदसावेव योऽसौ तपति ।२६ ॥1॥

[1] IO. तदन्तरिक्षँल्लो°

एष हीदं सर्वं निवेदयन्नेति ।१। सा पुरस्तात् सूक्तस्य प्रातःसवने धीयते ।२। पुरस्ताद्ध्येष तदा भवति ।३। मध्ये सूक्तस्य माध्यंदिने सवने ।४। मध्ये ह्येष तदा भवति ।५। उत्तमाः परिशिष्य तृतीयसवने ।६। पश्चाद्ध्येष तर्हि परिक्रान्तो भवति ।७। तदेतस्यैव रूपेण निविदं दधदेति[1] ।८। तदु वा आहुरञ्जयो वै प्रातःसवनं वहन्ति ।९। शितिपृष्ठा माध्यंदिनं सवनम् ।१०। श्वेतानूकाशास्तृतीयसवनमित्यादित्येनैव ।११। द्वादशपदां पुरोरुचमुपसंशंसति ।१२। द्वादश वै मासाः संवत्सरः ।१३। संवत्सरस्यैवाप्त्यै[2] ।१४। अथ सप्तर्चमाज्यं शंसति ।१५। सप्त वै छन्दांसि ।१६। सर्वेषामेव छन्दसामाप्त्यै ।१७। तद् वा आनुष्टुभं भवति ।१८। वागनुष्टुप् ।१९। तद् यत् किंच वाचानुष्टुभा व्यनूक्तं[3] तत् सर्वमाप्नोति ।२०। पदे विगृह्णाति ।२१। तत् प्रजात्यै रूपम् ।२२। वीव वै स्त्रियै पुमान् गृह्णाति ।२३। यद्वेव विगृह्णाति ।२४। प्रतिष्ठयोस्तद्रूपम्[4] ।२५। अथो[5] एतद्ध वै मृत्योरास्यं यदेते पदे अन्तरेण ।२६। स योऽत्रावानन्तं ब्रूयात् ।२७। मृत्योरास्यमापाति[6] न जीविष्यतीति तथा ह स्यात् ।२८ ॥2॥

[1] L. (var.) दधदिति (wrongly states IO. reading to be so), दधतीति, दधति, दधतेति P. दधतेति [2] L. P. Here ends *Khaṇḍa* 1 [3] L. P. भ्यनूक्तं [4] L. प्रतिष्ठाया° [5] ER. omits [6] L. °मापति; (var.) °मायाति

तस्मादनवानं[1] संक्रामेत् ।१। अमृतं वै प्राणः ।२। अमृतेन तन्मृत्युं तरति ।३। समस्तेनोत्तरेणार्धर्चेन प्रणौति ।४। वज्रमेव तत् पाप्मने भ्रातृव्याय प्रहरति ।५। ता दश गायत्र्यः संपद्यन्ते ।६। अष्टाक्षरं हि दशमं पदम् ।७। गायत्री वै सा यानुष्टुप् ।८। गायत्रमग्नेश्छन्दः ।९। दश प्रातःसवनेऽध्वर्युर्ग्रहान् गृह्णाति ।१०। नवसु बहिष्पवमानेन स्तुवते ।११। हिंकारो दशमः ।१२। दशेमाः ।१३। ते नाना कुर्वन्तो विराजमभिसंपादयन्ति ।१४। एतद् वै कृत्स्नमन्नाद्यं यद् विराळेव[2] ।१५। तत्[3] संपाद्य यजमाने प्रतिदधाति ।१६। त्रिः प्रथमया त्रिरुत्तमयैकादश संपद्यन्ते ।१७। याज्या द्वादशी ।१८। द्वादश वै मासाः संवत्सरः ।१९। संवत्सरस्यैवाप्त्यै ।२०। ताः संशस्ताः षोडश गायत्र्यः संपद्यन्ते ।२१। तद् गायत्रीमाज्यमभिसंपद्यते ।२२। आग्नेन्द्र्या यजति ।२३। इन्द्रमेव तदर्धभाजं सवनस्य करोति ।२४। तस्यां[4] देवता अन्वाभजतेति ह स्माह कौषीतकिः ।२५। त्रयस्त्रिंशदक्षरा वै विराट् ।२६। त्रयस्त्रिंशद् देवताः ।२७। अक्षरभाजो देवताः करोति ।२८। अग्न इन्द्रश्च दाशुषो दुरोण इति पदं परिशिष्य विराजोऽर्धर्चेऽवानिति ।२९। श्रीर्विराळन्नाद्यम् ।३०। श्रियां तद् विराज्यन्नाद्ये प्रतितिष्ठति ।३१। उत्तरेण विराजोऽर्धर्चेन वषट्करोति ।३२। स्वर्ग एव तल्लोके यजमानं दधाति ।३३। अनुवषट्करोत्याहुतीनामेव शान्त्यै ।३४। आहुतीनां प्रतिष्ठित्यै[5] ।३५ ॥3॥

[1] L. P. °स्मात्तद° [2] L. P. विराट् [3] L. P. तदेतत् [4] L. P. याज्यायां [5] L. P. Here ends *Khaṇḍa* 2

शोंसावो इति प्रातःसवन आह्वयते[1] ।१। शोंसामो दैवेत्यध्वर्युः ।२। तान्यष्टावक्षराणि ।३। उक्थमवाचीति प्रातःसवन उपांशु होता ब्रूयात् ।४। उक्थशा इत्यध्वर्युः ।५। तान्यष्टौ ।६। गायत्र्या सवनं प्रतिपद्य गायत्र्यां प्रत्यष्ठाताम् ।७। अध्वर्यो शोंसावो इति माध्यंदिने सवन आह्वयते ।८। शोंसामो दैवेत्यध्वर्युः ।९। तान्येकादशाक्षराणि ।१०। उक्थमवाचीन्द्रायेति माध्यंदिने सवन उपांशु होता ब्रूयात् ।११। उक्थशा इत्यध्वर्युः ।१२। तान्येकादश ।१३। त्रिष्टुभा सवनं प्रतिपद्य त्रिष्टुभि[2] प्रत्यष्ठाताम् ।१४। अध्वर्यो शो शोंसावो इति तृतीयसवनेऽभ्यासमाह्वयते ।१५। शो शोंसामो दैवेत्यध्वर्युः प्रत्यभ्यस्यति[3] ।१६। तानि द्वादशाक्षराणि ।१७। लोमशेन[4] [5–]त्रयोदश ।१८। वाचीन्द्रायोक्थं[–5] देवेभ्य इति तृतीयसवन उपांशु होता ब्रूयात् ।१९। उक्थशा इत्यध्वर्युः ।२०। तानि द्वादश ।२१। संप्रति जगत्या सवनं प्रतिपद्य जगत्यां प्रत्यष्ठाताम् ।२२। एतद् वै तद् यन्मध्य ओप्यते[6] ।२३। स यदि ह वा अपि व्यूळ्हच्छन्दा भवति ।२४। क्लृप्तान्येवैवं विदुषश्छन्दांसि यज्ञं वहन्ति



।२५। अथो एतदेष ऋगभ्यनूक्तेति ह स्माह ।२६। यद् गायत्रे अधि गायत्रमाहितं त्रैष्टुभाद् वा त्रैष्टुभं निरतक्षत ।२७। यद् वा जगज्जगत्याहितं पदं य इत् तद् [7–]विदुस्ते अमृतत्वमानशुरिति[–7] ।२८। अथो यदिमा देवता एषु लोकेष्वध्यूळ्हाः ।२९। गायत्रेऽस्मिँल्लोके गायत्रोऽयमग्निरध्यूळ्हः ।३०। त्रैष्टुभेऽन्तरिक्षलोके त्रैष्टुभो वायुरध्यूळ्हः ।३१। जागतेऽमुष्मिँल्लोके जागतोऽसावादित्योऽध्यूळ्हः[8] ।३२ ॥4॥

[1] L. P. add यच्छुद्धं प्रणवं कुर्वन्ति तदस्य लोकस्य रूपं यन्मकारान्तं तदमुष्य तद्यच्छुद्धं प्रणवं कुर्वन्ति पराङ् वा असौ लोको नेत् पराञ्चो गामेत्यथो प्रजातिर्वा अयं लोकः प्रजात्या एवाथो प्रतिष्ठा वा अयं लोकः प्रतिष्ठित्या एव [2] L. (var.), P. त्रिष्टुब्भिः; IO. त्रिष्टुभिः [3] L. P. omit [4] L. P. रोमशेन [5–5] L. त्रयोदशावाची°; (var.) त्रयोदशमवा°; also as here [6] L. (var.) आप्यते [7–7] L. °स्तेऽमृत°; (var. all MSS. as here) [8] L. P. Here ends *Khaṇḍa* 3

आज्यं शस्त्वा प्रउगं शंसति ।१। आत्मा वै यजमानस्याज्यम् ।२। प्राणाः प्रउगम् ।३। तद् यदाज्यं शस्त्वा प्रउगं शंसति[1] ।४। तथा ह यजमानः सर्वमायुरस्मिँल्लोक एत्याप्नोत्यमृतत्वमक्षितिं स्वर्गे लोके ।५। पवमाने स्तुत आज्यं शंसति ।६। आज्ये स्तुते प्रउगम् ।७। तदेतत् पवमानोक्थमेव[2] यत् प्रउगम् ।८। आज्यमेवाज्यस्योक्थम् ।९। ते एतद् विहरति ।१०। यथा रथस्यान्तरौ रश्मी व्यतिषजेदेवं तत् ।११। ग्रहाननु शंसतीति ह स्माह कौषीतकिः ।१२। योऽसौ वायोरिन्द्रवाय्वोर्ग्रहः ।१३। तं वायव्येन चैन्द्रवायवेन च ।१४। मैत्रावरुणं मैत्रावरुणेन ।१५। आश्विनमाश्विनेन ।१६। यत् प्रस्थितानां यजति तदैन्द्रेण ।१७। यद्धोत्राः संयजन्ति तद् वैश्वदेवेन ।१८। वागेव सरस्वती सर्वेषु सवनेषु ।१९। अथ वै पुरोरुगसावेव योऽसौ तपति ।२०। एष हि पुरस्ताद् रोचते ।२१। अथ वै पुरोरुक् प्राण एवात्मा सूक्तम् ।२२। अथ वै पुरोरुगात्मैव ।२३। प्रजा पशवः सूक्तम् ।२४। तस्मान्न पुरोरुचं च सूक्तं चान्तरेण व्याह्वयेत[3] ।२५। संशस्य[4] पुरोरुचा सूक्तम् ।२६। पुरोरुचे पुरोरुच एवाह्वयते ।२७। वायुरग्रेगास्तत् प्राणरूपम् ।२८। वायवा तदपानस्य रूपम् ।२९ ॥5॥

[1] L. P. add प्राणानेव तद्यजमाने दधाति सर्वायुत्वायास्मिंल्लोकेऽमृतत्वायामुष्मिन् [2] P. IO. पवमानस्योक्थमेव [3] P. व्याह्वयते [4] P. शंसस्य

गायत्रं प्रउगं शंसति ।१। तेन प्रातःसवनमाप्तम् ।२। ऐन्द्रं शंसति ।३। तेन माध्यंदिनं सवनमाप्तम् ।४। वैश्वदेवं शंसति ।५। तेन तृतीयसवनमाप्तम्[1] ।६। अथ वैश्वदेवीं पुरोरुचं शंसति ।७। सा षट्पदा भवति ।८। तां तामृतव[2] इत्याहुः ।९। षड्ढ्यृतवः[3] ।१०। तस्यै

द्वे द्वे पदे अवग्राहं शंसति ।११। तस्माद् द्वन्द्वं समस्ता ऋतव आख्यायन्ते ग्रीष्मो वर्षा हेमन्त इति ।१२। अत्र हैके सारस्वतीं पुरोरुचं शंसन्ति ।१३। न तथा कुर्यात् ।१४। अतिरिक्तं तत् ।१५। रुचिता वै वाक् ।१६। स्वयं पुरोरुग् वै वाक् ।१७। वायवा याहि दर्शताश्विना यज्वरीरिष इत्येते उभे तत् प्रउगं नवर्चं च द्वादशर्चं च ।१८। तदेकविंशतिः ।१९। एकविंशो वै चतुष्टोमः स्तोमानां परमः ।२०। तत् परमं स्तोममाप्नोति ।२१। यद्वे-वैकविंशतिः ।२२। द्वादश[4] मासाः पञ्चर्तवस्त्रय इमे लोकाः ।२३। असावादित्य एकविंशः ।२४। तेनैव तत्सलोकतायां यजमानमध्यूहति ।२५ ॥6॥

[1] L. P. Here ends *Khaṇḍa* 4 [2] L. त्व ऋतव; (var.) त्वामृतव, तामृतव; P. त्वामृतव
[3] L. P. षड्तव: [4] L. P. add वै

तानि वै सप्त तृचानि भवन्ति ।१। सप्त वै छन्दांसि ।२। सर्वेषामेव छन्दसामाप्त्यै ।३। अथो एतैर्वै देवा असुराणां सप्त साप्तान्यवृञ्जत ।४। तथो एवैतद् यजमान एतैरेव द्विषतो भ्रातृव्यस्य सप्त साप्तानि[1] वृङ्क्ते ।५। अग्नेरग्रे प्रातःसवनमासीत् ।६। इन्द्रस्य माध्यंदिनं सवनम् ।७। विश्वेषां देवानां तृतीयसवनम् ।८। सोऽग्निरकामयत ।९। स्यान्मे माध्यंदिने सवनेऽथो तृतीयसवन इति ।१०। इन्द्रोऽकामयत ।११। स्यान्मे प्रातःसवनेऽथो तृतीयसवन इति ।१२। विश्वे देवा अकामयन्त ।१३। स्यान्नो माध्यंदिने सवनेऽथो प्रातःसवन इति ।१४। ता अमुतोऽर्वाच्यो देवतास्तृतीयसवनात् प्रातःसवनमभिप्रायुञ्जत ।१५। तद् यदभि-प्रायुञ्जत ।१६। तत् प्रउगस्य प्रउगत्वम् ।१७। तस्माद् बह्वचो देवताः प्रउगे शस्यन्ते ।१८। तस्मात् सर्वाणि सवनानि सर्वदेवत्यानि भवन्ति ।१९। विश्वेभिः सोम्यं मध्वित्युक्थं शस्त्वा यजति वैश्वदेव्या ।२०। वैश्वदेवं ह्येतदुक्थम् ।२१। गायत्र्या गायत्रं प्रातःसवनम् ।२२। अन्विदु वषट्करवदन्विदु वषट्करवत्[2] ।२३ ॥7॥

[1] P. साप्तान्य [2] L. P. Here ends *Khaṇḍa* 5

## इति द्वितीयदशके चतुर्थोऽध्यायः



देवा वा अर्बुदेन च पावमानीभिश्च ग्राव्णोऽभिष्टुत्याप्नुवन्नमृतत्वम् ।१। आप्नुवन्त्सत्यं संकल्पम् ।२। तथो एवैतद् यजमानो यदर्बुदेन च पावमानीभिश्च ग्राव्णोऽभिष्टौत्याप्नोत्य-मृतत्वम् ।३। आप्नोति सत्यं संकल्पम् ।४। अथ स्तुते पवमाने दधिघर्मेण चरन्ति ।५। अत्र कालो हि भवति ।६। अथो सवनस्यैव सरसतायै ।७। अथ हविष्पङ्क्त्या चरन्ति तस्या उक्तं ब्राह्मणम् ।८। भारद्वाज्या मध्यंदिने प्रस्थितानां यजति[1] ।९। भरद्वाजो ह मध्यंदिन इन्द्राय सोमं प्रददौ ।१०। सा वा ऐन्द्री त्रिष्टुब् भवति ।११। ऐन्द्रं हि त्रैष्टुभं माध्यंदिनं सवनम् ।१२। अनुवषट्करोत्याहुतीनामेव शान्त्यै ।१३। आहुतीनां प्रतिष्ठित्यै ।१४। अथ होत्राः संयजन्ति तासामुक्तं ब्राह्मणम् ।१५। अथेळाथ होतृचमसस्तस्योक्तं ब्राह्मणम् ।१६। हुतेषु दाक्षिणेषु दक्षिणा नीयन्ते ।१७। अत्रापवर्गो ह्यभिषवो भवति ।१८। अथो आत्मानमेवैतन्निष्क्रीणाति यद् दक्षिणा नीयन्ते ।१९। अथो दक्षिणाभिर्वै यज्ञं दक्षयति ।२०। तद् यद् दक्षिणाभिर्वै[2] यज्ञं दक्षयति ।२१। तस्माद् दक्षिणा नाम ।२२। आत्मद-क्षिणं[3] वै सत्रम् ।२३। तस्मादहरहर्जपेयुः ।२४। इदमहं मां कल्याण्यै कीर्त्यै स्वर्गाय लोका-यामृतत्वाय दक्षिणां नयामीति[4] ।२५। आत्मानमेवैतत् कल्याण्यै कीर्त्यै स्वर्गाय लोकाया-मृतत्वाय दक्षिणां नयन्ति ।२६। वैश्वामित्रीं मरुत्वतीयग्रहस्य पुरोनुवाक्यामनूच्य वैश्वा-मित्र्या यजति ।२७। सवनततिर्वै मरुत्वतीयग्रहः ।२८। वाग् वै विश्वामित्रः ।२९। वाचा यज्ञस्तायते ।३०। ते वा ऐन्द्र्चौ[5] त्रिष्टुभौ[6] भवतः ।३१। ऐन्द्रं हि त्रैष्टुभं माध्यंदिनं सवनम् ।३२। अनुवषट्करोत्याहुतीनामेव शान्त्यै ।३३। आहुतीनां प्रतिष्ठित्यै ।३४ ॥1॥

[1] IO. यजन्ति [2] L. P. omit वै [3] IO. आत्मन्दक्षिणं [4] L. P. नयानीति [5] IO. ऐन्द्रौ
[6] IO. त्रिष्टुभो; P. त्रैष्टुभौ

अथ षड्विधं मरुत्वतीयं शंसति ।१। षड् वा ऋतवः संवत्सरः ।२। संवत्सरस्यैवाप्त्यै ।३। अनुष्टुभं गायत्रीं बृहतीमुष्णिहं त्रिष्टुभं जगतीमिति षट् छन्दांसि शंसति ।४। तस्मात् षड्विधं भवति ।५। आ त्वा रथं यथोतय इत्यनुष्टुभा मरुत्वतीयं प्रतिपद्यते ।६। पवमानोक्थं वा एतद् यन्मरुत्वतीयम् ।७। अनुष्टुप् सोमस्य छन्दः ।८। उक्तं पदविग्रहणस्य ब्राह्मणम् ।९। गायत्रीः शंसति ।१०। प्राणो वै गायत्र्यः ।११। प्राणमेव तदात्मन् धत्ते ।१२। इदं वसो सुतमन्ध इत्यनुचरः सुतवान् पीतवान् ।१३। पवमानोक्थं ह्येतत् ।१४। इन्द्र नेदीय एदिहीतीन्द्रनिहवः प्रगाथः ।१५। नेदीय उपनिष्क्रामेति हैनं मरुत ऊचुः प्रधर्षयन्तः[1] ।१६। सोऽब्रवीद्धत्वा वृत्रं विजित्य युष्माभिर्मेऽयं सह सोमपीथ इति ।१७। तैरेवास्यैष सह सोमपीथः ।१८। प्र नूनं ब्रह्मणस्पतिरिरिति[2] ब्राह्मणस्पत्यः प्रगाथः[3] ।१९। प्रहरेति हैनं

ब्रह्मोवाच प्रधर्षयन्[4] ।२०। सोऽब्रवीद्धत्वा वृत्रं विजित्य त्वया मेऽयं सह सोमपीथ इति ।२१। स एष ब्रह्मण एव सोमपीथः ।२२। तस्मिन् देवता अन्वाभजतेति ह स्माह कौषीतकिः ।२३। यस्मिन्निन्द्रो वरुणो मित्रो अर्यमा देवा ओकांसि चक्रिर इति ।२४। अत्र देवता अन्वाभक्ताः ।२५ ॥2॥

[1] L. P. प्रहर्षयन्तः  [2] L. P. add प्रवान्  [3] L. P. omit  [4] L. P. प्रहर्षयन्

तदाहुर्यन्नैव स्तोत्रियो नानुरूप इन्द्रनिहवश्च ब्राह्मणस्पत्यश्च प्रगाथावथ कस्मात् पुनरादायं ककुप्कारं शस्येते इति ।१। पुनरादायं वै सामगाः पवमाने स्तुवते ।२। तस्यैवैतद् रूपं क्रियते ।३। अग्निर्नेता भग इव क्षितीनां त्वं सोम क्रतुभिः सुक्रतुर्भूरित्यग्नीषोमीये ।४। अग्नीषोमौ वा अन्तर्वृत्र आस्ताम् ।५। ताविन्द्रो नाशक्नोदभि वज्रं प्रहर्तुम् ।६। तावेतं भागमुपनिचक्रामताम्[1] ।७। यश्चैनयोरसौ[2] पौर्णमासे ।८। तदेतद् वार्त्रघ्नमेवोक्थं यन्मरुत्वतीयम् ।९। एतेन हीन्द्रो[3] वृत्रमहन्[4] ।१०। पिन्वन्त्यपो मरुतः सुदानव इति पिन्वन्त्यपीया ।११। आपो वै पिन्वन्त्यपीया ।१२। [5–]तद् यदेव वृत्रं[–5] हतमापो व्यायन् ।१३। यत् प्रापिन्वंस्तस्मात् पिन्वन्त्यपीया ।१४। सा वै जगती ।१५। तया सर्वाणि सवनानि जगद्वन्ति भवन्ति ।१६। जनिष्ठा उग्रः सहसे तुरायेति जातवन्मरुत्वतीयम् ।१७। एतद् वा इन्द्रो जायते[6] यद् वृत्रमहन् ।१८। एतदु वा एष जायते यो यजते ।१९। तस्य प्रथमया-मध्वर्युः सकृन्मद्वत् प्रत्यागृणाति ।२०। अत्र हीन्द्रः[7] प्रथममभाद्यत् ।२१ ॥3॥

[1] L. P. °मुपनिराक्रा°  [2] L. (var.) यस्यैन°  [3] L. P. हेन्द्रो  [4] L. P. Here ends *Khaṇḍa* 2  [5–5] ER. तं  [6] L. अजायत (remarks that all MSS. read जायते)  [7] L. P. हेन्द्रः

तदेतत् पृतनाजिदेव सूक्तं यन्मरुत्वतीयम् ।१। एतेन हीन्द्रः[1] पृतना अजयत् ।२। तस्य मध्ये निविदं दधाति ।३। मध्ये वा इदमात्मनोऽन्नं धीयते ।४। अथ निविदः शंसति ।५। प्राणा वै निविदः ।६। प्राणानेव तदात्मन् धत्ते ।७। तासामेकैकं पदमवग्राहं शंसति ।८। एकैकमेव तत् प्राणमात्मन् धत्ते ।९। उत्तमेन प्रणौति ।१०। इममेव तत् प्राणमुत्सृजते ।११। तस्माद्धीमं प्राणं सर्वे प्राणा अनुप्राणन्ति ।१२। अथो अन्नं निविद इत्यप्याहुः[2] ।१३। तस्मादेना आरतं शंसेत् ।१४। अत्वरमाण इव हि[3] प्रतिकामिनमन्नाद्यमत्ति ।१५। ये त्वाहिहत्ये मघवन्नवर्धन्नित्युक्थं शस्त्वा यजति ।१६। ये शाम्बरे हरिवो ये गविष्टाविति ।१७। एतैर्वा[4] एष एतानि सह वीर्याण्यकरोत् ।१८। तैरेवास्यैष सह सोमपीथः ।१९। सा वा ऐन्द्री



त्रिष्टुब् भवति ।२०। ऐन्द्रं हि त्रैष्टुभं माध्यंदिनं सवनम् ।२१। अनुवषट्करोत्याहुतीनामेव शान्त्यै ।२२। आहुतीनां प्रतिष्ठित्यै ।२३। वागेवासौ प्रथमानुष्टुप् ।२४। तां पञ्च गायत्र्यो ऽनुवर्तन्ते ।२५। मन इन्द्रनिहवः श्रोत्रं ब्राह्मणस्पत्यः ।२६। प्राणोऽपानो व्यान इति तिस्र एकपातिन्यः ।२७। आत्मा सूक्तं यदन्तरात्मँस्तन्निवित् ।२८। प्रतिष्ठा परिधानीयान्नं याज्या[5] ।२९ ॥4॥

[1] L. P. हेन्द्रः  [2] L. P. ER. इत्याहुः  [3] IO. ह  [4] L. एतैर्हवा  [5] L. P. Here ends *Khaṇḍa* 3

अथ[1] निष्केवल्यम् ।१। बह्वचो देवताः प्राच्यः शस्यन्ते बह्वच ऊर्ध्वाः ।२। अथैतदिन्द्रस्यैव निष्केवल्यम् ।३। तन्निष्केवल्यस्य निष्केवल्यत्वम् ।४। अथ यद् बृहत्या प्रतिपद्यते ।५। बार्हतो वा एष य एष तपति ।६। तदेनं स्वेन रूपेण समर्धयति ।७। द्वे तिस्रः करोति पुनरादायम् ।८। तत् प्रजात्यै रूपम् ।९। द्वाविव वा अग्रे भवतः ।१०। तत उपप्रजायते[2] ।११। स्तोत्रियं शस्त्वानुरूपं शंसति ।१२। आत्मा वै स्तोत्रियः प्रजानुरूपः ।१३। तस्मात् प्रतिरूपमनुरूपं कुर्वीत ।१४। प्रतिरूपो हैवास्य प्रजायामाजायते नाप्रतिरूपः ।१५। धाय्यां शंसति ।१६। प्राणो वै धाय्या ।१७। प्राणमेव तदात्मन् धत्ते ।१८। प्रगाथं शंसति ।१९। पशवो वै प्रगाथः ।२०। पशूनामेवाप्त्यै ।२१। अथो प्राणापानौ वै बार्हतः प्रगाथः ।२२। प्राणापानावेव तदात्मन् धत्ते ।२३। इन्द्रस्य नु वीर्याणि प्र वोचमिति पञ्चदशर्चं निष्केवल्यम् ।२४। पञ्चदशो वै वज्रः ।२५। वज्रेणैव तद् यजमानस्य पाप्मानं हन्ति ।२६। तस्य मध्ये निविदं दधाति ।२७। मध्ये वा इदमात्मनोऽन्नं धीयते ।२८। अथ निविदः शंसति ।२९। प्राणा वै निविदः ।३०। प्राणानेव तदात्मन् धत्ते ।३१। तासामेकैकं पदमवग्राहं शंसति ।३२। एकैकमेव तत् प्राणमात्मन् धत्ते ।३३। उत्तमेन प्रणौति ।३४। इममेव तत् प्राणमुत्सृजते ।३५। तस्माद्धीमं प्राणं सर्वे प्राणा अनुप्राणन्ति ।३६। अथो अन्नं निविद इत्यप्याहुः[3] ।३७। तस्मादेना आरतं शंसेत् ।३८। अत्वरमाण इव हि प्रतिकामिनमन्नाद्यमत्ति ।३९ ॥5॥

[1] L. P. omit  [2] L. P. °प्रजायेते  [3] L. P. इत्याहुः

नितरां परिधानीयां शंसेत् ।१। तथा ह पत्न्यप्रच्यावुका भवति ।२। अनुदायिततराम्[1] ।३। तथा ह पत्न्यनुद्धतमना इव भवति[2] ।४। आत्मा वै स्तोत्रियः प्रजानुरूपः ।५। महिषी धाय्या प्रगाथः पशवः ।६। आत्मा सूक्तं यदन्तरात्मँस्तन्निवित् ।७। प्रतिष्ठा परिधानीयान्नं

याज्या[3] ।८। पवमाने स्तूयमाने होतारं मृत्युः प्रत्यालीयत ।९। तमाज्येन न्यकरोदन्यत्र स्तोत्रियात् ।१०। आद्ये[4] सामाज्ये प्रत्यालीयत ।११। तं प्रउगेण[5] न्यकरोदन्यत्र स्तोत्रियात् ।१२। तं माध्यंदिने पवमाने प्रत्यालीयत ।१३। तं मरुत्वतीयेन न्यकरोदन्यत्रैव[6] स्तोत्रियात् ।१४। अथ वै निष्केवल्यं[7] स्तोत्रियेणैव प्रतिपद्यते ।१५। तद् यथाभयेऽतिमुच्य मृत्युं यथातिमुमुचान एवम् ।१६। तदाहुर्निष्केवल्यमेवेदं निष्केवल्यमदो महाव्रते शस्यन्ते वा अमुत्र चतुरुत्तराणि कथमिहोपाप्यन्त इति ।१७। तानि वा इहोपाप्ततराणि भवन्ति ।१८। स्तोत्रियानुरूपौ संशस्तौ सप्त चतुरुत्तराणि संपद्यन्ते ।१९। चतुरक्षरं च पदमुदैति ।२०। ते पशवः ।२१। तान् पशून् यजमाने दधाति ।२२। विराड् वा अग्निष्टोमः ।२३। नवतिशतं स्तोत्रियाः संपद्यन्ते ।२४। प्रत्यक्षमेवैतदग्निष्टोमस्य रूपमुपैति यद् विराजा यजति ।२५। पिबा सोममिन्द्र मन्दतु त्वेति पदं परिशिष्य विराजोऽर्धर्चेऽवानिति[8] ।२६। श्रीर्विराळन्नाद्यम् ।२७। श्रियां तद् विराज्यन्नाद्ये प्रतितिष्ठति ।२८। उत्तरेण विराजोऽर्धर्चेन वषट्करोति ।२९। स्वर्गं एव तल्लोके यजमानं दधाति ।३०। अनुवषट्करोत्याहुतीनामेव शान्त्यै ।३१। आहुतीनां प्रतिष्ठित्या आहुतीनां प्रतिष्ठित्यै[9] ।३२ ॥6॥

[1] L. अनुदायिनितरां; (var.) as here [2] L. P. add अथ यदश्वं ददातीन्द्रो वा अश्व ऐन्द्रं ह्येतदुक्थमिन्द्रमेव तत्प्रीणाति [3] L. P. Here ends *Khaṇḍa* 4 [4] L. P. आज्ये [5] L. P. प्रउगेन [6] EM. °दन्यत्र [7] L. P. निष्केवल्ये [8] P. °र्धर्चे वाऽनिति [9] L. P. Here ends *Khaṇḍa* 5

## इति द्वितीयदशके पञ्चमोऽध्यायः[1]

[1] P. adds पूर्वार्धः समाप्तः



वसूनां वै प्रातःसवनम् ।१। रुद्राणां माध्यंदिनं सवनम् ।२। आदित्यानां तृतीयसवनम् ।३। तद् यदादित्यग्रहेण तृतीयसवनं प्रतिपद्यते ।४। स्वयैव तद् देवतया प्रतिपद्यते ।५। अथो धीतरसं वा एतत् सवनं यत् तृतीयसवनम् ।६। अथैष सरसो ग्रहो यदादित्यग्रहः ।७। तेनैव तत् तृतीयसवनं सरसं करोति ।८। त्रिष्टुभमादित्यग्रहस्य पुरोनुवाक्यामनूच्य त्रिष्टुभा यजति ।९। बलं वै वीर्यं त्रिष्टुप् ।१०। बलमेव तद् वीर्यं यजमाने दधाति ।११। तस्य नानुवषट्करोति ।१२। सवनततिर्वा आदित्यग्रहः संस्थानुवषट्कारः ।१३। नेत् पुरा कालात् सवनं संस्थापयानीति ।१४। मद्वती याज्या मद्वद्धि तृतीयसवनम् ।१५। अथ स्तुते पवमाने पशुना चरन्ति [1–]तस्योक्तं ब्राह्मणम्[–1] ।१६। अथ हविष्पङ्क्त्या चरन्ति तस्या उक्तं ब्राह्मणम् ।१७ ॥1॥

[1–1] L. P. omit; instead read अत्र कालो हि भवत्यथ सवनस्यैव सरसताया

ऐन्द्रार्भवीस्तृतीयसवन[1] उन्नीयमानेभ्योऽन्वाह ।१। यत्र ह तदृभवः प्रजापतेः प्रेमाणं प्रापुः ।२। तदेनानिन्द्रः सोमपीथेऽन्वाभेजे ।३। तस्मान्नार्भवीषु स्तुवते ।४। अथार्भवः पवमान इत्याचक्षते ।५। ऐन्द्रार्भव्या तृतीयसवने प्रस्थितानां यजति ।६। इन्द्रमेव तदर्धभाजं सवनस्य करोति ।७। जगत्या जागतं हि तृतीयसवनम् ।८। मद्वत्या मद्वद्धि तृतीयसवनम् ।९। अनुवषट्करोत्याहुतीनामेव शान्त्यै ।१०। आहुतीनां प्रतिष्ठित्यै ।११। अथ होत्राः संयजन्ति तासामुक्तं ब्राह्मणम् ।१२। अथेळाथ होतृचमसस्तस्योक्तं ब्राह्मणम् ।१३। औपासनाँस्तृतीयसवन[2] उपास्यन्ति ।१४। पितॄनेव तत् प्रीणन्ति[3] ।१५। अथ सावित्रग्रहेण चरन्ति ।१६। प्रातःसवन एतमग्रेऽयजन्[4] ।१७। ताः[5] [6–]प्रजा न[–6] प्राजायन्त ।१८। तं माध्यंदिने सवने ।१९। ता उ तत्र नो एव ।२०। तमत्र तृतीयसवनेऽयजन्[7] ।२१। ततः प्रजाः प्राजायन्त ।२२। तस्मात् तृतीयसवनेऽवधृतः सविता[8] ।२३। अथो आदित्यानां वा एकः सविता ।२४। आदित्यानां तृतीयसवनम् ।२५। [9–]तस्मादेनं तृतीयसवने[–9] यजन्ति[10] ।२६। त्रिष्टुभं सावित्रग्रहस्य पुरोनुवाक्यामनूच्य जगत्या यजति ।२७। बलं वै वीर्यं त्रिष्टुप् ।२८। पशवो जगती ।२९। बल एव तद् वीर्येऽन्ततः पशुषु च प्रतितिष्ठति ।३०। तस्य नानुवषट्करोति ।३१। प्राणो वै सावित्रग्रहः संस्थानुवषट्कारः ।३२। नेत् पुरा कालात् प्राणं संस्थापयानीति ।३३। युक्त इव ह्ययं प्राणः ।३४। मद्वती याज्या मद्वद्धि तृतीयसवनम् ।३५ ॥2॥

[1] L. P. °र्भव्य° [2] IO. BM[1]. BM[2]. औपासनंस्तृ°; P. औपासनं तृ° [3] L. P. Here

ends *Khaṇḍa* 1  [4] P. तमग्रे०  [5] ER. ततः  [6–6] P. प्रजनः  [7] IO. ०यजत्
[8] IO. सवता  [9–9] L. P. तस्मात्तृतीयसवने सवितारं  [10] P. यजति

सवित्रा वैश्वदेवं प्रतिपद्यते ।१। सवितृप्रसूता वै देवास्तृतीयसवनं समभरन् ।२। तस्मात् प्रतिपदनुचरौ सूक्तमिति सावित्राणि भवन्ति ।३। तत् सवितुर्वृणीमह इत्यनुष्टुभा वैश्वदेवं प्रतिपद्यते ।४। पवमानोक्थं वा एतद् यद् वैश्वदेवम् ।५। अनुष्टुप् सोमस्य छन्दः ।६। उक्तं पदविग्रहणस्य ब्राह्मणम् ।७। गायत्रीः शंसति ।८। प्राणो वै[1] गायत्र्यः ।९। प्राणमेव तदात्मन् धत्ते ।१०। सावित्रं[2] शंसति ।११। सावित्रो हि ग्रहो गृहीतो भवति ।१२। तमेवैतेनानुशंसति ।१३। वायव्यां शंसति ।१४। प्राणो वै वायव्या ।१५। प्राणमेव तदात्मन् धत्ते ।१६। तस्यै शस्त्रे द्विदेवत्यान् विमुञ्चन्ति[3] ।१७। वायौ प्राणे प्राणान् ।१८। द्यावापृथिवीयं शंसति ।१९। प्रतिष्ठे वै द्यावापृथिवी प्रतिष्ठित्या एव ।२०। तस्मिन्नध्वर्युर्मद्वत् प्रत्यागृणाति ।२१। मद्वद्धि तृतीयसवनम् ।२२। सुरूपकृत्नुं शंसति ।२३। अन्नं वै सुरूपम् ।२४। अन्नमेव तदात्मन् धत्ते ।२५। अथो रूपाणामेवैष सोमपीथः ।२६। रूपमेव[4] तदात्मन् धत्ते ।२७। आर्भवं[5] शंसति ।२८। अत्र ह्येभ्यः प्रजापतिरवाकल्पयत् ।२९। तस्मादत्रार्भवं शस्यते ।३०। अथ वेनामादित्यां[6] बार्हस्पत्यामिति शंसति ।३१। शुक्रामन्थिनावाग्रयणमित्येवैताभिरनुशंसति ।३२। अथो वैश्वदेवं वै शस्त्रम् ।३३। देवतानामपरिहाणाय वैश्वदेवं शंसति ।३४। वैश्वदेवो हि ग्रहो गृहीतो भवति ।३५। तमेवैतेनानुशंसति ।३६। तस्य द्विः पच्छः परिधानीयां शंसति ।३७। अर्धर्चशस्तृतीयम् ।३८। सा[7] विराजमभिसंपद्यते ।३९। श्रीर्विराळन्नाद्यम् ।४०। श्रियो विराजोऽन्नाद्यस्योपाप्त्यै ।४१ ॥3॥

[1] L. वा  [2] BM¹. BM². सावित्रीः  [3] L. विमुञ्चति  [4] IO. ०मेवै  [5] EM. अथार्भवं
[6] L. P. वैना०  [7] IO. स

चत्वारि सूक्तानि वैश्वदेवे शंसति ।१। पशवो वै वैश्वदेवम् ।२। चतुष्टया वै पशवः ।३। अथो चतुष्पादाः पशूनामेवाप्त्यै ।४। तस्मादेनदारतं शंसेत् ।५। रमन्ते हास्मिन् पशवः[1] ।६। षोळशाहावं वैश्वदेवं शंसति ।७। षोळशकलं वा इदं सर्वम् ।८। अस्यैव सर्वस्याप्त्यै ।९। तत् सप्तदशविधं भवति।१०।एकादश देवताश्चतस्रो निविद उक्थवीर्यं याज्येति।११। सप्तदशो वै प्रजापतिः ।१२। एतद् वा आर्ध्रुकं[2] कर्म यत् प्रजापतिसंमितम् ।१३। विश्वे देवाः शृणुतेमं हवं म इत्युक्थं शस्त्वा यजति वैश्वदेव्या ।१४। वैश्वदेवं ह्येतदुक्थम्[3] ।१५। त्रिष्टुभा बलं वै वीर्यं त्रिष्टुप् ।१६। बलमेव तद् वीर्यं यजमाने दधाति ।१७। [4–]मद्वत्या मद्वद्धि तृतीयसवनम्[–4] ।१८। अनुवषट्करोत्याहुतीनामेव शान्त्यै ।१९। आहुतीनां प्रति-



ष्ठित्यै ।२०। वागेवासौ प्रथमानुष्टुप् ।२१। तां पञ्च गायत्र्योऽनुवर्तन्ते ।२२। मनः सावित्रम् ।२३। प्राणो वायव्या ।२४। चक्षुषी द्यावापृथिवीयम् ।२५। योऽयमनिरुक्तः प्राणः स सुरूपकृत्नुः ।२६। श्रोत्रमार्भवम् ।२७। प्राणोऽपानो व्यान इति तिस्र एकपातिन्यः ।२८। आत्मा सूक्तं यदन्तरात्मँस्तन्निवित् ।२९। प्रतिष्ठा परिधानीयान्नं याज्या ।३० ॥4॥

[1] L. P. Here ends *Khaṇḍa* 3  [2] L. P. आर्धुकं  [3] L. P. add मद्वत्या मद्वद्धि तृतीयसवनं
[4–4] L. P. omit; ER. EM. मद्वती याज्या (for मद्वत्या)

तदाहुः कस्माद् ब्रह्मक्षत्रे एव प्रच्यावुके विळच्युतेति ।१। ब्रह्म वै प्रातःसवनम् ।२। क्षत्रं माध्यंदिनं सवनम् ।३। विट् तृतीयसवनम् ।४। तद् यद् यथोपपादमेव प्रातःसवनमध्यंदिनयोः[1] परिदधति[2] ।५। तस्माद् ब्राह्मण्यः प्रजा अनवधृतं क्षियन्ति ।६। अनवधृतं क्षत्रियाः ।७। अथ यत् तृतीयस्य[3] सवनस्य परिधानीयाच्युता ।८। तस्माद् विळच्युतेति[4] ।९। घृतस्य यज सौम्यस्य यजेत्याह ।१०। एताभ्यां वै[5] यज्ञस्तायते यद् घृतेन च सोमेन च ।११। ते अत्र प्रीणाति ।१२। प्रीते यज्ञं वहात[6] इति ।१३। उपांशु घृतस्य यजति ।१४। रेतःसिक्तिर्वै घृतम् ।१५। उपांशु वै रेतः सिच्यते।१६। अथ यदुच्चैः सौम्यस्य यजति ।१७। चन्द्रमा वै सोमः ।१८। निरुक्त उ वै चन्द्रमाः ।१९। तस्य न परस्तात् परियजेदित्याहुः[7] ।२०। तथामी अमुत इदमर्वाञ्चः पश्यन्तीति[8] ।२१। परियजेदिति[7] त्वेव स्थितम् ।२२। देवलोको वा आज्यम् ।२३। पितृलोकः सोमः ।२४। देवलोकमेव तत् पितृलोकादभ्युत्क्रामन्ति ।२५। अथो पितॄनेव तत् प्रीणन्ति यत् सौम्येन चरन्ति ।२६। अथो एतदुपसद उत्सृज्यन्त इत्याहुः ।२७। अग्निं सोमं विष्णुमिति वा उपसत्सु प्रतियजति ।२८। अग्निं सोमं विष्णुमितीदम् ।२९। हरन्त्येतं सौम्यं सदः ।३०। तं होता प्रतिगृह्योपनिधत्ते ।३१। अथास्य सर्पिष्यात्मानं पर्यवेक्ष्याङ्गुलिभ्यां सर्पिरुपस्पृशति ।३२। चक्षुष्पा[9] असि चक्षुर्मे पाहीति चक्षुषी विमृजीत ।३३। चक्षुरेवास्य तद् गोपायति[10] ।३४। तमुन्नातृभ्यः प्रयच्छति ।३५ ॥5॥

[1] L. P. ०माध्यं०  [2] L. P. ०दधाति  [3] P. EM. तृतीय  [4] L. P. Here ends *Khaṇḍa* 4
[5] IO. वा  [6] L. P. वहाते  [7] L. (var.) P. पर्यजे०  [8] L. (var.) पर्यावर्तन्तीति
[9] P. चक्षुष्या  [10] P. गोपायन्ति

अथ पात्नीवतग्रहेण चरन्ति ।१। पत्नीरेव तदाहवनीयभाजः कुर्वन्ति ।२। तस्य नानुवषट्करोति ।३। आज्यसंसृष्टो हि भवति ।४। अननुवषट्कारभागाज्यम् ।५। उपांशु

यजति ।६। रेतःसिक्तिर्वै पात्नीवतग्रह उपांशु वै रेतः सिच्यते ।७। नानुवषट्करोति ।८। रेतःसिक्तिर्वै पात्नीवतग्रहः संस्थानुवषट्कारः ।९। [1-]नेद् रेतः सिक्तं पुरा कालात्[-1] संस्थापयानीति[2] ।१०। तदाहुर्यदेषा नेष्टुर्याज्याथ कस्मादेनयाग्नीध्रो यजतीति ।११। आग्नेयी वा एषा याज्या ।१२। आग्नेय आग्नीध्रः ।१३। तस्मादेनयाग्नीध्रो यजति ।१४। अथो एवं समा अनुक्थानां[3] वषट्कारा भवन्तीति ।१५ ॥6॥

[1-1] L. P. नेत्पुरा कालाद्रेतः सिक्तं  [2] L. P. add मद्वती याज्या मद्वद्धि तृतीयसवनं  [3] L. P. अनुक्तानां

एकविंशत्याहावमाग्निमारुतं शंसति ।१। एकविंशो वै स्तोमः[1] स्तोमानां परमः प्रतिष्ठानीयः ।२। प्रतिष्ठित्या एव ।३। तच्चतुर्विंशतिविधं भवति ।४। विंशतिः पर्वाणि ।५। तानि चतुश्चत्वारिंशत् ।६। चतुश्चत्वारिंशदक्षरा त्रिष्टुप् ।७। बलं वै वीर्यं त्रिष्टुप् ।८। बलमेव तद् वीर्यं यजमाने दधाति ।९। वैश्वानरीयं शंसति ।१०। वैश्वानरीयो हि ग्रहो गृहीतो भवति ।११। तमेवैतेनानुशंसति ।१२। रौद्रीं शंसति ।१३। घोरो वै रुद्रः ।१४। भैषज्यमेव तत् कुरुते ।१५। अथो अन्तभाग् वा वा एषः ।१६। तस्मादेनामन्त्ये[2] शस्त्रे शंसति ।१७। मारुतं शंसति ।१८। एतत्पूगो वै रुद्रः ।१९। तदेनं स्वेन पूगेन समर्धयति ।२०। अथ यज्ञायज्ञियस्य[3] स्तोत्रियानुरूपौ ।२१। तौ वै मध्ये भिया एव शंसति ।२२। मध्ये हीयमात्मनो भिया एव योनिः ।२३। जातवेदसीयं शंसति ।२४। तेनाग्निमारुतमित्याख्यायते ।२५। तस्मादेनदभ्यग्रं शंसेत् ।२६। यथाग्निं प्रदाव्यमतिमोक्ष्यमाण[4] एवम् ।२७ ॥7॥

[1] L. P. चतुष्टोमः  [2] L. (var.) P. °मन्ते  [3] L. P. °यज्ञीयस्य  [4] L. P. °मोक्षमाण; L. (var.) °मोक्ष्यमाण

आपोदेवत्याः शंसति ।१। शान्तिर्वै भेषजमापः ।२। शान्तिरेवैषा भेषजमन्ततो यज्ञे क्रियते ।३। तस्मादेना आरतं शंसेत् ।४। यथाप्सु न्युन्दान[1] एवम् ।५। [2-]अहिं बुध्न्यं[-2] शंसति ।६। अग्निर्वा अहिर्बुध्न्यः[3] ।७। तमेतयोज्ज्वलयति[4] ।८। अथो धिष्ण्यानेवैतयानुशंसति ।९। देवानां च पत्नी राकां च शंसति ।१०। पात्नीवतग्रहमेवैताभिरनुशंसति[5] ।११। अथो अन्तभाजो वै पत्न्यः ।१२। तस्मादेना अन्त्ये[6] शस्त्रे शंसति[7] ।१३। अक्षरपङ्क्तयः[8] शंसति ।१४। पशवो वा अक्षरपङ्क्तयः ।१५। पशूनामेवाप्त्यै ।१६। अथो प्राणापानौ वा अक्षरपङ्क्तयः ।१७। प्राणापानावेव तदात्मन् धत्ते ।१८। अथो शस्त्रस्यैव सेन्द्रतायै ।१९।



पैत्रीश्च यामीश्च शंसति ।२०। नाराशंसानेवैताभिरनुशंसति ।२१। अथो अन्तभाजो वै पितरः ।२२। तस्मादेनानन्त्ये[9] शस्त्रे शंसति ।२३। स्वादुष्किलीयाः शंसति ।२४। सोममेवैताभिरिन्द्राय स्वदयति ।२५। अथो देवलोको वा इन्द्रः ।२६। पितृलोको यमः ।२७। देवलोकमेव तत् पितृलोकादभ्युत्क्रामन्ति[10] ।२८। तास्वध्वर्युर्मद्वत्[11] प्रत्यागृणाति ।२९। मद्वद्धि तृतीयसवनम् ।३०। वैष्णुवारुणीं शंसति ।३१। यज्ञो वै वैष्णुवारुणः ।३२। यद् वै यज्ञस्य स्खलितं वोल्बणं वा भवति ।३३। तदेतया भिषज्यति ।३४। भैषज्यमेवैषा ।३५। वैष्णवीं चाग्नेयीं च शंसति ।३६। अग्नाविष्णू वै देवानामन्तभाजौ ।३७। तस्मादेनावन्त्ये[12] शस्त्रे शंसति ।३८। ऐन्द्र्या परिदधाति ।३९। इन्द्रस्य ह्येषः ।४०। तमिन्द्र एवान्ततः प्रतिष्ठापयति[13] ।४१ ॥8॥

[1] L. P. न्युन्दमान  [2-2] L. P. अहिर्बुध्न्यं  [3] IO. °बुध्नः  [4] L. (var.) तमेतया ज्वलयति (wrongly states that this is the reading of IO.), तमेतयोर्ज्वलयति; P. तमेतयोर्ज्वलयति  [5] L. P. °ग्रहमित्येवैता°  [6] P. अन्ते  [7] L. P. Here ends *Khaṇḍa* 7  [8] L. remarks: all MSS. read so  [9] L. °देना अन्त्ये; P. °देना अन्ते  [10] L. °दभ्युत्क्रामति  [11] IO. तस्मा अध्वर्यु°  [12] L. P. °देने अन्ते  [13] L. remarks all MSS. excepting IO. read प्रतितिष्ठति; P. प्रतितिष्ठति

किंदेवत्यः सोम इति मधुको गौश्रं पप्रच्छ ।१। स ह सोमः पवत इत्यनुद्रुत्य ।२। एतस्य वा अन्ये स्युरिति प्रत्युवाच ।३। बह्वृचवदेव ।४। ऐन्द्र इति त्वेव पैङ्ग्यस्य स्थितिरास ।५। ऐन्द्राग्न इति कौषीतकेः[1] ।६। अग्निना वै प्रतिपद्यते यदाज्येन ।७। इन्द्रमनु संतिष्ठत एतां परिधानीयाम् ।८। तस्मादैन्द्राग्न इति ।९। एष वा अग्निष्टोमः ।१०। एष वा उ कामाय कामायाह्रियते ।११। यो ह वा एतेनानिष्ट्वाथान्येन यजते ।१२। कर्तपत्यमेव[2] तज्जीयते[3] प्र वा मीयत इति ह स्माह ।१३। स वा एषोऽग्निष्टोम आज्यप्रभृत्याग्निमारुतान्तः ।१४। यच्छस्यँस्त्रीणि षष्टिशतान्यृचां संपद्यन्ते ।१५। त्रीणि वै षष्टिशतानि संवत्सरस्याह्नाम् ।१६। [4-]तत् संवत्सरस्याहान्याप्नोति[-4] ।१७। अग्ने मरुद्भिः शुभयद्भिर्ऋक्वभिरित्युक्थं शस्त्वा यजत्याग्निमारुत्या ।१८। आग्निमारुतं ह्येतदुक्थम् ।१९। जगत्या जागतं हि तृतीयसवनम् ।२०। मद्वत्या मद्वद्धि तृतीयसवनम् ।२१। अनुवषट्करोत्याहुतीनामेव शान्त्यै ।२२। आहुतीनां प्रतिष्ठित्यै ।२३ ॥9॥[5]

[1] L. P. कौषीतकिः; L. (var.) as here  [2] L. P. गर्तं°  [3] L. P. तद्धीयते  [4-4] L. P. संवत्सरस्यैवाप्त्यै  [5] Here L. P. add one *Khaṇḍa*: सोमेनेष्ट्वा सौत्रामण्या यजेत श्रियं प्रजां विराजं चेच्छन्नैन्द्रो वा एष यज्ञक्रतुर्यत् सौत्रामण्यात्मा वै यज्ञस्य त्रिपशुर्बाहू पशू (P. पशुस्) तस्मा-

दात्मानमभितो बाहू भवतस्तस्मादात्मानमभितः पार्श्वे स्यातां यत्सुरा सोमग्रहाननुवषट्कृत्य सर्वे तस्मात्सोमेनेष्ट्वा सौत्रामणीं कुर्याद्य एवं विद्वान्त्सोमेनेष्ट्वा सौत्रामण्या यजेत स श्रियं प्रजां विराजमाप्नोति यश्चैवं वेद श्रीर्विराडन्नाद्यं श्रियो विराजोऽन्नाद्यस्योपाप्त्या अवभृथमवैति यथा सोमे मैत्रावरुण्या वा पयस्यया यजेत तस्या उक्तं ब्राह्मणम् ॥१०॥

**ऐन्द्राग्नान्युक्थ्योक्थानि भवन्ति ।१। इन्द्राग्नी वै सर्वे देवाः ।२। वैश्वदेवं तृतीयसवनम् ।३। सर्वेषामेव देवानां प्रीत्यै ।४। आग्नेयीषु मैत्रावरुणाय प्रणयन्त्यैन्द्रीष्वितरयोः ।५। तेन तान्यैन्द्राग्नानि भवन्ति ।६। चत्वारि चत्वारि सूक्तानि शंसन्ति ।७। पशवो वा उक्थानि ।८। चतुष्टया वै पशवः ।९। अथो चतुष्पादाः पशूनामेवाप्त्यै ।१०। तानि द्वादश संपद्यन्ते ।११। द्वादश वै मासाः संवत्सरः ।१२। संवत्सरस्यैवाप्त्यै ।१३। चतुराहावानि शस्त्राणि ।१४। पशवो वा उक्थानि ।१५। चतुष्टया वै पशवः ।१६। अथो चतुष्पादाः पशूनामेवाप्त्यै ।१७। द्विदेवत्या उक्थयाज्याः ।१८। द्विपाद् यजमानः ।१९। प्रतिष्ठित्यै ।२०। तानि चत्वारि संपद्यन्ते ।२१। पशवो वा उक्थानि ।२२। चतुष्टया वै पशवः ।२३। अथो चतुष्पादाः पशूनामेवाप्त्यै ।२४। ऐन्द्रावरुणी मैत्रावरुणस्य ।२५। ऐन्द्रावरुणं ह्यस्योक्थं भवति ।२६। ऐन्द्राबार्हस्पत्या ब्राह्मणाच्छंसिनः ।२७। ऐन्द्राबार्हस्पत्यं ह्यस्योक्थं भवति ।२८। ऐन्द्रावैष्णव्यच्छावाकस्य ।२९। ऐन्द्रावैष्णवं ह्यस्योक्थं भवति ।३०। प्रथमोत्तमे मद्वत्यौ ।३१। मद्वद्धि तृतीयसवनम् ।३२। ता वै त्रिष्टुभो[1] भवन्ति[2] ।३३। बलं वै वीर्यं त्रिष्टुप् ।३४। बलमेव तद् वीर्यं यजमाने दधति[3] ।३५। अनुवषट्कुर्वन्त्याहुतीनामेव शान्त्यै ।३६। आहुतीनां प्रतिष्ठित्या आहुतीनां प्रतिष्ठित्यै[4] ।३७ ॥10॥**

[1] L. P. तिस्रो [2] L. P. add त्रयो वा इमे लोका इमानेव तल्लोकानाप्नुवन्ति ता वै त्रिष्टुभो भवन्ति [3] ER. दधाति [4] L. P. Here ends *Khaṇḍa* 11

## इति द्वितीयदशके षष्ठोऽध्यायः



**आनुष्टुभो वा एष वज्रो यत् षोळशी ।१। तद् यत् षोळशिनमुपयन्ति ।२। आनुष्टुभेनैव तद् वज्रेण यजमानस्य पाप्मानमपघ्नन्ति ।३। स वै हरिवान् भवति ।४। प्राणो वै हरिः ।५। स हि हरति ।६। तस्माद्धरिवान् भवति ।७। तदसौ वै षोळशी योऽसौ तपति ।८। एतमेव तत् प्रीणाति[1] ।९। अथो षोळशं वा एतत् स्तोत्रं षोळशं शस्त्रम् ।१०। तस्मात् षोळशीत्याख्यायते ।११। तद् यत् षोळशिनमुपयन्ति ।१२। षोळशकलं वा इदं सर्वम् ।१३। अस्यैव सर्वस्याप्त्यै ।१४। अथो इन्द्रो[2] वै षोळशी ।१५। तस्माद्धरिवान् भवति ।१६। हरिस्तवो हीन्द्रः ।१७। इन्द्र जुषस्व प्र वहा याहि शूर [3-]हरी इहेति[-3] ।१८। ताः पञ्चविंशत्यक्षराः ।१९। एकैका [4-]नवभिर्नवभिरक्षरैरुपसृष्टाः ।२०। आत्मा[-4] वै पञ्चविंशः ।२१। प्रजा पशव उपसर्गः ।२२। प्रजयैव तत् पशुभिः प्रेष्यैरन्नाद्येनेत्यात्मानमुपसृजते ।२३। ताश्चतुस्त्रिंशदक्षराः संपद्यन्ते ।२४। स्वराड् वै तच्छन्दः ।२५। यत् किंच चतुस्त्रिंशदक्षरं स्वाराज्यमेनेनाप्नोति ।२६। ताः संशस्ताः पञ्चानुष्टुभः संपद्यन्ते ।२७। दशाक्षरं च पदमुदैति ।२८। एकैकस्यै द्वे द्वे ।२९ ॥1॥**

[1] L. P. प्रीणन्ति [2] L. P. इन्द्र उ [3-3] L. P. हरिहेति [4-4] L. P. ०रुपसृष्टात्मा

**त्वावतः पुरूवसो इति गायत्रीमुपसंशंसति[1] ।१। एतेषामेवाक्षराणां संपदे ।२। अथो एतया सह स्तोत्रियः षळनुष्टुभः संपद्यन्ते[2] ।३। तस्मादेतां शंसति संपदे ।४। एतत्प्रतिरूपमु हैकेऽनुरूपं कुर्वन्ति ।५। तदु वा आहुरसौ वै षोळशी योऽसौ तपति ।६। न वा एतस्यान्योऽनुरूपोऽस्ति ।७। स योऽत्रानुरूपं कुर्वन्तं ब्रूयात् ।८। अप्रिय एनं भ्रातृव्यः प्रत्याख्यायिष्यत इति तथा ह स्यात् ।९। तस्मादत्रानुरूपं नाद्रियेत[3] ।१०। अथात ऊर्ध्वानि छन्दांसि विहरति ।११। प्राणा वै छन्दांसि ।१२। प्राणानेव तदात्मन् व्यतिषजत्यविवर्हाय[4] ।१३। तस्माद्धीमे प्राणा [5-]विष्वञ्चो वान्तो न निर्वान्ति[-5] ।१४। अथो आनुष्टुभो वै षोळशी ।१५। सर्वाण्येवैतच्छन्दांस्यनुष्टुभमभिसंपादयति ।१६। गायत्रीश्च पङ्क्तीश्च विहरति ।१७। यजमानच्छन्दसं पङ्क्तिः ।१८। तेजो ब्रह्मवर्चसं गायत्री ।१९। तेज एव तद् ब्रह्मवर्चसं यजमाने दधाति ।२०। उष्णिहश्च बृहतीश्च विहरति ।२१। यजमानच्छन्दसमेवोष्णिक् ।२२। पशवो [6-]बृहती ।२३। बार्हतानेव[-6] तत् पशून् यजमाने दधाति ।२४। द्विपदां च विंशत्यक्षरां त्रिष्टुभं च विहरति ।२५। यजमानच्छन्दसमेव[7] द्विपदा ।२६। बलं वै वीर्यं त्रिष्टुप् ।२७। बलमेव तद् वीर्यं यजमाने दधाति ।२८। द्विपदाश्च षोळशाक्षरा जगतीश्च विहरति**

।२९। यजमानच्छन्दसमेव द्विपदाः ।३०। पशवो [8–]जगती ।३१। जागतानेव[–8] तत् पशून् यजमाने दधाति ।३२ ॥2॥

[1] EM. °मुपशंसति [2] IO. adds दशाक्षरं च पदमुदेति [3] L. P. Here ends *Khaṇḍa* 1
[4] P. °त्यववर्हाय [5–5] L. (var.) (all MSS. excepting IO.), P. विष्वञ्चोऽवाञ्चोऽनुनिर्वाञ्चि
[6–6] L. (var.), P. बृहतीर्बार्हि° [7] L. P. omit एव [8–8] L. (var.), P. जगतीर्जाग°

गायत्रीः शंसति ।१। प्राणो वै गायत्र्यः ।२। प्राणमेव तदात्मन् धत्ते ।३। सप्तपदां शंसति ।४। सप्त वै छन्दांसि ।५। सर्वेषामेव छन्दसामाप्त्यै ।६। अथो एतया सह गायत्र्यश्चतस्रोऽनुष्टुभः संपद्यन्ते ।७। तस्मादेतां शंसति संपदे[1] ।८। अथ नित्या अनुष्टुभः शंसति ।९। आनुष्टुभो वै षोळशी ।१०। तदेनत्[2] स्वेन छन्दसा[3] समर्धयति ।११। ता वा अष्टौ भवन्ति ।१२। एताभिर्वै देवाः सर्वा अष्टीराश्नुवत ।१३। तथो एवैतद् यजमान एताभिरेव सर्वा अष्टीरश्नुते[4] ।१४। त्रिःशस्तया परिधानीयया दश संपद्यन्ते ।१५। दशदशिनी विराट् ।१६। श्रीर्विराळन्नाद्यम् ।१७। श्रियो विराजोऽन्नाद्यस्योपाप्त्यै ।१८। उद्यद् ब्रध्नस्य विष्टपमिति परिदधाति ।१९। अदो वै ब्रध्नस्य विष्टपं यत्रासौ तपति ।२०। [5–]तदेव तद्[–5] यजमानं दधाति ।२१। त्रिरेव षोळशिन आह्वयते प्रतिपदे[6] निविदे परिधानीयायै ।२२। त्रिवृद् वै षोळशी ।२३। त्रिवृतैव तद् वज्रेण यजमानस्य पाप्मानं हन्ति ।२४। त एते श्लोका घोषा वीर्याणीत्युक्थानाम् ।२५। श्लोकी घोषी वीर्यवान् कीर्तिमान् भवति य एवं वेदोक्थानां वीर्याणि ।२६। ताः संशस्ताश्चत्वारिंशदनुष्टुभः संपद्यन्ते ।२७। चत्वारिंशदक्षरा पङ्क्तिः ।२८। प्रतिष्ठा वै पङ्क्तिः ।२९। सर्वेष्वेव तद् भूतेषु यजमानं प्रतिष्ठापयति[7] ।३०। विहृतया त्रिष्टुभा यजेदिति हैक आहुः ।३१। एवा हि वाज्यपाः पूर्वेषां हरिवः [8–]सुतानां वाजी हि वाज्यथो[–8] इदं सवनं केवलं ते ।३२। वोळ्हा हि वाजी ममद्धि सोमं मधुमन्तमिन्द्र जिष्णुर्हि वाजी सत्रा वृषञ्जठर आ वृषस्वेति ।३३ ॥3॥

[1] L. P. Here ends *Khaṇḍa* 2 [2] L. P. तदेनं [3] L. P. रूपेण [4] IO. EM. °रश्नुवते
[5–5] L. (var.) तदेतद [6] L. P. स्तोत्रिये [7] L. P. Here ends *Khaṇḍa* 3 [8–8] EM. सुतानामथो

अविहृतयेति त्वेव स्थितम् ।१। संसिद्धानि वा एतानि[1] देवपात्राणि यद् याज्याः ।२। संसिद्धेनैव तद् देवपात्रेण देवेभ्यो हविः प्रयच्छति[2] ।३। तस्र रात्र्यामुपेयात् ।४। इन्द्रो[3] वै षोळशी ।५। न वा इन्द्रादन्यदुत्तरमस्ति[4] ।६। बहुरात्र्यामुपाह्वयते[5] ।७। पर्याया इव



त्वदाश्विनम् ।८। तत[6] एवैनं चतुर्थेऽहन्युपेयात् ।९। तद् वै षोळशिन आयतनम् ।१०। [7–]तद् वै तदहः[–7] षोळश्यन्तं संतिष्ठते ।११। तदु वा आहुरुपेयादेवैतत्[8] ।१२। कृत्स्ने वा अहोरात्रे यत् षोळशी ।१३। तद् यद् षोळशिनमुपयन्ति ।१४। अहोरात्रयोरेव कृत्स्नतायै[9] ।१५। अथ यदतिरात्रमुपयन्ति ।१६। एतावान् वै संवत्सरो यदहोरात्रे ।१७। तद् यदतिरात्रमुपयन्ति ।१८। संवत्सरस्यैवाप्त्यै ।१९। अथो द्वयं वा इदं सर्वं स्नेहश्चैव तेजश्च ।२०। तदुभयमहोरात्राभ्यामाप्तम् ।२१। तद् यदतिरात्रमुपयन्ति ।२२। स्नेहतेजसोरेवाप्त्यै[10] ।२३ ॥4॥

[1] EM. एतद् [2] EM. प्रयच्छतीति [3] L. P. इन्द्र उ [4] EM. °दन्यमुत्त°
[5] L. P. °पाह्रियते [6] L. reports all MSS. excepting IO. read त्वद (for तत); P. त्वद
[7–7] L. तद्धैतदहः [8] L. (var.) P. °देवं तत् [9] L. P. Here ends *Khaṇḍa* 4
[10] L. P. Here ends *Khaṇḍa* 5

गायत्रान्त्स्तोत्रियानुरूपाञ्छंसन्ति ।१। ज्योतिर्वै गायत्री ।२। तमः पाप्मा रात्रिः ।३। तेन तज्ज्योतिषा तमः पाप्मानं तरन्ति[1] ।४। पुनरादायं शंसन्ति ।५। एवं हि सामगाः स्तुवते ।६। यथा स्तुतमनुशस्तं[2] भवतीति ।७। तदाहुरथ कस्मादुत्तमात् प्रतीहारादूर्ध्वमाहूय साम्ना शस्त्रमुपसंतन्वन्तीति[3] ।८। पुरुषो वै यज्ञः ।९। तस्य शिर एव हविर्धाने मुखमाहवनीय उदरं सदोऽन्नमुक्थानि ।१०। बाहू मार्जालीयश्चाग्नीध्रियश्च[4] ।११। या इमा अन्तर्देवतास्तेऽन्तःसदसं धिष्ण्याः ।१२। प्रतिष्ठा गार्हपत्यव्रतश्रपणाविति ।१३। अथापरम् ।१४। तस्य मन एव ब्रह्मा प्राण उद्गातापानः प्रस्तोता व्यानः प्रतिहर्ता वाग्घोता चक्षुरध्वर्युः प्रजातिः सदस्य आत्मा यजमानः ।१५। अङ्गानि होत्राशंसिनः ।१६। तद् यदध्वर्युः स्तोत्रमुपाकरोति ।१७। चक्षुरेव तत् प्राणैः संदधाति[5] ।१८। अथ यत् प्रस्तोता ब्रह्माणमामन्त्रयते ब्रह्मन्त्स्तोष्याम इति[6] ।१९। मनो वा अग्रणीर्भवत्येषां प्राणानाम् ।२०। मनसैव[7] प्रसूताः स्तोमेन स्तुयामेति[8] ।२१। अथो अपानमेव तन्मनसा संतनोति ।२२ ॥5॥

[1] L. P. अपघ्नन्ति [2] L. P. स्तुतमनु° [3] L. P. Here ends *Khaṇḍa* 6 [4] L. P. °ग्नीध्रीय° [5] L. P. add अथो अपानमेव तन्मनसा संतनोति [6] L. P. प्रशास्तरिति
[7] L. P. मनसा; L. (var.) as here [8] IO. स्तुयामिति

अथ यद् ब्रह्मा स्तोत्रमनुमन्यते ।१। मन एव तत् प्राणैः संदधाति[1] ।२। अथ यत् प्रस्तोता प्रस्तौति ।३। अपानमेव तत् प्राणैः[2] संदधाति[3] ।४। [4–]अथ यत् प्रतिहर्ता प्रति-

हरति ।५। व्यानमेव तत् प्राणैः[2] संदधाति[3] ।६। अथ यदुद्गातोद्गायति[5] ।७। प्राणमेव तद् व्याने दधाति[–4] ।८। [6–]ता वा एताः[–6] सर्वा देवताः प्राण एव प्रतिष्ठिताः ।९। अथ यद्धोता साम्ना शस्त्रमुपसंतनोति ।१०। वाग् वै होता ।११। वाचमेव तत् प्राणैः संदधाति[1] ।१२। अथ यद्धोत्राशंसिनः सामसंततिं कुर्वन्ति ।१३। अङ्गान्येव तत् प्राणैः संदधति[7] ।१४। अथ यद् यजमानः स्तोत्रमुपगाति ।१५। प्राणा वा उद्गातारः ।१६। प्राणानेव तदात्मन् धत्ते ।१७। तस्मान्नैनं बहिर्वेद्यभ्यस्तमियात् ।१८। नाभ्युदियान्नाभ्याश्रावयेत्[8] ।१९। [9–]न स्तोत्रमुपाकुर्वीत[–9] ।२०। नाधिष्ण्ये प्रतपेत ।२१। नेत् प्राणेभ्य आत्मानमपादधानीति[10] ।२२। अथ यत् प्रथमेषु पर्यायेषु प्रथमेषु पदेषु निनर्तयन्ति[11] ।२३। प्रथमरात्रादेव तदसुरान् निर्घ्नन्ति ।२४। अथ यन्मध्यमेषु पर्यायेषु मध्यमेषु पदेषु निनर्तयन्ति[12] ।२५। मध्यमरात्रादेव तदसुरान् निर्घ्नन्ति ।२६। अथ यदुत्तमेषु पर्यायेषूत्तमेषु पदेषु निनर्तयन्ति ।२७। उत्तमरात्रादेव तदसुरान् निर्घ्नन्ति ।२८। तद् यथाभ्यागारमभिनिनर्तं पुनः पुनः पाप्मानं निर्हण्यात् ।२९। एवमेवैतत्[13] स्तोत्रियानुरूपैरहोरात्राभ्यामसुरान्[14] निर्घ्नन्ति[15] ।३०। [16–]यथास्तुतम्वनुशस्तं भवतीति[–16] ।३१ ॥6॥

[1] L. P. add अथो अपानमेव तन्मनसा संतनोति [2] L. P. प्राणे [3] L. P. दधाति [4–4] L. P. read passages ७ and ८ first and ५ and ६ after that [5] L. °तोद्गाति [6–6] L. P. एवमेवैताः [7] BM¹. संदधाति [8] L. P. °दियान्नाभ्युपाकुर्यान्नाभ्या° [9–9] L. P. नाभिवषट्कुर्यात् [10] L. P. Here ends *Khaṇḍa* 7 [11] IO. निवर्त° [12] IO. निवर्तयन्ति L. reports wrongly that IO. reads निनर्तयन्ति; according to L. all other MSS. read निवर्तयन्ति [13] L. P. EM. ER. °मेवैतैः [14] L. P. °भ्यामेव तदसु° [15] L. P. Here ends *Khaṇḍa* 8 [16–16] L. P. omit

गायत्राण्युक्थमुखानि शंसन्ति ।१। तेजो ब्रह्मवर्चसं[1] गायत्री ।२। तेज एव तद् ब्रह्मवर्चसं यजमाने दधति[2] ।३। गायत्रीः शस्त्वा जगतीः शंसन्ति ।४। व्याह्वयन्ते गायत्रीश्च जगतीश्चान्तरेण ।५। छन्दांस्येवैतन्नानावीर्याणि कुर्वन्ति ।६। जगतीः शस्त्वा त्रिष्टुब्भिः परिदधति ।७। बलं वै वीर्यं त्रिष्टुप् ।८। पशवो जगती ।९। बल एव तद् वीर्येऽन्ततः [3–]पशुषु च[–3] प्रतितिष्ठन्ति ।१०। अन्धस्वत्यो मद्वत्यः पीतवत्यस्त्रिष्टुभो याज्याः समृद्धास्त्रिलक्षणाः[4] ।११। एतद् वै रात्रे रूपम् ।१२। जागृयू रात्रिम्[5] ।१३। ज्योतिर्वै जागरितम् ।१४। तमः पाप्मा रात्रिः ।१५। तेन तज्ज्योतिषा तमः पाप्मानं तरन्ति ।१६। यावदु ह वै न वा स्तूयते न वा शस्यते ।१७। तावदीश्वरा यदि नासुररक्षसान्यन्ववपातोः[6] ।१८। तस्मादाहवनीयं समीद्धमाग्नीध्रियं[7] गार्हपत्यं धिष्ण्यान्त्समुज्ज्वलयतेति[8]



भाषेरन् ।१९। ज्वलयेयुः प्रकाशमिवैव स्यात् ।२०। आलेभन्तः[9] शयीरन् ।२१। तान् ह [10–]तच्चेष्टन्ति न्वा[–10] इति ।२२। पाप्मा नापधृष्णोति ।२३। ते पाप्मानमपघ्नते ते पाप्मानमपघ्नते[11] ।२४ ॥7॥

[1] IO. adds वै [2] IO. P. दधाति [3–3] EM. omits [4] L. P. °स्त्रिर्लक्षणा [5] L. P. रात्रीं [6] L. P. °रक्षांस्यन्व° [7] L. P. समिद्धमाग्नीध्रीयं [8] L. °ज्ज्वलयतेऽति [9] L. P. आरेफन्तः; L. (var.) as here [10–10] L. तच्चेष्टिं तन्वा; (var.) तच्चेष्टिं तिन्वा, वितच्चेष्टन्तिन्वा, तच्चेष्टं तिन्वा; P. तं चेष्टिं तन्वा [11] L. P. Here ends *Khaṇḍa* 9

## इति द्वितीयदशके सप्तमोऽध्यायः

अतिरिक्तसोमो वा एष यदाश्विनम् ।१। यद् वै यज्ञस्यातिरिच्यते ।२। भ्रातृव्यस्तेन यजमानस्य प्रत्युद्यमी भवति ।३। अथ यत् परस्तादश्विनौ यजति ।४। अश्विनौ वै देवानां भिषजौ ।५। भैषज्यमेव तत् कुरुते ।६। अथ यत्र ह तत् सविता सूर्यां प्रायच्छत् सोमाय राज्ञे ।७। यदि वा प्रजापतेः ।८। तत् सहस्रमन्वाकरोद् दुहित्र ऊह्यमानायै[1] ।९। तदासां[2] देवतानामासीत् ।१०। ता अब्रुवन्नाजिमायामास्मिन्त्सहस्र[3] इति ।११। [4–]ता आजिमायन्[–4] ।१२। तदश्विना उदजयतां रासभेन ।१३। तस्माद् बह्वृचो देवताः शस्यन्ते ।१४। अथाश्विनमित्याख्यायते ।१५। तत उ हैतदुत रासभो न सर्वमिव जवं धावति ।१६। सृतं[5] मयेति[6] हतं मन्यमानः सहस्रं शंसेत् ।१७। सहस्रं ह्युदजयताम्[7] ।१८। तदाहुर्यद् बृहत्यायतनानि पृष्ठानि भवन्त्यथ कस्मात् त्रिष्टुभा प्रतिपद्यत इति ।१९। त्रिःशस्तैषा तिस्रश्च बृहत्यः संपद्यन्त एका च गायत्री ।२०। इदमु ह संधे रूपं यत् तिस्रो बृहत्यः ।२१। प्रथमरूपं गायत्री ।२२। अथ यद् बृहतीमभिसंपादयति ।२३। बृहती[8] ह्यभिवृतं संपद्यते[9] ।२४। अथ यद् बार्हतीनां प्रतिपदां प्रथमं प्रथमं प्रगाथं पुनरादायं ककुप्कारं शंसति ।२५। पुनरादायं वै सामगाः स्तुवते ।२६। तस्यैवैतद् रूपं क्रियते ।२७ ॥1॥

[1] L. P. उह्य° [2] L. P. एतदा° [3] L. P. °जिमयामा° [4–4] L (var.) ता: प्राजि° [5] L. remarks all MSS. excepting IO. read श्रितं [6] P. नयेति [7] L. P. Here ends *Khaṇḍa* 1 [8] L. बृहतीं [9] P. संपद्यन्ते

आग्नेयं क्रतुं शंसति ।१। तदिमँल्लोकमाप्नोति ।२। उषस्यं शंसति ।३। तदन्तरिक्षलोकमाप्नोति ।४। आश्विनं शंसति ।५। तदमुँल्लोकमाप्नोति ।६। सौर्यं क्रतुं शंसति ।७। अस्ति वै चतुर्थो देवलोक आपः ।८। तमेवास्य[1] तेनाप्नोति ।९। प्रगाथं शंसति ।१०। पशवो वै प्रगाथः ।११। पशूनामेवाप्त्यै ।१२। अथो प्राणापानौ वै बार्हतः प्रगाथः ।१३। प्राणापानावेव तदात्मन् धत्ते ।१४। अथो[2] शस्त्रस्यैव सेन्द्रतायै ।१५। द्यावापृथिवीयं शंसति ।१६। प्रतिष्ठे वै द्यावापृथिवी प्रतिष्ठित्या एव ।१७। द्विपदां शंसति ।१८। प्रतिष्ठानीयं वै छन्दो द्विपदा[3] प्रतिष्ठित्या एव ।१९। बार्हस्पत्यया परिदधाति ।२०। ब्रह्म वै बृहस्पतिः ।२१। ब्रह्मण्येव तदन्ततः प्रतितिष्ठति ।२२। अथैषा संपद् भवति[4] ।२३। त्रीणि गायत्रीशतानि ते द्वे बृहतीशते ।२४। सप्ततिमनुष्टुभः सप्ततिं पङ्क्त्यश्चत्वारिंशच्छतं[5] बृहतीनाम् ।२५। त्रयाणां त्रिष्टुप्छतानां गायत्रीशतमुद्धृत्य तानि त्रीणि बृहतीशतानि ।२६। तच्च गायत्रीशतं जगतीशतं च ते द्वे बृहतीशते ।२७। पञ्चाशत् त्रिष्टुभः पञ्चाशदुष्णिहः शतं



बृहत्यः संपद्यन्ते ।२८। अथ याः सप्तपञ्चाशतं बृहत्योऽत्रैव ताः संपन्नाः ।२९। अथ ये द्वापञ्चाश्यौ त्रिष्टुभौ द्विपदा च तास्तिस्रो बृहत्यः संपद्यन्ते ।३०। तन्नानाच्छन्दस्यानां सहस्रं सत् सहस्रं बृहत्यः संपद्यन्ते ।३१। न सहस्रमतिशंसेन्नार्वाक् सहस्रादित्येषा हैव स्थितिः ।३२ ॥2॥

[1] L. P. तमेव [2] L. अथ [3] L. (var.) P. द्विपदा: [4] L. P. Here ends *Khaṇḍa* 2 [5] L. P. पङ्क्तीश्च°

प्रो त्वेवाश्विनस्य [1–]विभूतिरिरिति दिश्यते[–1] ।१। एष आग्नेयः क्रतुः ।२। आग्नेयादेव क्रतोर्न निश्च्यवेत[2] ।३। अथ यद्याग्नेयं क्रतुं पुरा कालात् समतीयात् ।४। आश्विनमनु यत् किंच द्विदेवत्यमृक्षु तदनुवर्तयेत् ।५। सौर्ये क्रतौ पावमानीर्यथाच्छन्दसम् ।६। गायत्रीर्गायत्रे त्रिष्टुभस्त्रैष्टुभे जगतीर्जागते ।७। सर्वं सूर्यन्यङ्गं[3] सौर्यस्यायतने ।८। सर्वानैन्द्रान् प्रगाथान् प्रगाथस्यायतने ।९। सर्वं द्यावापृथिवीयं द्यावापृथिवीयस्यायतने ।१०। सर्वा द्विपदा द्विपदाया आयतने ।११। सर्वं बार्हस्पत्यं पुरस्तात् परिधानीयायै ।१२। एतद् वै किंचिदिवर्चां न प्रदिश्यते[4] ।१३। अथ वै चक्रीवदाश्विनम् ।१४। आलम्बधे[5] चक्रे अकूध्रीच्योऽक्षः ।१५। आ वां रथो अश्विना श्येनपत्वेति स उद्धिः ।१६। अथ चत्वार्यागस्त्यानि युक्तानि ।१७। स एष देवरथः ।१८। स एतेन देवरथेन स्वस्ति स्वर्गँल्लोकं समश्नुते ।१९। ससुपर्णं स्यात् ।२०। वयो वै सुपर्णः ।२१। तद् यथापक्षि[6] वयो भूत्वैवं तत् स्वस्ति स्वर्गँल्लोकं समश्नुते ।२२। द्विरेवाश्विनायाह्वयेते[7] प्रतिपदे चैव परिधानीयायै च ।२३। तद् यथा प्रतिघातेनानिवेष्ट्यमानो धावयेदेवं[8] तत् ।२४ ॥3॥

[1–1] L. P. विभूतिरतिदृश्यते [2] P. निश्रवेत [3] L. P. सौर्यं न्यङ्गं; L. (var.) सूर्यं न्य°; also as here [4] L. P. प्रदृश्यते; IO. प्रतिपद्यते; L. P. Here ends *Khaṇḍa* 3 [5] L. P. आलम्बने [6] IO. °पक्षिव; P. °पक्षी [7] L. P. °याह्वयते; BM². °याह्वयन्ते [8] L. P. धापये°

अथातः परिधानस्यैव मीमांसा ।१। यदादित्यो रराटचामतिसर्पेत् ।२। यदैनं स्वयं होता निर्जानीयात् ।३। यदास्य लोहितिमावीयात्[1] ।४। यदेवैनं[2] सर्वे रश्मयः प्रत्युप्येरन्[3] ।५। स कालः परिधानस्य ।६। एतस्मिन् ह वा एष कालेऽपहतपाप्मा विविक्तपाप्मा भवति ।७। अपहते पाप्मानं विविच्यते पाप्मना[4] य एतस्मिन् काले परिदधाति ।८। अथ यद्यभ्रं स्यात् ।९। एतद् वा अस्य तद् रूपं येन प्रजा बिभर्ति ।१०। इदमेकं यदयं प्राणोऽध्यात्मम् ।११। अतिरोहितो मदित्येव[5] तं मन्यमानः परिदध्यात् ।१२। विभ्राज आहुतिं जुहुयादनिर्ज्ञायमान आदित्ये ।१३। योऽनुपयुक्तः स्यात् ।१४। आविरेभ्यो भवति

।१५। द्वाभ्यां यजेत् ।१६। द्वाभ्यां ह्याश्विनमित्याख्यायते ।१७। अनवानं गायत्रीमुक्त्वा विराजोऽर्धर्चेऽवानिति ।१८। श्रीर्विराळन्नाद्यम् ।१९। श्रियां तद् विराज्यन्नाद्ये प्रतितिष्ठति ।२०। उत्तरेण विराजोऽर्धर्चेन वषट्करोति[6] ।२१। स्वर्गं एव तल्लोके यजमानं दधाति ।२२। विराजैव यजेदिति ह स्माह कौषीतकिः ।२३। त्रयस्त्रिंशदक्षरा वै विराट् ।२४। त्रयस्त्रिंशद् देवताः ।२५। अक्षरभाजो देवताः करोति ।२६। अश्विना वायुना युवं सुदक्षेति त्वेव स्थिताश्विनी त्रिष्टुप् तिरोअह्न्यवती ।२७। तिरोअह्न्या हि सोमा भवन्ति ।२८। अथो बलं वै वीर्यं त्रिष्टुप् ।२९। बलमेव तद् वीर्यं यजमाने दधाति ।३०। अनुवषट्करोत्याहुतीनामेव शान्त्यै ।३१। आहुतीनां प्रतिष्ठित्यै ।३२। संसन्नेषु[7] छन्दोगेषु प्रवृतहोमीये[8] आहुती जुहोति ।३३। महच्छस्त्रं वाक् च मनश्च प्रीते उद्यच्छातमिति[9] ।३४ ॥4॥

[1] L. P. °मापीयात्; L. (var.) as here [2] L. P. यदैनं [3] L. प्रत्युत्सर्पेरन्; ER. प्रत्युप्यन्ति [4] IO. पाप्मनो [5] L. P. Here ends *Khaṇḍa* 4 [6] BM[1]. BM[2]. अवानिति [7] BM[2]. संपन्नेषु [8] P. प्रवृत्त° [9] L. उद्यच्छाते इति; P. उद्यत्साते इति; L. P. Here ends *Khaṇḍa* 5

अथ हारियोजनेन चरन्ति ।१। हरी एव तत् प्रीणन्ति ।२। अत्र देवाः साध्याः प्रीता भवन्ति ।३। त्रिष्टुभं हारियोजनस्य पुरोनुवाक्यामनूच्य जगत्या यजति ।४। बलं वै वीर्यं त्रिष्टुप् ।५। पशवो जगती ।६। बल एव तद् वीर्येऽन्ततः पशुषु च प्रतितिष्ठति ।७। मद्वती याज्या मद्वद्धि तृतीयसवनम् ।८। अनुवषट्करोत्याहुतीनामेव शान्त्यै ।९। आहुतीनां प्रतिष्ठित्यै ।१०। तासां भूयिष्ठा धानानामाददीत ।११। पशवो वै धानाः ।१२। भूमानमेव तत् पशूनामात्मन् धत्ते ।१३। अथ यदृचं जपन्ति[1] स्वस्त्ययनमेव तत् कुर्वते[2] ।१४। ता आहवनीयस्य भस्मान्ते निवपन्ति[3] ।१५। योनिर्वै[4] पशूनामाहवनीयः ।१६। स्व एवैनांस्तद् गोष्ठेऽनपक्रमे दधति[5] ।१७। अथ शाकलान् जुह्वति ।१८। तद् यथाहिर्जीर्णायै त्वचो निर्मुच्येत ।१९। इषीका वा मुञ्जात् ।२०। एवमेवैते सर्वस्मात् पाप्मनः संप्रमुच्यन्ते[6] ।२१। अथ सव्यावृतोऽप्सु सोमानुपपरायन्ति ।२२। तानिहान्तर्वेद्यासादयन्ति ।२३। तद्धि सोमस्यायतनम् ।२४। व्यपदधति[7] दर्भपिञ्जूलानि ।२५। यदा वा आपश्चौषधयश्च संगच्छन्ते ।२६। अथ कृत्स्नः सोमः ।२७। ता वैष्णव्यर्चा निनयन्ति ।२८। यज्ञो वै विष्णुः ।२९। यज्ञ एवैनांस्तदन्ततः प्रतिष्ठापयन्ति ।३० ॥5॥

[1] L. P. add यदाहुतीर्जुह्वति [2] L. P. add यज्ञस्यैव शान्त्यै यजमानस्य च भिषज्यायै [3] P. निर्वपन्ति [4] L. (var.). P. ज्योतिर्वै [5] L. P. Here ends *Khaṇḍa* 6 [6] L. P. Here ends *Khaṇḍa* 7 [7] L. P. व्यव°



अथ प्राणान्त्संमृशन्ते[1] ।१। तद् यदेवात्र प्राणानां क्रूरीकृतं यद् विलिष्टं तदेवैतदाप्याययन्ति तद् भिषज्यन्ति ।२। भक्षपरिधीन् कुर्वते ।३। मानुषेणैव तद् भक्षेण दैवं भक्षमन्तर्दधते[2] ।४। अवभृथः ।५। अमुमेवैतत् सवनैरीप्सन्ति योऽसौ तपति ।६। उद्यन्तं प्रातःसवनेन ।७। मध्ये सन्तं माध्यंदिनेन सवनेन ।८। अस्तं यन्तं तृतीयसवनेन ।९। स वा एषोऽपः प्रविश्य वरुणो भवति ।१० ॥6॥

[1] L. P. °मृशन्ति [2] L. P. Here ends *Khaṇḍa* 8

तस्माद् वारुणमेककपालं पुरोळाशं निर्वपन्ति[1] ।१। एकस्था वै श्रीः ।२। श्रीर्वै वरुणः ।३। श्रियामेव तदन्ततः प्रतितिष्ठन्ति[2] ।४। तेऽन्तरेण चात्वालोत्करा उपनिष्क्रामन्ति ।५। तद्धि यज्ञस्य तीर्थमाप्नानं नाम ।६। तदेतदृचाभ्युदितम् ।७। आप्नानं तीर्थं क इह प्र वोचदिति ।८। एतेन वै देवास्तीर्थेन यज्ञं प्रपद्य सर्वान् कामानापुः ।९। तथो एवैतद् यजमान एतेनैव तीर्थेन यज्ञं प्रपद्यते[3] ।१०। सर्वान् कामानाप्नोति[4] ।११। ते यस्यां दिश्यापो भवन्ति तां दिशमभ्यावृत्य चरन्ति ।१२। सा वै प्राची दिग् यस्यां देवताः ।१३। चतुरः प्रयाजान् यजत्यृते बर्हिष्कम्[5] ।१४। बर्हिष्मन्तमुत्सृजति ।१५। न ह्यत्र बर्हिः स्तीर्यते ।१६। वार्त्रघ्नावाज्यभागौ भवतः पाप्मन एव वधाय ।१७। अथो हास्य पौर्णमासात् तन्त्रादनितं भवति ।१८। अप्सुमन्तौ हैके कुर्वन्ति ।१९। वार्त्रघ्नौ त्वेव स्थितौ ।२०। अथ यदप्सु वरुणं यजति ।२१। स्व एवैनं तदायतने प्रीणाति ।२२। अथ यदग्नीवरुणौ यजति ।२३। अत्राग्निः सर्वेषु हविःषु भागी भवति ।२४। द्वावनुयाजौ यजत्यृते बर्हिष्कम्[6] ।२५। बर्हिष्मन्तमुत्सृजति ।२६। प्रजा वै बर्हिः ।२७। नेत् प्रजामप्सु प्रवृणजानीति ।२८ ॥7॥

[1] L. P. निर्वपति [2] L. P. प्रतितिष्ठति [3] L. P. प्रपद्य [4] L. P. Here ends *Khaṇḍa* 9 [5] L. P. बर्हिष्कान् [6] L. P. बर्हिष्कौ

त एकशतं प्रयाजानुयाजा भवन्ति ।१। शतायुर्वै पुरुषः[1] शतवीर्यः शतेन्द्रियः ।२। उप य एकशततमः स आत्मा ।३। तदेतदङ्गिरसामयनम् ।४। स एतेनायनेन[2] प्रतिपद्याङ्गिरसां[3] सलोकतां सायुज्यमाप्नोति ।५। अथ याः षड् वाष्टौ वा वषट्कृतयः ।६। तदादित्यानामयनम्[4] ।७। स एतेनायनेन[5] प्रतिपद्यादित्यानां[6] सलोकतां सायुज्यमाप्नोति[7] ।८। अनूबन्ध्या ।९। चतुर्थमेवैतत् सवनं यदनूबन्ध्या ।१०। तस्मादच्युता भवति ।११। चतुर्थं ह्येवैतत् सवनानाम् ।१२। सा वै मैत्रावरुणी भवति ।१३। अग्नीषोमीयो हि पुरस्तात् कृतो भवति[8] ।१४। तस्मान्मैत्रावरुणी भवति ।१५। यज्ञस्यैव सभारतायै ।१६। अथ यदप्सु

वरुणं यजति ।१७। अत्र मित्रो हीनो भवति ।१८। तस्मान्मैत्रावरुणी भवति ।१९। मित्रस्यैवानुलब्ध्यै[9] ।२०। अथ यदि पशुरावीतोऽनुपाकृतो[10] म्रियेत ।२१। ऋत्विग्भ्यस्तं कारयेत् ।२२। अथान्यं तद्रूपं तद्वर्णमालभेरन्[11] ।२३। तमाप्रीतं पर्यग्निकृतमुदञ्चं नयेयुः[12] ।२४। तस्यानु न्यायमितरं[13] कर्षयेयुः[14] ।२५। तयोर्नाना वपे उत्खिद्य नाना श्रपयित्वा नानावदाय समाने वषट्कारे जुहुयुः ।२६। तयोर्नानैव पशुपुरोळाशौ श्रपयित्वा नानावदाय समाने वषट्कारे जुहुयुः ।२७। तयोर्नानैव हविषी श्रपयित्वा नानावदाय समाने वषट्कारे जुहुयुः ।२८। एवं तृतीयगुदावेवं जाघन्यौ[15] ।२९। यदि त्वप्येकयैवाप्रियाप्रीतः[16] स्यात् ।३०। तेनैव प्रचरेयुरिति सा स्थितिः ।३१। प्राणा वा आप्र्यः[17] ।३२। प्राणानेवास्मिँस्तद् दधाति ।३३ ॥8॥

[1] L. P. add शतपर्वा [2] IO. °यतनेन [3] L. °पद्यतेङ्गि° [4] IO. °मायनं
[5] IO. °यतनेन; L. (var.) एनेना° [6] L. P. °पद्यत आदि° [7] L. P. Here ends *Khaṇḍa* 10
[8] L. (var.) adds तस्मादच्युता भवति [9] L. P. Here ends *Khaṇḍa* 11 [10] L. P. IO. °रानीतो° [11] L. P. तद्देवत्यं पशुमालभेरन्. L. records the reading तद्वर्णं (for तद्देवत्यं) in IO. but does not mention the omission of पशुं therein [12] L. P. add तं संज्ञपयेयुः
[13] L. (var.) ज्ञातमि°; ज्ञायमि°; the latter is also P. reading [14] L. कर्शयेयुः
[15] IO. BM¹. जघन्यौ [16] IO. °कयैवावाप्रीतः [17] L. P. आप्रियः

अथ[1] यद्यष्टापदी स्यात् कथं स्यादिति ।१। गर्भस्य त्वचो वपा रूपं[2] फालीकरणान् गर्भमिति शामित्रे श्रपयित्वेतरस्य वषट्कारेषु शामित्र[3] एव जुहुयुः ।२। रक्षांसि ह वा एतद् यज्ञं गच्छन्ति यदत्रैतादृग् भवति ।३। तानि तेनापहन्ति ।४। तदरक्षोहतम् ।५। एवं नु यदि पशुरनूबन्ध्या भवति ।६। यद्यु वै पयस्या ।७। एतद् वै मित्रावरुणयोः स्वं हविर्यत् पयस्या ।८। मित्रावरुणयोः पयस्येति ह[4] स्थिता[5] ।९। अथ यदि गोपशुर्भवति ।१०। गोसंस्तवौ[6] वै मित्रावरुणौ ।११। तस्माद् गोपशुर्भवति ।१२। [7-]अथ यत् त्रिष्टुभो याज्या भवन्ति ।१३। बलं वै वीर्यं त्रिष्टुप् ।१४। बलमेव तद् वीर्यं यजमाने दधाति[-7] ।१५। युवं वस्त्राणि पीवसा वसाथे इति वपायै याज्या ।१६। पीवसेति तद् वपायै मेदसो रूपम् ।१७। यद् बंहिष्ठं नातिविधे सुदानू इति पुरोळाशस्य ।१८। बंहिष्ठमिति बहुल इव हि पुरोळाशः ।१९। प्र बाहवा सिसृतं जीवसे न इति हविषः ।२०। बाहवेति तद्धविषोऽङ्गानां रूपम्[8] ।२१। उदङ्ङुदवसति[9] ।२२। उदङ् हि जीवलोकः ।२३। उदङ्ङुदवसाय वैष्णव्यर्चा पूर्णाहुतिं जुहोति ।२४। यज्ञो वै विष्णुः ।२५। यज्ञमेव तदारभते ।२६। पञ्चकपालः पुरोळाशो भवति ।२७। पञ्चपदा पङ्क्तिः ।२८। पाङ्क्तो वै यज्ञो यज्ञस्यैवाप्त्यै



।२९। यद्यु वा अष्टाकपालः पौर्णमासमेव तन्त्रं भवति ।३०। प्रतिष्ठा वै पौर्णमासं प्रतिष्ठित्या एव ।३१। इदं त्वेव प्रत्यक्षं पुनराधेयस्य रूपं यत् पदपङ्क्त्यो याज्यापुरोनुवाक्याः ।३२। तथैव व्यतिषक्ताः ।३३। तस्यां संस्थितायां यजमानोऽग्निहोत्रं जुहोति ।३४। संस्थिते ह्यग्न्याधेयेऽग्निहोत्रं हूयते ।३५। तस्मात् तस्यां संस्थितायां यजमानोऽग्निहोत्रं जुहुयादिति यजमानोऽग्निहोत्रं[10] जुहुयादिति[11] ।३६ ॥9॥

[1] IO. यथा [2] L. P. add फालीकरणानां [3] P. शामित्रा [4] L. P. हि [5] L. P. Here ends *Khaṇḍa* 12 [6] P. °स्तवो [7-7] L. P. omit [8] L. P. Here ends *Khaṇḍa* 13 [9] L. P. °वस्यति [10] L. P. omit [11] L. P. Here ends *Khaṇḍa* 14

## इति द्वितीयदशकेऽष्टमोऽध्यायः

ते वै दीक्षिष्यमाणा अग्नीन्त्संनिवपन्ते ।१। एकधैव तद् बलं वीर्यं यजमाना[1] आत्मन् दधते ।२। अथैतां संनिवपनीयामिष्टिं तन्वते ।३। तेऽग्नये ब्रह्मण्वतेऽष्टाकपालं पुरोळाशं निर्वपन्ति ।४। अग्नये क्षत्रवत एकादशकपालम् ।५। अग्नये क्षत्रभृते द्वादशकपालम् ।६। ब्रह्मक्षत्रे एव तद् यजमानाः समारोहन्ति ।७। ताभ्यामेवैतत् स्वस्ति संवत्सरं तरन्ति[2] ।८। [3–]त एतेन[–3] प्राजापत्येन पशुना यजन्ते ।९। प्रजापतिप्रसूताः स्वस्तीमं संवत्सरं समश्नवामहा इति ।१०। तं[4] हैके वायव्यं कुर्वन्ति ।११। एतद् वै प्रजापतेः प्रत्यक्षं रूपं यद् वायुरिति ।१२। अग्नय उ हैके कामाय कुर्वन्ति ।१३। अग्निर्वै कामो देवानामीश्वरः ।१४। सर्वेषामेव देवानां प्रीत्यै ।१५। तस्य हैके वैश्वानरीयं पशुपुरोळाशं कुर्वन्ति ।१६। असौ वै वैश्वानरो योऽसौ तपति ।१७। एतमेव तत् प्रीणन्ति[5] ।१८। [6–]अथ या बहूनां संनिवपनीयोखा संभरणीया सैकस्य दीक्षिष्यमाणस्य भवति[–6] ।१९। ते पुरस्तादेव दीक्षाप्रसवान्[7] कल्पयन्ते[8] ।२०। तैषस्यामावास्याया एकाह उपरिष्टाद् दीक्षेरन् ।२१। माघस्य वेत्याहुः ।२२। तदुभयं व्युदितम्[9] ।२३। तैषस्य त्वेवोदिततरमिव ।२४। त एतं त्रयोदशमधिचरं मासमाप्नुवन्ति ।२५। एतावान् वै संवत्सरो यदेष त्रयोदशो मासः ।२६। तदत्रैव सर्वः संवत्सर आप्तो भवति[10] ।२७। स वै माघस्यामावास्यायामुपवसत्युदङ्ङावर्त्स्यन् ।२८। उपेमे वसन्ति ।२९ ॥1॥

[1] L. P. omit [2] L. (var.) P. चरन्ति; L. P. add बहूनां चेष्यमाणानामेषा संनिवपनीयोखा (P. षा) संभरणीया सैवैकस्य दीक्षिष्यमाणस्य भवति ॥१॥ [3–3] L. P. अथैतेन; L. (var.) as here [4] L. P. तस्य [5] IO. प्रीणाति [6–6] L. P. omit [7] L. (var.) °प्रसुवान् [8] L. (var.) कल्पन्ते [9] C. विदितं [10] L. P. Here ends *Khaṇḍa* 2

प्रायणीयेनातिरात्रेण[1] यक्ष्यमाणाः ।१। तदेनं प्रथममाप्नुवन्ति ।२। तं चतुर्विंशेनारभन्ते ।३। तदारम्भणीयस्यारम्भणीयत्वम् ।४। स षण्मासानुदङ्ङेति ।५। तमूर्ध्वैः षळहैरनुयन्ति ।६। स षण्मासानुदङ्ङित्वा तिष्ठते दक्षिणावर्त्स्यन् ।७। उपेमे वसन्ति वैषुवतीयेनाह्ना यक्ष्यमाणाः ।८। तदेनं द्वितीयमाप्नुवन्ति ।९। स षण्मासान् दक्षिणैति ।१०। तमावृत्तैः षळहैरनुयन्ति ।११। स षण्मासान् दक्षिणेत्वा तिष्ठत उदङ्ङावर्त्स्यन् ।१२। उपेमे वसन्ति माहाव्रतीयेनाह्ना यक्ष्यमाणाः ।१३। तदेनं तृतीयमाप्नुवन्ति ।१४। तं यत् त्रिराप्नुवन्ति ।१५। त्रेधा विहितो वै संवत्सरः ।१६। संवत्सरस्यैवाप्त्यै ।१७। तदुतैषाभिगीयते[2] ।१८। अहोरात्राणि विदधदूर्णाका[3] इव धीर्यः[4] ।१९। षण्मासो दक्षिणादित्यः[5]



षळुदङ्ङेति[6] सूर्यं इति ।२०। षड्ढ्येष मासानुदङ्ङेति[7] ।२१। षड् दक्षिणा[8] ।२२। अथैतामग्निचित्यायां पञ्चहविषं दीक्षणीयामिष्टिमेके तन्वते[9] ।२३। पाङ्क्तो वै यज्ञो यज्ञस्यैवाप्त्यै ।२४। अथैतामातिथ्यां पञ्चहविषमेवेष्टिमेके तन्वते[9] ।२५। पाङ्क्तो वै यज्ञो यज्ञस्यैवाप्त्यै ।२६। अथैता बह्वग्नीरन्वाह ।२७। बहून् ह्यग्नीन् प्रणयन्ति ।२८। [10–]तस्माद् बह्वग्नीरन्वाह[–10] ।२९। ता वै चतस्रो भवन्ति ।३०। चतुष्टयं वा इदं सर्वम् ।३१। अस्यैव सर्वस्याप्त्यै ।३२। त्रिः प्रथमया त्रिरुत्तमयाष्टौ संपद्यन्ते ।३३। अष्टाक्षरा गायत्री ।३४। गायत्रो वा अग्निर्गायत्रच्छन्दाः ।३५। स्वेनैव तच्छन्दसाग्नीन् प्रणयन्ति ।३६। [10–]ता वा उपांशु भवन्ति ।३७। रेतःसिक्तिर्वा अग्निचित्या ।३८। उपांशु वै रेतः सिच्यते ।३९। अभिरूपा भवन्ति ।४०। यद् यज्ञेऽभिरूपं तत् समृद्धं यज्ञस्यैव समृद्ध्यै[–10] ।४१। अथैनं[11] चिन्वन्ति यावदहं कामयन्ते ।४२। अथैनं[12] संचितं सामभिः परिष्टुवन्ति ।४३ ॥2॥

[1] L. प्रायणीयेणा° [2] L. °षापि यज्ञगाथा°; remarks that three MSS. have यज्ञगाथा on the margin; EM. °षाभि यज्ञगाथा°; P. °षापि गीयते [3] L. P. °र्णावा [4] L. (var.) जूर्यः [5] L. P. °णा नित्यः; L. (var.) as here [6] L. (var.) °ड्डुदगेति [7] L. P. उदङ् मासानेति [8] L. P. add तद्वै न तस्मिन् काले दीक्षेरन्ननागतं सस्यं भवति दहरकाण्यहानि भवन्ति संवेपमाना अवभृथादुदायन्ति तस्मादत्र न दीक्षेरंश्चैत्रस्यामावास्याया एकाह उपरिष्टाद्दीक्षेरन्नागतं सस्यं भवति महान्त्यहानि भवन्त्यसंवेपमाना अवभृथादुदायन्ति तस्मादेतत्स्थितम् ॥३॥ [9] L. P. add पञ्चपदा पङ्क्तिः [10–10] L. P. omit [11] L. P. अथ [12] L. P. अथैतं

अथ होतारमाहुरग्न्युक्थमनुशंसेति[1] ।१। रुद्रो ह वा एष देवानामशान्तः संचितो भवति ।२। तमेवैतच्छमयन्ति[2] ।३। निरुक्तं वैश्वानरं यजति ।४। निरुक्तो ह्येष तदा भवति यदाग्नीन् प्रणयन्ति[3] ।५। अथात ऊर्ध्वमैकाहिकं कर्म ।६। हविर्धानयोः प्रवर्तनमग्नीषोमयोः प्रणयनमग्नीषोमीयः पशुस्तस्योक्तं ब्राह्मणम् ।७। अथाग्नीषोमीयस्य पशुपुरोडाशमन्वञ्चि देवसूभ्यो हवींषि निर्वपन्ति ।८। एता ह वै देवताः सवानामीशते ।९। ता अत्र प्रीणन्ति ।१०। ता एभ्यः[4] प्रीताः सवान्[5] प्रस्वन्ति ।११। [6–]तस्माद् देवस्वः ।१२। ता[–6] वा अष्टौ भवन्ति ।१३। एताभिर्वै देवाः सर्वा अष्टीराश्नुवत ।१४। तथो एवैतद् यजमाना एताभिरेव सर्वा अष्टीरश्नुवते ।१५। अत्र हैके सर्वपृष्ठायै हवींषि निर्वपन्ति ।१६। सर्वं वा अग्निचित्या ।१७। सर्वेण सर्वमाप्नवामेति ।१८। तानि वै दश हवींषि भवन्ति ।१९। दशदशिनी विराट् ।२०। श्रीर्विराळन्नाद्यम् ।२१। श्रियो विराजोऽन्नाद्यस्योपाप्त्यै ।२२। अथ सुन्वन्ति यावदहं कामयन्ते[7] ।२३। अथानूबन्ध्यस्य वपायां संस्थितायां त्वाष्ट्रेण पशुना चरन्ति ।२४। रेतःसिक्तिर्वै त्वाष्ट्रः ।२५। पत्नीशाले चरन्ति ।२६। पत्नीषु वै रेतः सिच्यते ।२७। उपांशु

चरन्ति ।२८। रेतःसिक्तिर्वै त्वाष्ट्रः।२९। उपांशु वै रेतः सिच्यते।३०। पर्यग्निकृतमुत्सृजन्ति न संस्थापयन्ति ।३१। रेतःसिक्तिर्वै त्वाष्ट्रः ।३२। नेद् रेतः सिक्तं पुरा कालात् संस्थापयामेति ।३३ ।।3।।

[1] L. P. ०मनुजपेति [2] L. P. ०च्छमयति [3] L. P. Here ends *Khaṇḍa* 4
[4] L. P. अत्र [5] L. (var.) सर्वान् [6–6] L. (var.) तस्मादेव स्वस्ता; P. तस्माद्देवस्य स्ता
[7] L. P. Here ends *Khaṇḍa* 5

तदाहुर्यदेते देवते आवाहयति[1] त्वष्टारं च वनस्पतिं च क्वास्यैते इष्टे भवत इति ।१। प्रयाजेषु वा एते देवते यजति ।२। अत्रैवास्यैते[2] इष्टे भवत इति[3] ।३। अथानूबन्ध्यस्य पशुपुरोळाशमन्वञ्चि देविकाभ्यो हवींषि निर्वपन्ति ।४। यातयामानि ह वा एतस्य छन्दांसि भवन्ति यः सोमेन यजते ।५। छन्दांसि वै देविकाः ।६। तद् यद् देविकाभ्यो हवींषि निर्वपन्ति ।७। तेन[4] हास्यायातयामानि पुनर्यामानि[5] भवन्ति ।८। अथो धीतरसानि ह वा एतस्य छन्दांसि भवन्ति यः सोमेन यजते ।९। छन्दांसि वै देविकाः ।१०। तद् यद् देविकाभ्यो हवींषि निर्वपन्ति ।११। छन्दसामेव सरसतायै ।१२। ता वा एता देव्यः ।१३। अथैष कः प्रजापतिः ।१४। तस्माद् देविकाः ।१५। तानि वै पञ्च हवींषि भवन्ति ।१६। पञ्चपदा पङ्क्तिः ।१७। पाङ्क्तो वै यज्ञो यज्ञस्यैवाप्त्यै ।१८। अत्र हैके देवीभ्यो हवींषि निर्वपन्ति ।१९। सर्वं वा अग्निचित्या ।२०। सर्वेण सर्वमाप्नवामेति ।२१। तानि वै दश हवींषि भवन्ति ।२२। दशदशिनी विराट् ।२३। श्रीर्विराळन्नाद्यम् ।२४। श्रियो विराजोऽन्नाद्यस्योपाप्त्यै ।२५। अत्र हैके दिशामवेष्टीः कुर्वन्ति ।२६। सर्वं वा अग्निचित्या ।२७। सर्वेण सर्वमाप्नवामेति ।२८। तानि वै [6–]षड्ढवींषि भवन्ति ।२९। षड् वा ऋतवः संवत्सरः ।३०। संवत्सरस्यैवाप्त्यै[–6] ।३१। [7–]अथोदवसानीयायां संस्थितायां[–7] मैत्रावरुण्या पयस्यया यजेत तस्या उक्तं ब्राह्मणम् ।३२। नैतयानिष्ट्वाग्निचिन्मैथुनं चरेदिति[8] ।३३ ।।4।।

[1] ER. आवाहयन्ति [2] L. P. तत्रै० [3] L. P. omit; here ends *Khaṇḍa* 6
[4] L. P. तथा [5] L. ०माणि [6–6] EM. ER. instead read पञ्च हवींषि भवन्ति पञ्चपदा पङ्क्तिः पाङ्क्तो वै यज्ञो यज्ञस्यैवाप्त्यै [According to E. Rāman Nampūtiri this is the *pāṭha* of the Tirunāvāya School of Vedists in Kerala] [7–7] L. P. संस्थितायां चोदवसानीयायां [8] L. P. चरेतेति; here ends *Khaṇḍa* 7

मुखं वा एतत् संवत्सरस्य यच्चतुर्विंशः[1] ।१। तस्मादग्निष्टोमो भवति ।२। अग्निष्टोमो हि



यज्ञानां मुखम् ।३। मुखत एव तत् संवत्सरं प्रीणन्ति ।४। तद्धैक[2] उक्थ्यं कुर्वन्ति ।५। यज्ञस्यैव सभारतायै ।६। तस्य चतुर्विंशः स्तोमो भवति ।७। चतुर्विंशतिर्वै संवत्सरस्यार्धमासाः ।८। संवत्सरस्यैवाप्त्यै ।९। तस्य वै[3] त्रीणि षष्टिशतानि स्तोत्रियाणां भवन्ति[4] ।१०। त्रीणि वै षष्टिशतानि संवत्सरस्याह्नाम् ।११। [5–]तत् संवत्सरस्याहान्याप्नुवन्ति[–5] ।१२। तस्य बृहत् पृष्ठं भवति ।१३। द्वितीयं वा एतदह्नां द्वितीयं बृहत् पृष्ठानाम् ।१४। तस्मादस्य बृहत् पृष्ठं भवति ।१५। अथ यत्र चतुर्विंशस्तोममुपयन्ति[6] ।१६। अवधृतं वा उ तत्र महाव्रतम् ।१७। बृहदु वा आयतनेन महाव्रतस्य पृष्ठं भवति ।१८। तस्माद् बृहदेवैतस्याह्नः पृष्ठं स्यादिति ।१९। तस्य संवत् संवत्सरमभि पर्युदितानि[7] छन्दोरूपाणि ।२०। होताजनिष्ट चेतन इत्यष्टर्चमाज्यं गायत्रीमात्रम् ।२१। गायत्रीमात्रो वै स्तोमः ।२२। तद् वै शस्त्रं समृद्धं यत् स्तोमेन संपद्यते ।२३। माधुच्छन्दसः [8–]प्रउगः स[–8] वै समृद्धः ।२४। तस्य रूपेणान्ये प्रउगाः कल्पन्ते ।२५। समृद्धं मे प्रथमतः कर्म कृतमसदिति ।२६। आ त्वा रथं यथोतय इति मरुत्वतीयस्य प्रतिपत् ।२७। इदं वसो सुतमन्ध इत्यनुचरः ।२८। एष एव नित्य एकाहातानस्तस्योक्तं ब्राह्मणम्[9] ।२९ ।।5।।

[1] L. P. ER. ०विंशम् [2] L. तं हैक [3] L. P. omit [4] L. P. संपद्यन्ते [5–5] L. P. संवत्सरस्यैवाप्त्यै [6] L. ०शमहरु०; EM. ER. omit स्तोमम् [7] L. P. ०पर्युदितं तस्यैतानि
[8–8] IO. प्रउगस्य [9] L. P. Here ends *Khaṇḍa* 8

कया शुभा सवयसः सनीळा इति मरुत्वतीयम् ।१। तस्यानुत्तमा[1] ते मघवन् नकिर्न्विति नवमी ।२। तया परिदधात्युत्तराः पूर्वाः शस्त्वा ।३। मारुत्यो हि ता भवन्ति ।४। अथैषा निष्केवल्या ।५। [2–]तस्मादेतया परिदधाति[–2] ।६। तस्मिन् वा अस्ति समान्या मरुतः संमिमिक्षुरिति ।७। संवत् तत् संवत्सरमभिवदति ।८। तदेतस्याह्नो रूपम् ।९। तदिदास भुवनेषु ज्येष्ठमिति बृहद्दिवो निष्केवल्यम् ।१०। बृहद्दिवेनात्र होता रेतः सिञ्चति ।११। तददो महाव्रतीयेनाह्ना प्रजनयति[3] संवत्सरे ।१२। संवत्सरे वै रेतः सिक्तं[4] जायते ।१३। तस्मिन् वा अस्ति सं ते नवन्त प्रभृता मदेष्विति ।१४। संवत् तत् संवत्सरमभिवदति ।१५। तदेतस्याह्नो रूपम् ।१६। तत् सवितुर्वृणीमहेऽद्या नो देव सवितरिति नित्यैव वैश्वदेवस्य प्रतिपच्चानुचरश्च[5] तयोरुक्तं ब्राह्मणम् ।१७। तद् देवस्य सवितुर्वार्यं महदिति सावित्रम् ।१८। [6–]तस्मिन् वा अस्ति[–6] प्रजावन्तं रयिमस्मे समिन्वत्विति ।१९। संवत् तत् संवत्सरमभिवदति ।२०। तदेतस्याह्नो रूपम् ।२१। ते हि द्यावापृथिवी विश्वशंभुवेति द्यावापृथिवीयम् ।२२। [7–]तस्मिन् वा अस्ति[–7] पनाय्यमोजो अस्मे समिन्वतमिति ।२३।

संवत् तत् संवत्सरमभिवदति ।२४। तदेतस्याह्नो रूपम् ।२५। किमु श्रेष्ठः किं यविष्ठो न आजगन्नित्यार्भवम् ।२६। [7–]तस्मिन् वा अस्ति[–7] संवत्सर इदमद्या व्यख्यतेति ।२७। तत् प्रत्यक्षं संवत्सरमभिवदति ।२८। तदेतस्याह्नो रूपम् ।२९। यज्ञस्य वो रथ्यं विश्पतिं विशामिति शार्यातं वैश्वदेवम् ।३०। [8–]तस्मिन् वा अस्तीन्द्रो[–8] मित्रो वरुणः सं चिकित्रिर इति ।३१। संवत् तत् संवत्सरमभिवदति ।३२। तदेतस्याह्नो रूपम् ।३३। वैश्वानराय धिषणामृतावृध इति वैश्वानरीयम् ।३४। [7–]तस्मिन् वा अस्ति[–7] धिया रथं न कुलिशः समृण्वतीति ।३५। संवत् तत् संवत्सरमभिवदति ।३६। तदेतस्याह्नो रूपम् ।३७। वृष्णे शर्धाय सुमखाय वेधस इति मारुतम् ।३८। [7–]तस्मिन् वा अस्ति[–7] गिरः समञ्जे विदथेष्वाभुव इति ।३९। संवत् तत् संवत्सरमभिवदति ।४०। तदेतस्याह्नो रूपम् ।४१। यज्ञेन वर्धत जातवेदसमिति जातवेदसीयम् ।४२। [7–]तस्मिन् वा अस्ति[–7] संददस्वान् रयिमस्मासु दीदिहीति ।४३। संवत् तत् सवत्सरमभिवदति ।४४। तदेतस्याह्नो रूपम्[9] ।४५ ॥6॥

[1] L. P. omit तस्य [2–2] L. P. omit; L. (var.) as here [3] L. P. प्रजनयतीति [4] L. सिक्तिर्; P. सिक्तिं [5] ER. प्रतिपदनुचरौ [6–6] L. P. omit [7–7] L. P. omit; L. (var.) as here [8–8] L. P. omit तस्मिन् वा अस्ति; L. (var.) as here [9] L. P. add इत्याग्निमारुतसूक्तानीत्येतस्याह्नः सूक्तानि तदग्निष्टोमो वोक्थं वाहः संतिष्ठतेऽग्निष्टोम इति पैङ्ग्यमुक्थ्यमिति कौषीतकम् ॥९॥

तद्धैतदहरेके छन्दोगाः सर्वस्तोमं कुर्वन्ति ।१। अनेनाह्ना षळहमाप्नुमः[1] ।२। षळहेन संवत्सरम् ।३। ये च संवत्सरे कामाः ।४। षळहो वा[2] उ सर्वः संवत्सर इति वदन्तः ।५। ते यदि तथा कुर्युः ।६। षळहक्लृप्तं शस्त्रं कल्पयीत ।७। यत् प्रथमस्याह्न आज्यं तदाज्यम् ।८। यो द्वितीयस्याह्नः प्रउगः स प्रउगः ।९। यत् तृतीयस्याह्नो मरुत्वतीयं तन्मरुत्वतीयम् ।१०। यच्चतुर्थस्याह्नो निष्केवल्यं तन्निष्केवल्यम् ।११। यत् पञ्चमस्याह्नो वैश्वदेवं तद् वैश्वदेवम् ।१२। यत् षष्ठस्याह्न आग्निमारुतं तदाग्निमारुतम् ।१३। तत्र पृष्ठ्यस्तोत्रियान्त्सर्वान्त्समाहृत्योपरिष्टात्[3] प्रगाथस्य प्रगाथीकृत्य शंसेत् षळहस्याप्त्यै ।१४। तद् यथैवैतेनाह्ना[4] छन्दोगाः षळहमाप्नुवन्ति षळहेन संवत्सरम् ।१५। ये च संवत्सरे कामाः ।१६। एवमेवैतेनाह्ना होता[5] षळहमाप्नोति षळहेन संवत्सरम् ।१७। ये च संवत्सरे कामाः ।१८। तद्ध स्मैतत् प्रदिश्याह सैषा मुग्धिरेवेति ।१९। यं कं च छन्दोगाः स्तोममुपापद्येरन् ।२०। न तदाद्रियेत ।२१। यदेवेदं शस्त्रं प्रावोचाम[6] ।२२। तत एव नेयात् ।२३। एते वा उ



स्तोमसाहे[7] सूक्ते यत् कयाशुभीयतदिदासीये ।२४। ताभ्यामेव न निश्च्यवेतेति न निश्च्यवेतेति[8] ।२५ ॥7॥

[1] L. P. °माप्नुवन् [2] IO. BM². omit [3] L. P. सर्वान् पृष्ठस्तोत्रियान् समा°; L. (var.) पृष्ठ्य (for पृष्ठ) [4] L. P. omit एव [5] IO. छन्दोगाः [6] L. प्रागैक्षाम; (var.) as here; P. प्रागैक्ष्याम [7] ER. स्तोमवाहे [8] L. P. Here ends *Khaṇḍa* 10

## इति द्वितीयदशके नवमोऽध्यायः

देवचक्रं वा एतत् परिप्लवं यत् संवत्सरः ।१। तदमृतम्[1] ।२। तस्मिन्नेतत् षट्तय-
मन्नाद्यम् ।३। ग्राम्याश्च पशव आरण्याश्चौषधयश्च वनस्पतयश्चाप्सुचरं च परिप्लवं च ।४।
तद् देवाः समारुह्य सर्वाँल्लोकाननु परिप्लवन्ते ।५। देवलोकं पितृलोकं जीवलोकम् ।६।
इममुपोदकमग्निलोकम्[2] ।७। ऋतधामानं वायुलोकम् ।८। अपराजितमिन्द्रलोकम् ।९।
अधिदिवं वरुणलोकम् ।१०। प्रतिदिवं मृत्युलोकम् ।११। रोचनं ब्रह्मणो लोकम् ।१२।
नाकं सत्तमँल्लोकानाम्[3] ।१३। तद् यदभिप्लवमुपयन्ति ।१४। संवत्सरमेव तद् यजमानाः
समारोहन्ति ।१५। तस्मिन्नेतत् षट्तयमन्नाद्यमाप्नुवन्ति ग्राम्याँश्च पशूनारण्याँश्चौषधीश्च
वनस्पतीँश्चाप्सुचरं च परिप्लवं च ।१६। द्विर्ज्योतिरुपयन्ति ।१७। तेन द्वयमन्नाद्यमाप्नु-
वन्ति ग्राम्याँश्च पशूनारण्याँश्च ।१८। द्विर्गामुपयन्ति ।१९। तेन द्वयमन्नाद्यमाप्नुवन्त्यो-
षधीश्च वनस्पतीँश्च ।२०। द्विरायुरुपयन्ति ।२१। तेन द्वयमन्नाद्यमाप्नुवन्त्यप्सुचरं च
परिप्लवं च ।२२ ॥1॥

[1] L. P. °मृतत्वं [2] L. इममपो° [3] L. remarks that one MS. reads सत्तममिति भाष्ये in the margin

ज्योतिः प्रथममहरुपयन्ति ।१। तस्य तान्येव छन्दोरूपाणि यानि प्रथमस्याह्नः ।२।
प्र वो देवायाग्नय इत्याज्यं प्रवत् ।३। प्रवद् वै प्रथमस्याह्नो रूपम् ।४। माधुच्छन्दसः
प्रउगः ।५। रथन्तरं वै साम सृज्यमानं माधुच्छन्दसः प्रउगोऽन्वसृज्यत ।६। तद् रूपेण
कर्म समर्धयति ।७। एतद् वा आर्भुकं[1] कर्म यद् रूपसमृद्धम्[2] ।८। इन्द्रो रथाय प्रवतं कृणो-
तीति मरुत्वतीयं प्रवत् ।९। प्रवद् वै प्रथमस्याह्नो रूपम् ।१०। आ याह्यर्वाङुपवन्धुरेष्ठा
इति निष्केवल्यमावत् ।११। आवद् वै प्रथमस्याह्नो रूपम्[3] ।१२। युञ्जते मन उत युञ्जते
धिय इति सावित्रं युक्तवत् ।१३। युक्तवद् वै प्रथमस्याह्नो रूपम् ।१४। प्र द्यावा यज्ञैः
पृथिवी ऋतावृधेति द्यावापृथिवीयं प्रवत् ।१५। प्रवद् वै प्रथमस्याह्नो रूपम् ।१६। इहेह
वो मनसा बन्धुता नर इत्यार्भवम् ।१७। उशिजो जग्मुरभि तानि वेदसेत्यभिवत् ।१८।
तद् राथन्तरं रूपम् ।१९। कथा देवानां कतमस्य यामनीति वैश्वदेवम् ।२०। कतम ऊती
[4-]अभ्या ववर्ततीत्यभिवत् ।२१। तद् राथन्तरं[-4] रूपम् ।२२। वैश्वानराय पृथुपाजसे विप
इति वैश्वानरीयम् ।२३। [5-]तस्मिन्त्सुम्नानि यजमान आ चक इत्यावत् ।२४। आवद् वै[-5]
प्रथमस्याह्नो रूपम् ।२५। प्रत्वक्षसः प्रतवसो विरप्शिन इति मारुतं प्रवत् ।२६। प्रवद्
वै प्रथमस्याह्नो रूपम् ।२७। एति प्र होता व्रतमस्य माययेति जातवेदसीयं प्रवत् ।२८।



प्रवद् वै प्रथमस्याह्नो रूपम् ।२९। इमँल्लोकं प्रथमेनाह्नाप्नुवन्ति ।३०। अग्निं देवं देव-
तानाम् ।३१। नामाधिभूतं वाचमात्मन् दधते ।३२ ॥2॥

[1] L. P. आर्धुकं [2] ER. रूपेण समृद्धम्; L. P. add आ त्वा रथं यथोतय इति मरुत्वतीयस्य प्रतिपदिदं वसो सुतमन्ध इत्यनुचर एष एव नित्य एकाहातानस्तस्योक्तं ब्राह्मणम् [3] L. P. add तत्सवितुर्वृणीमहेऽद्यानो देवसवितरिति नित्यैव वैश्वदेवस्य प्रतिपच्चानुचरश्च तयोरुक्तं ब्राह्मणम्
[4-4] L. P. °र्ततीत्यावदावद्वै प्रथमस्याह्नो [5-5] L. P. प्रवत् प्रवद्वै

गां द्वितीयमहरुपयन्ति ।१। तस्य तान्येव छन्दोरूपाणि यानि द्वितीयस्याह्नः ।२। त्वं
हि क्षैतवद् यश इत्याज्यम् ।३। त्वं विचर्षणे श्रव इति विवत् ।४। तदस्यान्तरिक्षस्य रूपम्
।५। विवृतमिव हीदमन्तरिक्षम् ।६। गार्त्समदः प्रउगः ।७। बृहद् वै साम सृज्यमानं गार्त्स-
मदः प्रउगोऽन्वसृज्यत ।८। तद् रूपेण कर्म समर्धयति ।९। एतद् वा आर्भुकं[1] कर्म यद्
रूपसमृद्धम् ।१०। विश्वानरस्य वस्पतिमिति मरुत्वतीयस्य प्रतिपद् विवती तस्या उक्तं
ब्राह्मणम् ।११। इन्द्र इत् सोमपा एक इत्यनुचरः ।१२। इन्द्रः सुतपा विश्वायुरिति विवाँ-
स्तस्योक्तं ब्राह्मणम् ।१३। उत्तिष्ठ ब्रह्मणस्पत इत्युद्वान् ब्राह्मणस्पत्यः ।१४। उत्तिष्ठेत्युद्वत्
।१५। उद्वद् वै द्वितीयमहः ।१६। इमा उ त्वा पुरुतमस्य कारोरिति मरुत्वतीयमुद्वत्
तस्योक्तं ब्राह्मणम् ।१७। सुत इत् त्वं निमिश्ल इन्द्र सोम इति निष्केवल्यम् ।१८। स्तोमे
ब्रह्मणि शस्यमान उक्थ इत्युद्वत् तस्योक्तं ब्राह्मणम् ।१९। विश्वो देवस्य नेतुरिति वैश्व-
देवस्य प्रतिपद् विवती तस्या उक्तं ब्राह्मणम् ।२०। आ विश्वदेवं सत्पतिमित्यनुचरो
विवाँस्तस्योक्तं ब्राह्मणम् ।२१। द्वे वैश्वदेवानां प्रतिपदौ ।२२। द्वावनुचरौ ।२३। [2-]द्वे
अहोरात्रे[-2] ।२४। षळृतुः संवत्सरः षड्विधः ।२५। अनु[3] द्वे द्यावापृथिवी द्वे इमे प्रतिष्ठे ।२६।
षळङ्गोऽयमात्मा षड्विधः ।२७। अनु[4] द्वाविमौ प्राणापानौ ।२८। [2-]षळिमे प्राणाः ।२९।
अनु[-2] तन्न संवत्सरसंपदो यन्ति ।३०। नात्मसंस्कृतेर्न प्राणसंस्कृतेः ।३१ ॥3॥

[1] L. P. आर्धुकं [2-2] L. P. omit [3] L. P. omit [4] L. P. add द्वे अहोरात्रे

अभूद् देवः सविता वन्द्यो नु न इति सावित्रमुद्वत् तस्योक्तं ब्राह्मणम् ।१। ते हि द्यावा-
पृथिवी विश्वशंभुवेति द्यावापृथिवीयं विवत् तस्योक्तं ब्राह्मणम् ।२। ततं मे अपस्तदु तायते
पुनरित्यार्भवमुद्वत् तस्योक्तं ब्राह्मणम् ।३। देवान् हुवे बृहच्छ्रवसः स्वस्तय इति वैश्वदेव-
मुद्वत् तस्योक्तं ब्राह्मणम् ।४। पृक्षस्य वृष्णो अरुषस्य नू सह इति वैश्वानरीयं वृषण्वत्[1]
।५। वृषा वा इन्द्रः ।६। वृषा त्रिष्टुप् ।७। तस्माद् वृषण्वत्[2] ।८। वृष्णे शर्धाय सुमखाय

वेधस इति मारुतं वृषण्वत्[1] तस्योक्तं ब्राह्मणम् ।९। यज्ञेन वर्धत जातवेदसमिति जातवेदसीयम् ।१०। समिधानं सुप्रयसं स्वर्णरमित्युद्वत् तस्योक्तं ब्राह्मणम् ।११। अन्तरिक्षलोकं द्वितीयेनाह्नाप्नुवन्ति[3] ।१२। वायुं[4] देवं देवतानाम् ।१३। आयुरधिभूतं[5] प्राणमात्मन् दधते[6] ।१४ ॥4॥

[1] P. वृष एव  [2] P. omits  [3] ER. omits अह्ना  [4] L. P. इन्द्रं  [5] L. P. ओजोऽधि°  [6] L. P. Here ends *Khaṇḍa* 3

आयुस्तृतीयमहरुपयन्ति ।१। तस्य तान्येव छन्दोरूपाणि यानि तृतीयस्याह्नः ।२। त्वमग्ने वसूँरिहेत्याज्यम् ।३। स्वयंसंभृतं वा एतच्छन्दो यदह्नो रूपेण संपद्यते ।४। तान् रोहिदश्व गिर्वणस्त्रयस्त्रिंशतमा वहेति ।५। तत्[1] तृतीयस्याह्नो रूपम् ।६। औष्णिहो वैश्वमनसः प्रउगः ।७। रथन्तरं वै साम सृज्यमानमौष्णिहो वैश्वमनसः प्रउगोऽन्वसृज्यत ।८। तद् रूपेण कर्म समर्धयति ।९। एतद् वा आर्धुकं[2] कर्म यद् रूपसमृद्धम् ।१०। तंतमिद् राधसे मह इति मरुत्वतीयस्य प्रतिपत् ।११। तंतमिति निनर्तिः[3] ।१२। अन्तस्तृतीयमहः ।१३। नीव वा अन्तं गत्वा नृत्यति ।१४। कद्रचङ् हि तत इयात् ।१५। त्रय इन्द्रस्य सोमा इत्यनुचरः ।१६। त्रय इति तत् तृतीयस्याह्नो रूपम् ।१७। प्रैतु ब्रह्मणस्पतिरिति प्रवान् ब्राह्मणस्पत्यः ।१८। प्र देव्येतु सूनृतेति निनर्तिः[3] ।१९। अन्तस्तृतीयमहः ।२०। नीव वा अन्तं गत्वा नृत्यति ।२१। कद्रचङ् हि तत इयात् ।२२। तिस्रो मरुत्वतीयानां प्रतिपदस्त्रयोऽनुचरास्त्रयो ब्राह्मणस्पत्याः ।२३। त्रयो वा इमे लोकाः ।२४। इमानेव तल्लोकानाप्नुवन्ति ।२५। तिष्ठा हरी रथ आ युज्यमानेति मरुत्वतीयम् ।२६। तिष्ठेति स्थितवत् ।२७। तदन्तरूपम् ।२८। अन्तस्तृतीयमहः ।२९। तिष्ठतीव वा अन्तं गत्वा ।३०। कद्रचङ् हि तत इयात् ।३१। इन्द्रस्य नु वीर्याणि प्र वोचमिति निष्केवल्यम् ।३२। तस्य तदेवान्तरूपं यद् भूतानुवाद्यहन्नहिमन्वपस्ततर्देति ।३३। यदेतद् भूतमिवाभि ।३४ ॥5॥

[1] L. P. त्रय इति तत्; L. (var.) as here; also omitting तत्  [2] L. P. आर्घुकं
[3] L. P. निनृत्तिः

उदु ष्य देवः सविता हिरण्ययेति सावित्रम् ।१। घृतेन पाणी अभि प्रुष्णुते मख इति घृतवत् ।२। बहुदेवत्यं वै घृतम् ।३। बहुदेवत्यं तृतीयमहः ।४। तस्माद् घृतवत् ।५। घृतेन द्यावापृथिवी अभीवृते इति द्यावापृथिवीयं घृतवत् तस्योक्तं ब्राह्मणम् ।६। तक्षन् रथं सुवृतं विद्मनापस इत्यार्भवम् ।७। तक्षन् हरी इन्द्रवाहा वृषण्वसू इति निनर्तिः[1] ।८। अन्तस्तृतीय-



महः ।९। नीव वा अन्तं गत्वा नृत्यति ।१०। कद्रचङ् हि तत इयात् ।११। आ नो भद्राः क्रतवो यन्तु विश्वत इति वैश्वदेवम् ।१२। अप्रायुवो रक्षितारो दिवेदिव इति निनर्तिः[1] ।१३। अन्तस्तृतीयमहः ।१४। नीव वा अन्तं गत्वा नृत्यति ।१५। कद्रचङ् हि तत इयात् ।१६। वैश्वानराय धिषणामृतावृध इति वैश्वानरीयम् ।१७। घृतं न पूतमग्नये जनामसीति घृतवत् तस्योक्तं ब्राह्मणम् ।१८। आ रुद्रास इन्द्रवन्तः सजोषस इति मारुतम् ।१९। तृष्णजे न दिव उत्सा उदन्यव इति ।२०। दिव इति तदमुष्य लोकस्य रूपम् ।२१। त्वामग्न ऋतायवः समीधिर इति जातवेदसीयम् ।२२। त्वां त्वामिति सप्रभृति ।२३। यथा वै सोदर्कमेवं सप्रभृत्यन्तरूपम्[2] ।२४। अमुँल्लोकं तृतीयेनाह्नाप्नुवन्ति ।२५। आदित्यं देवं देवतानाम् ।२६। रूपमधिभूतं चक्षुरात्मन् दधते [3]चक्षुरात्मन् दधते[4] ।२७ ॥6॥

[1] L. P. निनृत्तिः  [2] ER. भवत्यन्तरूपम्  [3] P. repeats रूपमधिभूतं  [4] L. P. Here ends *Khaṇḍa* 4

## इति द्वितीयदशके दशमोऽध्यायः

देवा वै मृत्युं पाप्मानमपजिघांसमाना ब्रह्मणः सलोकतां सायुज्यमीप्सन्त एतमभिप्लवं षळहमपश्यन् ।१। त एतेनाभिप्लवेनाभिप्लुत्य मृत्युं पाप्मानमपहत्य ब्रह्मणः सलोकतां सायुज्यमापुः ।२। तथो एवैतद् यजमाना एतेनैवाभिप्लवेनाभिप्लुत्य मृत्युं पाप्मानमपहत्य ब्रह्मणः सलोकतां सायुज्यमाप्नुवन्ति ।३। त एतेन पूर्वेण त्र्यहेणाभिप्लुत्य गवा चतुर्थे ऽहन्नयतन्त[1] गमनायैव ।४। आयुः पञ्चममहरुपायन्त्सर्वायुत्वाय ।५। ज्योतिः षष्ठमहः पुनः परस्तात् पर्यास्यन् मृत्योरेव पाप्मनो नान्ववायनाय[2] ।६। गां चतुर्थमहरुपयन्ति ।७। तस्य तान्येव छन्दोरूपाणि यानि चतुर्थस्याह्नः ।८। होताजनिष्ट चेतन इत्याज्यं जातवत् ।९। जातवद् वै चतुर्थस्याह्नो रूपम् ।१०। मैधातिथः प्रउगः ।११। बृहद् वै साम सृज्यमानं मैधातिथः प्रउगोऽन्वसृज्यत ।१२। तद् रूपेण कर्म समर्धयति ।१३। एतद् वा आर्ध्रुकं[3] कर्म यद् रूपसमृद्धम् ।१४। जनिष्ठा उग्रः सहसे तुरायेति मरुत्वतीयं जातवत् ।१५। जातवद् वै चतुर्थस्याह्नो रूपम् ।१६। उग्रो जज्ञे वीर्याय स्वधावानिति निष्केवल्यं जातवत् ।१७। जातवद् वै चतुर्थस्याह्नो रूपम् ।१८ ॥1॥

[1] L. °हन्त्ययजन्त; (var.) as here; P. °हन्नयजन्त [2] L. P. Here ends *Khaṇḍa* 1
[3] L. P. आर्धुकं

तद् देवस्य सवितुर्वार्यं महदिति सावित्रम् ।१। अजीजनत् सविता सुम्नमुक्थ्यमिति जातवत् ।२। जातवद् वै चतुर्थस्याह्नो रूपम् ।३। ते हि द्यावापृथिवी विश्वशंभुवेति द्यावापृथिवीयम् ।४। सुजन्मनी धिषणे अन्तरीयत इति जातवत् ।५। जातवद् वै चतुर्थस्याह्नो रूपम् ।६। अनश्वो जातो अनभीशुरुक्थ्य इत्यार्भवं जातवत् ।७। जातवद् वै चतुर्थस्याह्नो रूपम् ।८। अग्निरिन्द्रो वरुणो मित्रो अर्यमेति वैश्वदेवम् ।९। यज्ञं जनित्वी तन्वी नि मामृजुरिति जातवत् ।१०। जातवद् वै चतुर्थस्याह्नो रूपम् ।११। वैश्वानराय [1-]पृथुपाजसे विप[-1] इति वैश्वानरीयम् ।१२। तस्मिन्त्सुम्नानि यजमान आ चक इत्यावत् ।१३। आवद् वै चतुर्थस्याह्नः प्रायणीयरूपम् ।१४। पुनःप्रायणीयं हि चतुर्थमहः ।१५। जात आपृणो भुवनानि रोदसी इति जातवत् ।१६। जातवद् वै चतुर्थस्याह्नो रूपम् ।१७। प्र ये शुम्भन्ते जनयो न सप्तय इति मारुतं जातवत् ।१८। जातवद् वै चतुर्थस्याह्नो रूपम् ।१९। जनस्य गोपा अजनिष्ट जागृविरिति जातवेदसीयं जातवत् ।२०। जातवद् वै चतुर्थस्याह्नो रूपम् ।२१। अन्नं चतुर्थेनाह्नाप्नुवन्ति ।२२। चन्द्रमसं देवं देवतानाम् ।२३। दिशोऽधिभूतं श्रोत्रमात्मन् दधते ।२४ ॥2॥

[1-1] ER. धिषणामृतावृध



आयुः पञ्चममहरुपयन्ति ।१। तस्य तान्येव छन्दोरूपाणि यानि पञ्चमस्याह्नः ।२। अग्न ओजिष्ठमा भरेत्याज्यम् ।३। प्र नो राया परीणसेति रायेति रयिमत् ।४। रयिमदिति वा अस्य रूपम् ।५। अध्यासवत् तत् पङ्क्ते रूपम् ।६। संहार्यः प्रउगः ।७। रथन्तरं वै साम सृज्यमानं संहार्यः प्रउगोऽन्वसृज्यत ।८। तद् रूपेण कर्म समर्धयति ।९। एतद् वा आर्ध्रुकं[1] कर्म यद् रूपसमृद्धम् ।१०। क्व स्य वीरः को अपश्यदिन्द्रमिति मरुत्वतीयम् ।११। यो राया वज्री सुतसोममिच्छन्निति रायेति रयिमत् ।१२। रयिमदिति वा अस्य रूपम् ।१३। एतायामोप गव्यन्त इन्द्रमिति निष्केवल्यम् ।१४। गव्यन्त इति पशुमत् ।१५। पशुमदिति वा अस्य रूपम् ।१६। उदु ष्य देवः सविता हिरण्ययेति सावित्रम् ।१७। घृतेन पाणी अभि प्रुष्णुते मख इति घृतेनेति[2] पशुमत् ।१८। पशुमदिति वा अस्य रूपम् ।१९। घृतवती भुवनानामभिश्रियेति द्यावापृथिवीयं घृतवत् तस्योक्तं ब्राह्मणम् ।२०। [3-]ततं मे अपस्तदु तायते पुनरित्यार्भवम्[4] ।२१। स्रुचेव घृतं जुहवाम विद्मनेति घृतवत् तस्योक्तं ब्राह्मणम्[-3] ।२२। कथा देवानां कतमस्य यामनीति वैश्वदेवम् ।२३। सहस्रसा मेधसाताविव त्मनेति सहस्रसा इति पशुमत् ।२४। पशुमदिति वा अस्य रूपम् ।२५। पृक्षस्य वृष्णो अरुषस्य नू सह इति वैश्वानरीयम् ।२६। अपामुपस्थे महिषा अगृभ्णतेति महिषा इति पशुमत् ।२७। पशुमदिति वा अस्य रूपम् ।२८। प्र वः स्पळक्रन्त्सुविताय दावन इति मारुतम् ।२९। गवामिव श्रियसे शृङ्गमुत्तममिति गवामिवेति पशुमत् ।३०। पशुमदिति वा अस्य रूपम् ।३१। चित्र इच्छिशोस्तरुणस्य वक्षथ इति जातवेदसीयम् ।३२। वाजिन्तमाय सह्यसे सुपित्र्येति [5-]वाजिन्निति पशुमत् ।३३। पशुमदिति वा अस्य[-5] रूपम् ।३४। अध्यासवत् तत् पङ्क्ते रूपम् ।३५। पशून् पञ्चमेनाह्नाप्नुवन्ति ।३६। रुद्रं देवं देवतानाम् ।३७। यशोऽधिभूतं वीर्यमात्मन् दधते ।३८ ॥3॥

[1] L. P. आर्धुकं [2] L. P. घृतवद्घृतमिति [3-3] ER. reads तक्षन् रथं सुवृतं विद्मनापस इत्यार्भवं तक्षन् हरी इन्द्रवाहा वृषण्वसू इति वृषण्वत्तस्योक्तं ब्राह्मणम् [4] IO. adds तस्योक्तं ब्राह्मणम् [5-5] L. P. वाजवत्तदेतस्याह्नो

ज्योतिः षष्ठमहरुपयन्ति ।१। तस्य तान्येव छन्दोरूपाणि यानि षष्ठस्याह्नः ।२। सखायः सं वः सम्यञ्चमित्याज्यम् ।३। सखाय इति सर्वरूपम् ।४। सर्वरूपं वै षष्ठमहः ।५। तस्मात् सखाय इति सर्वानेवाभिवदति[1] ।६। संहार्यः प्रउगः ।७। बृहद् वै साम सृज्यमानं संहार्यः प्रउगोऽन्वसृज्यत ।८। तद् रूपेण कर्म समर्धयति ।९। एतद् वा आर्ध्रुकं[2] कर्म यद् रूपसमृद्धम् ।१०। महाँ इन्द्रो नृवदा चर्षणिप्रा इति मरुत्वतीयम् ।११। उरुः पृथुः सुकृतः कर्तृ-

भिर्भूदिति निनर्तिः[3] ।१२। अन्तः षष्ठमहः ।१३। नीव वा अन्तं गत्वा नृत्यति ।१४। कद्रचङ् हि तत इयात् ।१५। यो जात एव प्रथमो मनस्वानिति निष्केवल्यम् ।१६। तस्य तदेवान्तरूपं यद् भूतानुवादि[4] यो दासं वर्णमधरं गुहाकरिति ।१७। यदेतद् भूतमिवाभि ।१८। सोदर्कं भवति तद् द्वितीयमन्तरूपम् ।१९ ॥4॥

[1] L. P. °वानुवदति [2] L. P. आर्धुकं [3] L. P. निनृत्तिः [4] L. (var.) भूताभिवादि

तद् देवस्य सवितुर्वार्यं महदिति सावित्रम् ।१। दिवो धर्ता भुवनस्य प्रजापतिरिति ।२। दिव इति तदमुष्य लोकस्य रूपम् ।३। घृतेन द्यावापृथिवी अभीवृते इति द्यावापृथिवीयं घृतवत् ।४। सर्वदेवत्यं वै घृतम् ।५। सर्वदेवत्यं[1] षष्ठमहः ।६। तस्माद् घृतवत् ।७। किमु श्रेष्ठः किं यविष्ठो न आजगन्नित्यार्भवम् ।८। श्रेष्ठो यविष्ठ इति निनर्तिः[2] ।९। अन्तः षष्ठमहः ।१०। नीव वा अन्तं गत्वा नृत्यति ।११। कद्रचङ् हि तत इयात् ।१२। अबुध्रमु त्य इन्द्रवन्तो अग्नय इति वैश्वदेवम् ।१३। तस्य तदेवान्तरूपं यत् सोदर्कम् १४। वैश्वानराय धिषणामृतावृध इति वैश्वानरीयम् ।१५। घृतं न पूतमग्नये जनामसीति घृतवत् तस्योक्तं ब्राह्मणम् ।१६। धारावरा मरुतो धृष्ण्वोजस इति मारुतम् ।१७। धारावरा इति निनर्तिः[2] ।१८। अन्तः षष्ठमहः ।१९। नीव वा अन्तं गत्वा नृत्यति ।२०। कद्रचङ् हि तत इयात् ।२१। त्वमग्ने द्युभिस्त्वमाशुशुक्षणिरिति जातवेदसीयम् ।२२। त्वं त्वमिति सप्रभृति ।२३। यथा वै सोदर्कमेवं सप्रभृत्यन्तरूपम् ।२४। अपः षष्ठेनाह्नाप्नुवन्ति ।२५। प्रजापतिं देवं देवतानाम् ।२६। तेजोऽधिभूतममृतमात्मन् दधते[3] ।२७ ॥5॥

[1] P. adds वै [2] L. P. निनृत्तिः [3] L. P. Here ends *Khaṇḍa* 4

तदाहुः कस्माद् वैश्वदेवान्येवान्वायात्यन्ते नैकदेवत्यानि न द्विदेवत्यानीति ।१। नैकदेवत्येन यातयामं भवति ।२। न द्विदेवत्येन ।३। वैश्वदेवेनैव यातयामं भवति ।४। तस्माद् वैश्वदेवान्येवान्वायात्यन्ते ।५। एतेषामेवाह्नां सबलतायै ।६। [1–]एतेषामभिप्लवानामसमवीर्यताया इति[–1] ।७। ज्योतिः प्रथममहरुपयन्ति ।८। तस्यैवैकाहस्य रूपेण ।९। अयं ह्येकाह उत्तरेषामह्नां ज्योतिः ।१०। गां द्वितीयम् ।११। गच्छन्ति ह्यनेन[2] ।१२। आयुस्तृतीयम् ।१३। यन्ति ह्यनेन[2] ।१४। अग्निष्टोमौ प्रथमोत्तमे अहनी ।१५। चत्वार्युक्थ्यानि मध्ये ।१६। ब्रह्म वा अग्निष्टोमः ।१७। पशव उक्थ्यानि[3] ।१८। ब्रह्मणैव तत् पशूनुभयतः परिगृह्यात्मन् दधते ।१९। तेषां वा एतेषां चतुर्णामुक्थ्यानां[4] सहस्रं स्तोत्रियाः ।२०।



साहस्राः पशवः ।२१। प्र साहस्रं पोषमाप्नोति य एवं वेद ।२२। पृष्ठ्यान्तान् वा इतश्चतुरश्चतुरोऽभिप्लवानुपयन्ति ।२३। पशवो वा अभिप्लवाः श्रीः पृष्ठ्यानि ।२४। पशुभिरेव तच्छ्रियमुभयतः परिगृह्यात्मन् दधते ।२५। पृष्ठ्यारम्भणान् वा ऊर्ध्वं विषुवतश्चतुरश्चतुरोऽभिप्लवानुपयन्ति[5] ।२६। पशवो[6] वा अभिप्लवाः श्रीः[7] पृष्ठ्यानि ।२७। श्रियैव तत् पशूनुभयतः परिगृह्यात्मन् दधते[8] ।२८। क्लृप्तो वा अभिप्लवः क्लृप्तच्छन्दाः ।२९। यो वै यज्ञक्रतुः क्लृप्तच्छन्दा भवति ।३० ॥6॥

[1–1] L. P. °नामयातयामतायै [2] L. P. ह्येनेन [3] P. उक्थानि [4] P. °मुक्थानां
[5] L. विश्वजितः (for विषुवतः) [6] L. P. श्रीः [7] L. P. पशवः [8] L. P. Here ends *Khaṇḍa* 5

सर्वजागतानि ह[1] वै तस्य निविद्धानानि भवन्ति तृतीयसवने ।१। तथा यथायथं निविदो धीयन्ते ।२। ता एनान् यथायथं धीयमानाः सर्वेषु च लोकेषु सर्वेषु च कामेषु यथायथं दधति ।३। तद् यत् सर्वजागतानि तस्य[1] निविद्धानानि भवन्ति तृतीयसवने ।४। तेनो यः सर्वजागते तृतीयसवने कामः स उपाप्तः ।५। यद्वेवैतास्तन्व्यास्त्रिष्टुभ उक्थप्रतिपदोऽहरहः[2] शस्यन्ते ।६। तेनो यः सर्वत्रैष्टुभे तृतीयसवने कामः स उपाप्तः ।७। यद्वेवैषा तन्व्या गायत्र्यहरहः सुरूपकृत्नुः शस्यते ।८। तेनो यः सर्वगायत्रे तृतीयसवने कामः स उपाप्तः ।९। यद्वेवैष षळहः पुनःपुनरभिप्लवते ।१०। तस्मादभिप्लवो नाम ।११। अभिप्लवन्ते ह्यनेन[3] स्वर्गाय लोकाय यजमानाः स्वर्गाय लोकाय यजमानाः[4] ।१२ ॥7॥

[1] L. P. omit [2] L. P. omit उक्थप्रतिपदः [3] L. P. ह्येनेन [4] L. P. Here ends *Khaṇḍa* 6

## इति तृतीयदशके प्रथमोऽध्यायः

प्रथममहरयमेव लोक आयतनेन ।१। अग्निर्गायत्री त्रिवृत् स्तोमो रथन्तरं साम ।२। तद्ध्वस्य निदानम् ।३। तस्यैतानि छन्दोरूपाणि ।४। करिष्यत् प्रथमे पदे सदेवम् ।५। यद् वै भविष्यत् तत् करिष्यत् ।६। आवत् प्रवदेषवदर्षवदह्यवद्[1] युक्तवद् युञ्जानवज्ज्योतिष्मदिति[2] ।७। उपप्रयन्तो अध्वरमित्याज्यं प्रवत् ।८। प्रवद् वै प्रथमस्याह्नो रूपम् ।९। गायत्रं गायत्रप्रातःसवनो ह्येष त्र्यहः ।१०। इति नु व्यूळ्हे ।११। उद्धृत्यैतत् प्र वो देवायाग्नय इति समूळ्हे तस्योक्तं ब्राह्मणम् ।१२। माधुच्छन्दसः प्रउगस्तस्योक्तं ब्राह्मणम् ।१३। आ यात्विन्द्रोऽवस उप न इति मरुत्वतीयमावत् ।१४। आवद् वै प्रथमस्याह्नो रूपम् ।१५। स्वर्णरादवसे नो मरुत्वानिति स एवास्मिन् मरुत्स्यङ्गः ।१६। आ न इन्द्रो दूरादा न आसादिति निष्केवल्यमावत् ।१७। आवद् वै प्रथमस्याह्नो रूपम् ।१८। संपातौ निष्केवल्यमरुत्वतीये भवतः प्रथमेऽहन् ।१९। संपातैर्वै देवाः स्वर्गँल्लोकं समपतन् ।२०। तस्मादत्र[3] प्रथमौ शस्येते स्वर्ग्यौ ।२१। तद् यत् संपातौ निष्केवल्यमरुत्वतीये भवतः प्रथमेऽहन् ।२२। स्वर्गस्यैव लोकस्य समष्ट्या इति[4] ।२३ ॥1॥

[1] L. P. ॰दत्तवद्  [2] L. P. ॰ज्ज्योतिष्मद्रुक्मवदिति  [3] L. P. तस्मादेनौ  [4] L. P. omit

युञ्जते मन उत युञ्जते धियः प्र द्यावा यज्ञैः पृथिवी ऋतावृधेहेह वो मनसा बन्धुता नर इत्यार्भवम् ।१। तेन नियच्छति ।२। युक्तवन्ति च वै प्रवन्ति च प्रथमेऽहन्त्सूक्तानि शस्यन्ते ।३। तद् यदिहेह व इत्यार्भवं करोति ।४। तन्नियत्या[1] अप्रच्युत्यै[2] रूपम् ।५। हयो न विद्वाँ अयुजि स्वयं धुरीति वैश्वदेवं युक्तवत् ।६। युक्तवद् वै प्रथमस्याह्नो रूपम् ।७। तस्य द्वे उत्तमे उत्सृजति ।८। कुविदेते अवधृते आग्निमारुते शस्येते इति ।९। तदु ह स्माह कौषीतकिः ।१०। शंसेदेव सूक्तस्याव्यवच्छेदायेति[3] ।११। न ह वा ऋक्च्छस्त्रेण यातयामा भवति ।१२। नानुवचनेन ।१३। [4–]वषट्कारेण ह वै[–4] सा यातयामा भवति समानेऽहन् ।१४। वैश्वानराय पृथुपाजसे विप इति वैश्वानरीयम् ।१५। [5–]तस्मिन्त्सुम्नानि यजमान आ चक इत्यावत् ।१६। आवद् वै प्रथमस्याह्नो रूपम्[–5] ।१७। प्र शर्धाय मारुताय स्वभानव इति मारुतं प्रवत् ।१८। प्रवद् वै प्रथमस्याह्नो रूपम् ।१९। प्र तव्यसीं नव्यसीं धीतिमग्नय इति जातवेदसीयं प्रवत् ।२०। प्रवद् वै प्रथमस्याह्नो रूपम् ।२१। इमँल्लोकं प्रथमेनाह्नाप्नुवन्ति ।२२। गायत्रीं छन्दस्त्रिवृतं स्तोमं रथन्तरं साम ।२३। प्राचीं दिशं वसन्तमृतूनाम् ।२४। वसून् देवान् देवजातमग्निमधिपतिम्[6] ।२५ ॥2॥

[1] L. (var.), P. तन्नियुत्या  [2] L. (var.) P. प्रच्युत्यै  [3] L. P. omit इति  [4–4] L. P. वषट्कारेणैव  [5–5] L. P. प्रवत् प्रवद्वै प्रथमस्याह्नो रूपम्  [6] L. P. Here ends *Khaṇḍa* 1



द्वितीयमहरन्तरिक्षलोक आयतनेन ।१। इन्द्रस्त्रिष्टुप् पञ्चदशः स्तोमो बृहत् साम ।२। तद्ध्वस्य निदानम् ।३। तस्यैतानि छन्दोरूपाणि ।४। कुर्वन् मध्यमे पदे सदेवम् ।५। यद् वै प्रत्यक्षमास्प्रक्षँस्तत्[1] कुर्वत् ।६। हतवद् वज्रवद् वृत्रहवद् वृषण्वदुद्वद् विवत् स्थितं तन्वामिति[2] ।७। अग्निं दूतं वृणीमह इत्याज्यम् ।८। होतारं विश्ववेदसमिति विवत् तस्योक्तं ब्राह्मणम् ।९। गायत्रं गायत्रप्रातःसवनो ह्येष त्र्यहः ।१०। इति नु व्यूळ्हे ।११। उद्धृत्यैतत् त्वं हि क्षैतवद् यश इति समूळ्हे तस्योक्तं ब्राह्मणम् ।१२। गार्त्समदः प्रउगस्तस्योक्तं ब्राह्मणम् ।१३। इन्द्र सोमं सोमपते पिबेममिति मरुत्वतीयम् ।१४। माध्यंदिने सवने वज्रहस्तेति वज्रवत् ।१५। तदेतस्याह्नो रूपम् ।१६। या त ऊतिरवमा या परमेति निष्केवल्यम् ।१७। ताभिरू षु वृत्रहत्येऽवीर्न इति वृत्रहवत् ।१८। तदेतस्याह्नो रूपम् ।१९। [3–]विश्वो देवस्य नेतुरा[4] विश्वदेवं सत्पतिमिति[5] प्रतिपदनुचरौ तयोरुक्तं ब्राह्मणम्[–3] ।२० ॥3॥

[1] L. P. ॰मस्पृष्टं तत्  [2] L. तं त्वामिति; P. त्वामिति  [3–3] L. P. omit  [4] IO. omits नेतुर्; BM[1]. omits नेतुरा  [5] IO. omits सत्पतिं

तद् देवस्य सवितुर्वार्यं महदिति सावित्रम् ।१। त्रिरन्तरिक्षं सविता महित्वनेति ।२। तत् [1–]प्रत्यक्षमन्तरिक्षमभिवदति ।३। तदेतस्याह्नो[–1] रूपम् ।४। ते हि द्यावापृथिवी विश्वशंभुवेति द्यावापृथिवीयं विवत् तस्योक्तं ब्राह्मणम् ।५। तक्षन् रथं सुवृतं विद्मनापस इत्यार्भवम् ।६। तक्षन् हरी इन्द्रवाहा वृषण्वसू इति वृषण्वत् तस्योक्तं ब्राह्मणम् ।७। यज्ञस्य वो रथ्यं विश्पतिं विशामिति शार्यातं[2] वैश्वदेवम् ।८। वृषा केतुर्यजतो द्यामशायतेति वृषण्वत् तस्योक्तं ब्राह्मणम् ।९। पृक्षस्य वृष्णो[3] वृष्णे शर्धायेति[4] वृषण्वती[5] तयोरुक्तं ब्राह्मणम् ।१०। नू चित् सहोजा अमृतो नि तुन्दत इति जातवेदसीयम् ।११। होता यद् दूतो अभवद् विवस्वत इति विवत् तस्योक्तं ब्राह्मणम् ।१२। तस्य प्रातर्मक्षू धियावसुर्जगम्यादित्युत्तमा ।१३। परमेवैतदहरभिवदति ।१४। परमेवैतदहरभ्यारभ्य[6] वसन्तीति ह स्माह कौषीतकिः ।१५। अन्तरिक्षलोकं द्वितीयेनाह्नाप्नुवन्ति ।१६। त्रिष्टुभं छन्दः पञ्चदशं स्तोमं बृहत् साम ।१७। दक्षिणां दिशं ग्रीष्ममृतूनाम् ।१८। रुद्रान्[7] देवान् देवजातमिन्द्रमधिपतिम्[8] ।१९ ॥4॥

[1–1] L. P. प्रत्यक्षमन्तरिक्षस्य  [2] EM. omits  [3] L. P. add अरुषस्य नू सहो  [4] L. P. शर्धाय सुमखाय वेधस इति  [5] EM. omits  [6] L. ॰वैनदह॰  [7] L. P. मरुतो  [8] L. P. Here ends *Khaṇḍa* 2

तृतीयमहरसावेव लोक आयतनेन ।१। वरुणो जगती सप्तदशः स्तोमो वैरूपं साम ।२। तञ्चस्य निदानम् ।३। तस्यैतानि छन्दोरूपाणि ।४। चक्रवदुत्तमे पदे सदेवम् ।५। यद् वै भूतानुवादि तच्चक्रवत् ।६। अश्वावद् गोमद् रथवद् गतवत् स्थितवदन्तवत् सोदर्कमनिरुक्तं सप्रभृतोति ।७। युक्ष्वा हि देवहूतमानित्याज्यम् ।८। तदाहुर्यदन्तस्तृतीय-महरथ कस्माद् युक्तवदाज्यमिति ।९। एतेन वा अह्ना देवाः स्वर्गँल्लोकमायन् ।१०। युक्ता वै तदायन् ।११। तस्मादिति ब्रूयात् ।१२। अश्वाँ अग्ने रथीरिवेति रथवत् ।१३। तदेतस्याह्नो रूपम् ।१४। गायत्रं गायत्रप्रातःसवनो ह्येष त्र्यहः ।१५। इति नु व्यूळ्हे ।१६। उद्धृत्यैतत् त्वमग्ने वसूँरिहेति समूळ्हे तस्योक्तं ब्राह्मणम् ।१७। औष्णिह आत्रेयः प्रउगः ।१८। जागतं वै तृतीयमहः ।१९। तद् यदौष्णिह आत्रेयस्तृतीयस्याह्नः प्रउगः ।२०। तत् प्रातःसवनं जगती भजते[1] ।२१। त्र्यर्यमा मनुषो देवतातेति मरुत्वतीयम् ।२२। त्रीति[2] तत् तृतीयस्याह्नो रूपम् ।२३। यद् द्याव इन्द्र ते शतमिति वैरूपस्य स्तोत्रियः ।२४। शतं भूमीरुत स्युरिति निनर्तिः[3] ।२५। अन्तस्तृतीयमहः ।२६। नीव वा अन्तं गत्वा नृत्यति ।२७। कद्रचङ् हि तत इयात् ।२८। यदिन्द्र[4] यावतस्त्वमित्यनुरूपः ।२९। शिक्षेयमिन्महयते दिवेदिव इति निनर्तिः[3] ।३०। अन्तस्तृतीयमहः ।३१। नीव वा अन्तं गत्वा नृत्यति ।३२। कद्रचङ् हि तत इयात् ।३३। इन्द्र त्रिधातु शरणमिति त्रिवान् प्रगाथः[5] ।३४। त्रिधात्विति तत् तृतीयस्याह्नो रूपम् ।३५। अहं भुवं वसुनः पूर्व्यस्पतिरितीन्द्र-सूक्तम् ।३६। अहमहमिति सप्रभृति ।३७। यथा वै सोदर्कमेवं सप्रभृत्यन्तरूपं [6-]जागतम् ।३८। जागतं वै तृतीयमहः ।३९। तदेनत् स्वेन छन्दसा समर्धयति[-6] ।४०। यो जात एव प्रथमो मनस्वानित्येतस्मिंस्त्रैष्टुभे निविदं दधाति ।४१। तदेतदिन्द्रतनूसूक्तम् ।४२। एतस्मिन् ह गृत्समदो बाभ्रवो[7] निविदं दधदिन्द्रस्य प्रियं धामोपजगाम[8] ।४३। उप ह वा इन्द्रस्य प्रियं धाम गच्छति जयति परं लोकं य एतस्मिन्त्सूक्ते निविदं दधाति ।४४। तस्य तदेवान्तरूपं यद् भूतानुवादि यो दासं वर्णमधरं गुहाकरिति ।४५। यदेतद् भूतमि-वाभि ।४६। सोदर्कं भवति तद् द्वितीयमन्तरूपम्[9] ।४७ ॥5॥

[1] L. P. Here ends *Khaṇḍa* 3 [2] IO. omits [3] L. P. निनृत्तिः [4] L. इन्द्र
[5] L. P. सामप्रगाथः [6-6] L. P. omit [7] L. मार्गवो; (var.) as here [8] L. P. °जगामेति
[9] L. P. Here ends *Khaṇḍa* 4

अभि त्वा देव सवितरित्यभिवानानुचरः ।१। [1-]पृष्ठानामेव नानात्वाय[-1] ।२। तदा-हुर्यदन्तस्तृतीयमहरथ कस्मादभिवानानुचर इति ।३। एतेन वा अह्ना देवाः स्वर्गँल्लोक-



मायन् ।४। अभिप्रेप्सन्तो वै तदायन् ।५। तस्मादिति ब्रूयात् ।६। उदु ष्य देवः सविता हिरण्यया घृतवती भुवनानामभिश्रियेति घृतवती तयोरुक्तं ब्राह्मणम् ।७। अनश्वो जातो अनभीशुरुक्थ्य इत्यार्भवम् ।८। रथस्त्रिचक्रः परि वर्तते रज इति ।९। त्रिचक्र इति तत् तृतीयस्याह्नो रूपम् ।१०। परावतो ये दिधिषन्त आप्यमिति वैश्वदेवम् ।११। परावत इति ।१२। अन्तो वै परावतः ।१३। अन्तस्तृतीयमहः ।१४। अन्तेऽन्तं दधाति ।१५। अर्धर्चोदर्काणि ह वा एकानि सूक्तानि भवन्ति ।१६। पदोदर्काण्येकानि ।१७। अर्धपदो-दर्काण्येकानि ।१८। अथैतत् तृतीयपदोदर्कम्[2] ।१९। तत् तृतीयस्याह्नो रूपम् ।२०। वैश्वानराय धिषणामृतावृध इति वैश्वानरीयम् ।२१। घृतं न पूतमग्नये जनामसीति घृतवत् तस्योक्तं ब्राह्मणम् ।२२। धारावरा मरुतो धृष्ण्वोजस इति मारुतम् ।२३। धारावरा इति निनर्तिः[3] ।२४। अन्तस्तृतीयमहः ।२५। नीव वा अन्तं गत्वा नृत्यति ।२६। कद्रचङ् हि तत इयात् ।२७। त्वमग्ने प्रथमो अङ्गिरा ऋषिरिति जातवेदसीयम् ।२८। त्वं त्वमिति सप्रभृति ।२९। यथा वै सोदर्कमेवं सप्रभृत्यन्तरूपम् ।३०। अमुँल्लोकं तृतीयेनाह्नाप्नुवन्ति ।३१। जगतीं छन्दः सप्तदशं स्तोमं वैरूपं साम ।३२। प्रतीचीं दिशं वर्षा ऋतूनाम् ।३३। आदित्यान् देवान् देवजातम् ।३४। वरुणमधिपतिं वरुणमधिपतिम्[4] ।३५ ॥6॥

[1-1] L. P. omit [2] L. P. °दर्कमेव [3] L. P. निनृत्तिः [4] L. P. omit; here ends *Khaṇḍa* 5. There is no ending of the Chapter

## इति तृतीयदशके द्वितीयोऽध्यायः

अन्तस्तृतीयमहः ।१। ते देवा अन्तं गत्वा चतुर्थमहरैच्छन् ।२। तस्मादिच्छद्वत्[1] ।३। तदिष्ट्वाविन्दन् ।४। तस्माद् वित्तवत्[2] ।५। तदाहुर्यदन्तस्तृतीयमहरथ कस्माच्चतुर्थेऽहन् न्यूङ्खयतीति ।६। वाच [3-]एव तदायतनं[-3] विराजो[4] यच्चतुर्थमहः ।७। अन्नं विराळन्नं न्यूङ्खः ।८। अन्नमेव तद् यज्ञे च[5] यजमानेषु च दधाति ।९। अथो आप्यते[6] वै तृतीयेनाह्ना वाक् ।१०। तामेवैतच्चतुर्थेऽहन् विभावयति ।११। यथायस्तमं विनयेदेवं तत् ।१२। वाचो[7] विभूत्यै ।१३। तस्यैतानि छन्दोरूपाणि ।१४। सम्राड्वद् विराड्वत्[8] स्वराड्वज्जातवद्वूतिमद्[9] वीतिमत् परिवदभिवदुपवदिति ।१५। आग्निं न स्ववृक्तिभिरिति वैमदमाज्यम् ।१६। विमदेन वै देवा असुरान् व्यमदन्[10] ।१७। तद् यच्चतुर्थेऽहन्[11] विमदः शस्यते मध्यतश्च होत्रासु च ।१८। अङ्गादङ्गादेव तद् यजमानाः पाप्मानं विमदन्ति ।१९। अग्निर्जातो अथर्वणेति जातवत् ।२०। तदेतस्याह्नो रूपम्[12] ।२१। ताः संशस्ता[13] दश जगत्यः संपद्यन्ते ।२२। जगत्प्रातःसवनो ह्येष त्र्यहः ।२३। विंशतिर्गायत्रीः[14] ।२४। गायत्री प्रातःसवनं वहति ।२५। तदु ह प्रातःसवनरूपान्नापैति ।२६। इति नु व्यूळ्हे ।२७। उद्धृत्यैतदग्निं नरो दीधितिभिररण्योरिति समूळ्हे वैराजमाज्यम् ।२८। वैराजं पृष्ठं तत् सलोम ।२९। वासिष्ठमाज्यम् ।३०। वासिष्ठं पृष्ठं तत् सलोम ।३१। हस्तच्युती जनयन्त प्रशस्तमिति जातवत् ।३२। तदेतस्याह्नो रूपम् ।३३। आनुष्टुभः प्रउगः ।३४। आनुष्टुभं वै चतुर्थमहः ।३५। तदेनत् स्वेन छन्दसा समर्धयति ।३६ ॥1॥

[1] P. ०दिच्छध्वं [2] L. P. युक्तवत्; L. (var.) as here [3–3] L. एतदायतनं [4] L. P. omit [5] IO. omits [6] L. P. अवाप्यते [7] L. P. तद्वाचो [8] L. P. स्वराड्वद् [9] L. P. विराड्० [10] L. विमदन्; P. विमदस् [11] L. P. omit चतुर्थेऽहन् [12] L. P. Here ends *Khaṇḍa* 6 of Chapter XXII [13] L. P. omit; L. (var.) as here [14] P. ०र्गायत्री

तं त्वा यज्ञेभिरीमह इति यज्ञवत्या मरुत्वतीयं प्रतिपद्यते ।१। पुनरारम्भ्यो वै चतुर्थेऽहन् यज्ञः ।२। यज्ञमेव तदारभते ।३। श्रुधी हवमिन्द्र मा रिषण्य इति मरुत्वतीयम् ।४। ता वा एतास्त्रिष्टुभो विराड्वर्णाः ।५। ता अत्र क्रियन्ते ।६। एता ह्यह्नो रूपेण संपन्नाः ।७। इन्द्र मरुत्व इह पाहि सोममिति विज्ञातत्रैष्टुभं सवनधरणम्[1] ।८। त्रैष्टुभो वा इन्द्रः ।९। मध्यंदिनायतनो वा इन्द्रः ।१०। [2-]तानि वा[-2] एतानि विज्ञातत्रैष्टुभानि सवनधरणान्यपि व्यूळ्हच्छन्दसो मध्यंदिनान्न च्यवन्ते ।११। त्रैष्टुभ इन्द्रः ।१२। नेदिन्द्रं स्वादायतनाच्च्यवयामेति[3] ।१३। जातं यत् त्वा परि देवा अभूषन्निति जातवत् ।१४। [4-]जातवद् वै चतुर्थस्याह्नो[-4] रूपम् ।१५। इमं नु मायिनं हुव इति मरुत्वतीयं गायत्रम् ।१६। गायत्रमध्यंदिनो



ह्येष त्र्यहः[5] ।१७। अथात इह न्यूङ्खयेदिह३ इति ।१८। [6-]स्तोत्रियानुरूपयोश्चैवोक्थमुखीययोश्च न्यूङ्खः[-6] ।१९। अथ नाद्रियेत ।२०। आत्मा वै स्तोत्रियः प्रजानुरूपः[7] ।२१। अन्नं न्यूङ्खः ।२२। अन्नमेव तदात्मनि[8] च[9] प्रजायां च दधाति ।२३। आनुष्टुभं न्यूङ्खं न्यूङ्खयेदिति हैक आहुः ।२४। आनुष्टुभं वै चतुर्थमहः ।२५। तदेनत् स्वेन छन्दसा समर्धयति ।२६। वैराजं न्यूङ्खं न्यूङ्खयेदिति सा स्थितिः ।२७। अन्नं विराळन्नं न्यूङ्खः ।२८। अन्नमेव तद् [10-]यज्ञे च यजमानेषु च[-10] दधाति ।२९। मध्यमे पदे न्यूङ्खयेत् ।३०। आत्मा वै पूर्वं पदं प्रजोत्तमम् ।३१। मध्यं मध्यमं पदम् ।३२। मध्ये वा इदमात्मनोऽन्नं धीयते ।३३। तद् यथाभिग्रासमन्नमद्यादेवं[11] तत् ।३४। इन्द्रमिद् देवतातय इत्यष्टेन्द्रः[12] प्रगाथः ।३५। एतेन वै देवाः सर्वा अष्टीराश्नुवत ।३६। तथो एवैतद् यजमाना एतेनैव सर्वा अष्टीरश्नुवते ।३७। कुह श्रुत इति[13] कुहश्रुतीयाः ।३८। ता वै[14] विराजोऽनुष्टुभो वा भवन्ति ।३९। ता अत्र क्रियन्ते ।४०। एता ह्यह्नो रूपेण संपन्नाः ।४१। युध्मस्य ते वृषभस्य स्वराज इति विज्ञातत्रैष्टुभं सवनधरणं तस्योक्तं ब्राह्मणम् ।४२। स्वराज इति स्वराड्वत् ।४३। स्वराड्वदिति वा अस्य रूपम् ।४४। त्यमु वः सत्रासाहमिति निष्केवल्यम् ।४५। [15-]आ च्यावयस्यूतय इत्यूतिमत् ।४६। ऊतिमदिति वा अस्य रूपम्[-15] ।४७। गायत्रं गायत्रमध्यंदिनो ह्येष त्र्यहः[16] ।४८ ॥2॥

[1] L. P. add तानि वा एतानि विज्ञातत्रैष्टुभानि सवनधरणानि मध्यंदिनान्न च्यवन्ते [2–2] L. P. तद्यद् [3] L. P. ०वयानीति [4–4] L. P. तदेतस्याह्नो [5] L. P. Here ends *Khaṇḍa* 7 of Chapter XXII [6–6] L. P. स्तोत्रियानुरूपयोश्चैवं न्यूङ्खा उक्थमुखीययोश्च [7] L. P. add अन्नं विराड् [8] L. P. तद् [9] L. P. omit [10–10] L. P. आत्मनि प्रजायां च [11] L. (var.) (all MSS. excepting IO.), P. यथाभिग्रासि० [12] L. P. add साम्नः [13] L. P. इन्द्रः कस्मिन्नद्येति [14] L. P. वा एता [15–15] L. P. विश्वासु गीर्ष्वायतमित्यावदावद्वै चतुर्थस्याह्नः प्रायणीयरूपं पुनः प्रायणीयं हि चतुर्थमहः [16] L. P. Here ends *Khaṇḍa* 8 of Chapter XXII

हिरण्यपाणिमूतय इत्यूतिमाननुचरस्तस्योक्तं ब्राह्मणम्[1] ।१। ऊतय इत्यूतिमत् ।२। ऊतिमदिति वा अस्य रूपम् ।३। आ देवो यातु सविता सुरत्नः प्र द्यावा यज्ञैः पृथिवी नमोभिः[2] प्र ऋभुभ्यो दूतमिव वाचमिष्ये प्र शुक्रैतु देवी मनीषेति ।४। एति वा वै प्रेति वा प्रायणीयरूपम् ।५। तस्मादावन्ति च प्रवन्ति च चतुर्थेऽहन्त्सूक्तानि शस्यन्ते प्रायणीयरूपेण ।६। पुनःप्रायणीयं हि चतुर्थमहः ।७। द्विपदाः शस्यन्ते ।८। द्विपाद्[3] वा अभिक्रमितुमर्हति ।९। अभिक्रान्त्यै तद् रूपम् ।१०। तद् यथोपप्रयाय स्वर्गस्य लोकस्य नेदीयस्तायां वसेदेवं तत् ।११। प्र सम्राजो असुरस्य प्रशस्तिमिति वैश्वानरीयम् ।१२। सम्राज इति सम्राड्वत् ।१३।

सम्राड्वदिति वा अस्य रूपम् ।१४। क ईं व्यक्ता नरः सनीळा इति मारुतम् ।१५। तस्य तद् ब्राह्मणं यत् प्रशुक्रीयस्य[4] ।१६। प्र यन्तु वाजास्तविषीभिरग्नय इति तिस्रोऽधिकाः समूळ्हे[5] ।१७। आ त्वेषमुग्रमव ईमहे वयमिति ।१८। [6–]एति वा वै प्रेति वा[–6] प्रायणीयरूपम् ।१९। [7–]तस्मादावन्ति च प्रवन्ति च चतुर्थेऽहन्त्सूक्तानि शस्यन्ते प्रायणीयरूपेण[–7] ।२०। पुनःप्रायणीयं हि चतुर्थमहः ।२१। हुवे वः सुद्योत्मानं सुवृक्तिमिति जातवेदसीयम् ।२२। तस्य तद् ब्राह्मणं यन्मरुत्वतीयस्य ।२३। वसुं न चित्रमहसं गृणीष इति समूळ्हे[8] ।२४। घृतनिर्णिग् ब्रह्मणे गातुमेरयेति ।२५। [9–]एति वा वै प्रेति वा प्रायणीयरूपम् ।२६। तस्मादावन्ति च प्रवन्ति च चतुर्थेऽहन्त्सूक्तानि शस्यन्ते प्रायणीयरूपेण[–9] ।२७। पुनःप्रायणीयं हि चतुर्थमहः ।२८। अथोक्थ्यान्युपेत्य सृत्वा षोळशिनमुपयन्ति ।२९। षोळशकलं वा इदं सर्वम् ।३०। अस्यैव सर्वस्याप्त्यै ।३१। अन्नं चतुर्थेनाह्नाप्नुवन्ति ।३२। अनुष्टुभं छन्द एकविंशं स्तोमं वैराजं साम ।३३। उदीचीं दिशं शरदमृतूनाम् ।३४। साध्याँश्चाप्त्याँश्च[10] देवान् देवजाते ।३५। बृहस्पतिं च चन्द्रमसं चाधिपती[11] ।३६ ॥3॥

[1] L. P. omit तस्योक्तं ब्राह्मणम्   [2] ER. ऋतावृधा   [3] L. (var.) द्विपादा (wrongly ascribes this reading to IO.)   [4] L. P. Here read the passages २२ and २३   [5] L. (var.) समूढा   [6–6] L. P. आवदावद्वै चतुर्थस्याह्नः   [7–7] L. P. omit   [8] L. P. जातवेदसीयं   [9–9] L. P. आवदावद्वै चतुर्थस्याह्नः प्रायणीयरूपम्   [10] L. P. ०श्चाप्यांश्च   [11] L. P. Passage ३६ is repeated; here ends *Khaṇḍa* 9 and Chapter XXII

पशवः पञ्चममहः पङ्क्तिर्वै ।१। तद्वस्य निदानम् ।२। पशवः पङ्क्तिरिति ।३। तस्यैतानि छन्दोरूपाणि ।४। वृषभवद् धेनुमद् दुग्धवद् घृतवन्मद्वद् रयिमद् वाजवदध्यासवदिति ।५। इममू षु वो अतिथिमुषर्बुधमित्याज्यम् ।६। रायः सूनो सहसो मर्त्येष्वेति राय इति रयिमत् ।७। रयिमदिति वा अस्य रूपम् ।८। अध्यासवत् तत् पङ्क्ते रूपम् ।९। जागतं जगत्प्रातःसवनो ह्येष त्र्यहः ।१०। [1–]इति नु व्यूळ्हे[–1] ।११। उद्धृत्यैतदग्निं तं मन्ये यो वसुरिति समूळ्हे पाङ्क्तम् ।१२। पङ्क्तिर्वै पञ्चममहः ।१३। यदेतदहस्तदेताः ।१४। अस्तं यं यन्ति धेनव इति ।१५। धेनुमदिति वा अस्य रूपम् ।१६। बार्हतः प्रउगः ।१७। पशवः पञ्चममहः ।१८। बार्हताः पशवः पशूनामेवाप्त्यै ।१९। यत् पाञ्चजन्यया विशेति मरुत्वतीयस्य प्रतिपत् ।२०। पाञ्चजन्ययेति तत् पञ्चमस्याह्नो रूपम् ।२१। इत्था हि सोम इन्मद इति मद्वत् पाङ्क्तं तस्योक्तं ब्राह्मणम् ।२२। अवितासि सुन्वतो वृक्तबर्हिष इति षट्पदाः ।२३। षड् वा ऋतवः संवत्सरः ।२४। संवत्सरस्यैवाप्त्यै ।२५। तासां गायत्रीशंसं शस्त्रमिति ह स्माह कौषीतकिः ।२६। तद् वा अत्र समृद्धं[2] यद् गायत्रीशंसम् ।२७। तद् यदष्टाभिरष्टाभिरक्षरैः प्रणौति ।२८। तद् गायत्र्यै[3] रूपम् ।२९। मरुत्वाँ इन्द्र वृषभो रणायेति विज्ञातत्रैष्टुभं सवनधरणं तस्योक्तं ब्राह्मणम् ।३०। वृषभो रणायेति वृषभवत् ।३१। तदेतस्याह्नो रूपम् ।३२। अयं ह येन वा इदमिति मरुत्वतीयं गायत्रम् ।३३। गायत्रमध्यंदिनो ह्येष त्र्यहः[4] ।३४ ॥4॥



[1–1] ER. omits   [2] L. P. संपन्नं; L. wrongly reports IO. reading as अतिसमृद्धं   [3] L. P. गायत्री   [4] L. P. Here ends *Khaṇḍa* 1

महानाम्न्यः पृष्ठं भवन्ति ।१। महानाम्नीभिर्वा इन्द्रो वृत्रमहन् ।२। तं वृत्रं हत्वा यन्तं देवताः प्रत्युपातिष्ठन्त ।३। पराच्यो[1] हास्मादग्रेऽपक्रान्ता बिभ्यत्यस्तस्थुः ।४। तं प्रजापतिः पप्रच्छाशको हन्तू३मिति ।५। एवा ह्येवेति प्रत्युवाचानिरुक्तम् ।६। अनिरुक्त उ वै प्रजापतिः ।७। तत् प्राजापत्यं रूपम् ।८। तमग्निः पप्रच्छाशको हन्तू३मिति ।९। एवा ह्यग्न इति प्रत्युवाच ।१०। तं स्वो महिमा पप्रच्छाशको हन्तू३मिति ।११। स हास्मादग्रेऽपक्रान्तो बिभ्यत् तस्थौ ।१२। एवा हीन्द्रेति प्रत्युवाच ।१३। तं पूषा पप्रच्छाशको हन्तू३मिति ।१४। एवा हि पूषन्निति प्रत्युवाच ।१५। तं देवाः[2] पप्रच्छुरशको हन्तू३मिति ।१६। एवा हि देवा इति प्रत्युवाच ।१७। तानि वा एतानि पञ्चपदानि पुरीषमिति शस्यन्ते ।१८। सो ऋच एव वेला[3] ।१९। ता वा एताः शक्वर्यः ।२०। एताभिर्वा इन्द्रो वृत्रमशकद्धन्तुम् ।२१। तद् यदाभिर्वृत्रमशकद्धन्तुम् ।२२। तस्माच्छक्वर्यः शक्तयो हि ।२३। प्रत्यस्मै पिपीषते यो रयिवो रयिंतमस्त्यमु वो अप्रहणमिति त्रयस्तृचाः ।२४। अस्माअस्मा इदन्धस इति बृहतीं दशमीं करोति ।२५। एवा ह्यसि वीरयुरिति त्वेव स्थिता पुरीषस्य समानाभिव्याहारा ।२६। तथा स स्तोत्रियेण समो वातिशयो वा संपद्यते ।२७। यदिन्द्र नाहुषीष्वेति साम्नः प्रगाथः ।२८। यद् वा पञ्च क्षितीनामिति पञ्चेति तत् पञ्चमस्याह्नो रूपम् ।२९। इन्द्रो मदाय वावृध इति मद्वत् पाङ्क्तं तस्योक्तं ब्राह्मणम् ।३०। प्रेदं ब्रह्म वृत्रतूर्येष्वाविथेति षट्पदाः ।३१। तासामुक्तं ब्राह्मणम् ।३२। अभूरेको रयिपते रयीणामिति विज्ञातत्रैष्टुभं सवनधरणं तस्योक्तं ब्राह्मणम् ।३३। रयिपते रयीणामिति रयिमत् ।३४। रयिमदिति वा अस्य रूपम् ।३५। अध्यासवत् तत् पङ्क्ते रूपम् ।३६। तमिन्द्रं वाजयामसीति निष्केवल्यम् ।३७। स वृषा वृषभो भुवदिति वृषभवत् ।३८। तदेतस्याह्नो रूपम् ।३९। गायत्रं गायत्रमध्यंदिनो ह्येष त्र्यहः[4] ।४० ॥5॥

[1] L. P. पराञ्च्यो   [2] L. P. विश्वे देवाः   [3] BM¹. वेलाः   [4] L. P. Here ends *Khaṇḍa* 2

तत् सवितुर्वरेण्यमिति वैश्वामित्रोऽनुचरस्तस्योक्तं ब्राह्मणम्[1] ।१। वाजयन्तः पुरंध्येति वाजवत् ।२। तदेतस्याह्नो रूपम् ।३। उदु ष्य देवः सविता दमूना इति सावित्रम् ।४। वाममद्य सवितर्वाममु श्व इति वाममिति पशुमत् ।५। पशुमदिति वा अस्य रूपम् ।६। मही द्यावापृथिवी इह ज्येष्ठे इति द्यावापृथिवीयम् ।७। रुवद्धोक्षा पप्रथानेभिरेवैरित्युक्षेति पशुमत् ।८। पशुमदिति वा अस्य रूपम् ।९। ऋभुर्विभ्वा वाज इन्द्रो नो अच्छेत्यार्भवम् ।१०। ये गोमन्तं वाजवन्तं सुवीरमिति गोमन्तमिति पशुमत् ।११। पशुमदिति वा अस्य रूपम् ।१२। को नु वां मित्रावरुणावृतायन्निति वैश्वदेवम् ।१३। यज्ञायते वा पशुषो न वाजानिति पशुष इति पशुमत् ।१४। पशुमदिति वा अस्य रूपम् ।१५। अध्यासवत् तत् पाङ्क्तं रूपम् ।१६। हविष्पान्तमजरं स्वर्विदीति वैश्वानरीयम् ।१७। पान्तमिति तत् पञ्चमस्याह्नो रूपम् ।१८। वपुर्नु तच्चिकितुषे चिदस्त्विति मारुतम् ।१९। समानं नाम धेनु पत्यमानमिति धेन्विति पशुमत् ।२०। पशुमदिति वा अस्य रूपम् ।२१। अग्निर्होता गृहपतिः स राजेति जातवेदसीयम् ।२२। अवा नो मघवन् वाजसाताविति वाजवत् ।२३। तदेतस्याह्नो रूपम् ।२४। अध्यासवत् तत् पाङ्क्तं रूपम् ।२५। इति नु व्यूळ्हे ।२६। अथ समूळ्हे ।२७। मूर्धानं दिवो अरतिं पृथिव्या इति वैश्वानरीयम् ।२८। नाभिं यज्ञानां सदनं रयीणामिति रयिमत् ।२९। रयिमदिति वा अस्य रूपम् ।३०। आ रुद्रास इन्द्रवन्तः सजोषस इति मारुतम् ।३१। गोमदश्वावद् रथवत् सुवीरमिति गोमदिति[2] पशुमत् ।३२। पशुमदिति वा अस्य रूपम् ।३३। इममू षु वो अतिथिमुषर्बुधमिति जातवेदसीयं तस्योक्तं ब्राह्मणम् ।३४। [3–]अध्यासवत् तत् पाङ्क्तं रूपम्[–3] ।३५। पशून् पञ्चमेनाह्नाप्नुवन्ति ।३६। पाङ्क्तं छन्दस्त्रिणवं स्तोमं शाक्करं साम ।३७। ऊर्ध्वां[4] दिशं हेमन्तमृतूनाम् ।३८। मरुतो देवान् देवजातं रुद्रमधिपतिम्[5] ।३९ ॥6॥

[1] L. P. पृष्ठ्यानामेव नानात्वाय (for तस्योक्तं ब्राह्मणं); L. (var.) as here [2] L. P. गोमदश्वावदिति [3–3] L. P. omit [4] L. P. अर्वाचीं; L. (var.) as here [5] ER. इन्द्रम॰; L. P. Here ends *Khaṇḍa* 3

पशवः पञ्चममहरथ पुरुष एव षष्ठमहः ।१। स वै पुरुषः प्रजापतिः पूर्वोऽस्य सर्वस्य ।२। अतिच्छन्दा[1] वै प्रजापतिः ।३। तत् प्राजापत्यं रूपम् ।४। असुरीन्द्रं प्रत्यक्रमत[2] पर्वन् पर्वन् मुष्कान् कृत्वा ।५। तामिन्द्रः प्रतिजिगीषन् पर्वन् पर्वञ्छेपांस्यकुरुत ।६। इन्द्रो[3] वै परुच्छेपः ।७। सर्वं वा इन्द्रेण जिगीषितम् ।८। तां समभवत् ।९। तमगृह्णादसुरमायया[4] ।१०। स एताः पुनःपदा अपश्यत् ।११। ताभिरङ्गादङ्गात् पर्वणः पर्वणः सर्वस्मात् पाप्मनः प्रामुच्यत[5] ।१२। तद् यत् षष्ठेऽहन्[6] परुच्छेपः शस्यते मध्यतश्च होत्रासु च ।१३।



अङ्गादङ्गादेव तद् यजमानाः पर्वणः पर्वणः सर्वस्मात् पाप्मनः संप्रमुच्यन्ते ।१४। नित्याः पूर्वा याज्याः कृत्वा पारुच्छेपीभिर्यजन्ति ।१५। तद् यदाभिस्तदहर्न वषट्कुर्वन्ति ।१६। तेनोत्सृष्टाः[7] ।१७। यद्ध्वैना नान्तरयन्ति[8] ।१८। नेदच्युतं यज्ञस्य प्रियं देवानामन्तरयामेति ।१९ ॥7॥

[1] P. ॰च्छन्दो [2] L. (var.) P. प्रत्युत्क्रमत [3] L. P. इन्द्र उ [4] L. तमह्वणा॰; P. तमर्हणा॰ [5] L. P. संप्रामुच्यत [6] L. P. omit [7] L. (var.) P. तेनोत्सृष्टा [8] L. नान्तर्यन्ति; remarks that all MSS. and the commentary read नान्तरयन्ति

नित्यान् पूर्वानृतुयाजान् कृत्वा गार्त्समदीभिर्यजन्ति[1] ।१। तद् यदेभिस्तदहर्न वषट्कुर्वन्ति ।२। तेनोत्सृष्टाः[2] ।३। यद्ध्वैनान् नान्तरयन्ति[3] ।४। नेदच्युतं यज्ञस्य प्रियं देवानामन्तरयामेति ।५। तेन तेऽतिच्छन्दसो भवन्ति ।६। तथैषां सप्तपदाभिर्वषट्कृतं भवति ।७। तदु ह स्माह कौषीतकिः ।८। विराळष्टमानि ह वा एतं[4] छन्दांसि गोपायन्ति योऽसौ तपति ।९। तां ते संपदं मोहयन्ति येऽतिच्छन्दोभिर्यजन्ति[5] ।१०। तस्माद्ध्वैकाहिकीभिरेव[6] यजेयुः ।११। देवयानस्यैव पथोऽसंमुग्ध्या[7] इति ।१२। तद्धाप्यणोची मौनो जाबालगृहपतीन्त्सत्रमासीनानुपासाद्य[8] पप्रच्छ ।१३। अह्नो गात३ परुच्छेप३दिति[9] ।१४। त उ ह तूष्णीमासुः ।१५। तत उ होत्तरार्धात् सदसश्चित्रो गौश्रायणिरभिपरोवाच[10] ।१६। गौश्रो वा ।१७। नाहैवाह्नोऽगाम न परुच्छेपात्[11] ।१८। [12–]शस्त्रेणाह नः[–12] परुच्छेपोऽहरन्वायतिष्ट[13] ।१९। ऐकाहिकीभिरयाक्ष्म ।२०। तेनो अह्नो नागामेति ।२१। यथायथं यजेयुः ।२२। देवायतनं वै षष्ठमहः ।२३ ॥8॥

[1] L. P. गार्त्समदैर्य॰ [2] L. (var.) P. तेनोत्सृष्टा [3] L. नान्तर्यन्ति [4] P. एतस्य [5] L. P. Here ends *Khaṇḍa* 4 [6] L. P. तद्ध खल्वैका॰; L. (var.) as here [7] P. पथो समुग्धा; BM². पथोस्य मुग्ध्या [8] L. P. ॰नुपास्यद्य [9] L. P. परुच्छेपा३ इति; L. (var.) as here [10] L. P. ॰रोवाद [11] L. P. परुच्छेपाः; L. (var.) as here [12–12] L. (var.) शस्त्रेणाहन, शस्त्रेणाहन् (P.) [13] L. (var.) ॰पोह्नायतीषु, ॰पोहर्नायतीषु

तद् यत् तदहर्होतैव वषट्कुर्यात् ।१। होतैनयोर्देवायतनं संपृञ्चीताध्वर्योश्च[1] गृहपतेश्च ।२। आजिं ह वा एते यन्ति स्वर्गे लोके षष्ठेनाह्ना ।३। स योऽनवानं समापयति स स्वर्गंल्लोकमुज्जयति ।४। यद्यप्यवान्यात् ।५। पुनः पुनः प्रतिसारमुपशिक्षेतैव[2] ।६। अयं जायत मनुषो धरीमणीत्याज्यम् ।७। अयमित्यनिरुक्तम् ।८। अनिरुक्त उ वै प्रजापतिः ।९। तत् प्राजापत्यं रूपम् ।१०। अतिच्छन्दसः सप्तपदाः पुनःपदाः ।११। यदेतदहस्तवेताः ।१२।

न पदं च पुनःपदं चान्तरेणावान्यात् ।१३। आत्मा वै पदं प्राणः[3] पुनःपदम् ।१४। [4]यस्तं तत्र[4] ब्रूयात् ।१५। प्राणादात्मानमन्तरगान्न जीविष्यतीति[5] तथा ह स्यात् ।१६। तस्मान्न पदं च पुनःपदं चान्तरेणावान्यात् ।१७। आतिच्छन्दसः प्रउगः ।१८। आतिच्छन्दसं वै षष्ठमहः ।१९। तदेनत् स्वेन छन्दसा समर्धयति ।२०। स पूर्व्यो महानामिति मरुत्वतीयस्य प्रतिपत् ।२१। स इत्यनिरुक्तम् ।२२। अनिरुक्त उ वै प्रजापतिः ।२३। तत् प्राजापत्यं रूपम् ।२४ ॥9॥

[1] L. P. omit च  [2] L. P. प्रतीसा°; here ends *Khaṇḍa* 5  [3] L. P. प्राणा:
[4–4] L. P. स योऽत्रावानन्तं  [5] P. omits इति

यं त्वं रथमिन्द्र मेधसातय इति पारुच्छेपम्[1] ।१। यः शूरैः स्वः सनितेति शूरैरिति स एवास्मिन् मरुध्यङ्गः ।२। स यो वृषा वृष्ण्येभिः समोका इति विज्ञातत्रैष्टुभं सवनधरणं तस्योक्तं ब्राह्मणम् ।३। वृषा वृष्ण्येभिरिति निनर्तिः[2] ।४। अन्तः षष्ठमहः ।५। नीव वा अन्तं गत्वा नृत्यति ।६। कद्रचङ् हि तत इयात् ।७। मरुत्वाँ इन्द्र मीढ्व इति मरुत्वतीयं गायत्रम् ।८। गायत्रमध्यंदिनो ह्येष त्र्यहः[3] ।९। रेवतीर्नः सधमादे रेवाँ इद् रेवतः स्तोतेति रैवतस्य योनौ वारवन्तीयमूळ्हं भवत्याग्नेयं सामैन्द्रीषु ।१०। तन्मिथुनं प्रजात्यै रूपम् ।११। मा चिदन्यद् वि शंसतेति साम्नः प्रगाथः ।१२। सखायो मा रिषण्यतेति ।१३। सखाय इति सर्वरूपम् ।१४। सर्वरूपं वै षष्ठमहः ।१५। तस्मात् सखाय इति सर्वानिवाभिवदति[4] ।१६। एन्द्र याह्युप नः परावत इति पारुच्छेपम्[1] ।१७। परावत इति ।१८। अन्तो वै परावतः ।१९। अन्तः षष्ठमहः ।२०। अन्तेऽन्तं दधाति ।२१। प्र घा न्वस्य महतो महानीति विज्ञातत्रैष्टुभं सवनधरणं तस्योक्तं ब्राह्मणम् ।२२। महतो महानीति निनर्तिः[2] ।२३। अन्तः षष्ठमहः ।२४। नीव वा अन्तं गत्वा नृत्यति ।२५। कद्रचङ् हि तत इयात् ।२६। उप नो हरिभिः सुतमिति निष्केवल्यम् ।२७। याहि मदानां पत उप नो हरिभिरिति निनर्तिः[2] ।२८। अन्तः षष्ठमहः ।२९। नीव वा अन्तं गत्वा नृत्यति ।३०। कद्रचङ् हि तत इयात् ।३१। गायत्रं गायत्रमध्यंदिनो ह्येष त्र्यहः[5] ।३२ ॥10॥

[1] L. P. add तस्योक्तं ब्राह्मणम्  [2] L. P. निनृत्तिः  [3] L. P. Here ends *Khaṇḍa* 6
[4] L. P. °वानुवदति  [5] L. P. Here ends *Khaṇḍa* 7

अभि त्यं देवं सवितारमोण्योः कविक्रतुमित्यतिच्छन्दसा वैश्वदेवं प्रतिपद्यते ।१। आतिच्छन्दसं[1] वै षष्ठमहः ।२। तत् तृतीयसवनमतिच्छन्दा अभ्यश्नुते ।३। अथो प्राजापत्यं वै



षष्ठमहः ।४। अतिच्छन्दा वै प्रजापतिः ।५। तत् प्राजापत्यं रूपम् ।६। अभिवाननुचरस्तस्योक्तं ब्राह्मणम् ।७। उदु ष्य देवः सविता सवायेति सावित्रम् ।८। सविता सवायेति निनर्तिः[2] ।९। अन्तः षष्ठमहः ।१०। नीव वा अन्तं गत्वा नृत्यति ।११। कद्रचङ् हि तत इयात् ।१२। कतरा पूर्वा कतरापरायोरिति द्यावापृथिवीयम् ।१३। पूर्वापरेति निनर्तिः[2] ।१४। अन्तः षष्ठमहः ।१५। नीव वा अन्तं गत्वा नृत्यति ।१६। कद्रचङ् हि तत इयात् ।१७। किमु श्रेष्ठः किं यविष्ठो न आजगन्नित्यार्भवम् ।१८। श्रेष्ठो यविष्ठ इति निनर्तिः[2] ।१९। अन्तः षष्ठमहः ।२०। नीव वा अन्तं गत्वा नृत्यति ।२१। कद्रचङ् हि तत इयात् ।२२। इदमित्था रौद्रं गूर्तवचा[3] इति वैश्वदेवम् ।२३। क्राणा यदस्य पितरा मंहनेष्ठा इति स्थितवत् ।२४। तदन्तरूपम् ।२५। अन्तः षष्ठमहः ।२६। तिष्ठतीव वा अन्तं गत्वा ।२७। कद्रचङ् हि तत इयात् ।२८। तस्य द्वे[4] परिशिष्य ये यज्ञेन दक्षिणया समक्ता इत्येतं नाराशंसमावपति[5] ।२९। आत्मा वै सूक्तं प्रजा पशवो नाराशंसम् ।३०। मध्य एव तदात्मन् प्रजां पशूनुभये दधाति ।३१। अहश्च कृष्णमहरर्जुनं चेति वैश्वानरीयम् ।३२। अहरर्जुनं चेति निनर्तिः[2] ।३३। अन्तः षष्ठमहः ।३४। नीव वा अन्तं गत्वा नृत्यति ।३५। कद्रचङ् हि तत इयात् ।३६। प्रयज्यवो मरुतो भ्राजदृष्टय इति मारुतम् ।३७। तस्य तदेवान्तरूपं यत् सोदर्कम् ।३८। इमं स्तोममर्हते जातवेदस इति जातवेदसीयम् ।३९। तस्य तदेवान्तरूपं यत् सोदर्कम् ।४०। मा रिषाम मा रिषामेति ।४१। तदन्ततोऽरिष्ट्यै रूपम् ।४२। अपः षष्ठेनाह्नाप्लुवन्ति ।४३। अतिच्छन्दसं छन्दस्त्रयस्त्रिंशं स्तोमं रैवतं साम ।४४। अर्वाचीं[6] दिशं शिशिरमृतूनाम् ।४५। विश्वान् देवान् देवजातम् ।४६। प्रजापतिमधिपतिं प्रजापतिमधिपतिम्[7] ।४७ ॥11॥

[1] L. अति°  [2] L. P. निनृत्तिः  [3] L. (var.) गूर्तवर्चा  [4] L. P. add उत्तमे
[5] L. P. समावपति (for आवपति)  [6] L. P. ऊर्ध्वां  [7] L. P. Here ends *Khaṇḍa* 8

## इति तृतीयदशके तृतीयोऽध्यायः

अभिजित् ।१। अभिजिता वै देवा अभ्यजयन्निमाँस्त्रीँल्लोकान् ।२। तस्मात् स त्र्यावृच्चतुरुदयो[1] भवति ।३। विश्वजिताजयन्निमाश्चतस्रो दिशः ।४। तस्मात् स चतुरावृत्त्युदयो[2] भवति ।५। अभिजिदभिजिता वै देवा अभ्यजयन् ।६। तदु हान्विवैव[3] षषञ्ज[4] ।७। यदजितं पर्यशिष्यत तद् विश्वजिताजयन् ।८। विश्वमजैष्मेति वा उ[5] विश्वजित् ।९। तौ वा एताविन्द्राग्नी एव यदभिजिद्विश्वजितौ ।१०। अग्निरेवाभिजित् ।११। अग्निर्हीदं सर्वमभ्यजयत् ।१२। इन्द्रो विश्वजित् ।१३। इन्द्रो हीदं सर्वं[6] विश्वमजयत् ।१४। स वा अभिजिदुभयसामा सर्वस्तोमो भवति ।१५। [7-]रथन्तरमेवास्य प्रत्यक्षं पृष्ठं भवति ।१६। आर्भवे पवमाने बृहत्[-7] ।१७। तस्मादुभयानि सूक्तानि शस्यन्ते बार्हतराथन्तराणि ।१८। तस्य प्र वो देवायाग्नये यद् वाहिष्ठं तदग्नय इत्येते उभे तदाज्यम् ।१९। प्र व इति तद् राथन्तरं रूपम् ।२०। बृहदर्चं विभावसो इति बृहद् बार्हतम् ।२१। उभौ माधुच्छन्दसगार्त्समदौ प्रउगौ संप्रवयेत् ।२२ ॥1॥

[1] BM². चतुरावृत्त्युदयो [2] BM². त्र्यावृच्चतुरुदयो [3] L. (var.) ह न्विहैव, ह न्विवैव, हन्दिवैव; P. ह न्विहैव [4] L. P. ससञ्ज [5] L. P. व; L. (var.) omits, also as here [6] ER. EM. omit [7–7] L. P. omit

वायव्यां पुरोरुचं शस्त्वाथोभे[1] वायव्ये तृचे ।१। ऐन्द्रवायवीं पुरोरुचं शस्त्वाथोभे[2] ऐन्द्रवायवे तृचे ।२। अथ पुरोरुचमथोभे तृचे ।३। अथ पुरोरुचमथोभे तृचे ।४। एवमेव संप्रवयेत्[3] ।५। माधुच्छन्दसान्येव पूर्वाणि तृचानि करोति गार्त्समदान्युत्तराणि ।६। तदु वा आहुः किं तदुभौ संप्रवयेत्[3] ।७। माधुच्छन्दस एव प्रउगे सति गार्त्समदं वैश्वदेवमुपरिष्टान्माधुच्छन्दसस्य वैश्वदेवस्य पर्याहरेत् ।८। तद् वा अत्रैकं[4] निरुक्तबार्हतम्[5] ।९। विश्वे देवास आ गत शृणुता म इमं हवम् ।१०। एदं बर्हिर्नि षीदतेति ।११। बर्हिरिति तद् बार्हतं रूपम् ।१२। अथ माधुच्छन्दसं सारस्वतं शस्त्वा[6] तस्यैवोत्तमया परिदध्यादिति ।१३। ऐकाहिकं प्रातःसवनं स्यादिति सा स्थितिः ।१४। एकाहो वा अभिजित् ।१५। प्रतिष्ठा वा एकाहः प्रतिष्ठित्या एव[7] ।१६ ॥2॥

[1] L. P. शस्त्वाथो उभे [2] As [1] L. (var.) as here [3] L. P. add नाद्रियेत [4] L. (var.) अत्रैतं [5] P. निरुक्तं बा°; L. P. Here ends *Khaṇḍa* 1 [6] L. P. omit [7] L. P. add आ त्वा रथं यथोतय इति मरुत्वतीयस्य प्रतिपदिदं वसो सुतमन्ध इत्यनुचर एष एव नित्य एकाहातानस्तस्योक्तं ब्राह्मणम्



जनिष्ठा उग्रः सहसे तुरायेति गौरिवीतं[1] पूर्वं शस्त्वेन्द्र पिब तुभ्यं सुतो मदायेत्येतस्मिन् बार्हते पञ्चर्चे निविदं दधाति ।१। इन्द्रस्य नु वीर्याणि प्र वोचमिति हैरण्यस्तूपं[2] पूर्वं शस्त्वा या त ऊतिरवमा या परमेत्येतस्मिन् बार्हते नवर्चे निविदं दधाति ।२। एवं नु यदि रथन्तरं पृष्ठं भवति ।३। यद्यु बृहत् ।४। बार्हते पूर्वे शस्त्वा राथन्तरयोर्निविदौ[3] दध्यादिति ।५। एकसूक्ते निष्केवल्यमरुत्वतीये स्यातामिति सा स्थितिः ।६। पिबा सोममभि यमुग्र तर्दस्तमु ष्टुहि यो अभिभूत्योजा इत्युभे अभिवती ।७। तदभिजितो रूपम् ।८। अथ नित्यमेवैकाहिकं तृतीयसवनम्[4] ।९। एकाहो वा अभिजित् ।१०। प्रतिष्ठा वा एकाहः प्रतिष्ठित्या एव[5] ।११ ॥3॥

[1] L. P. गौरिवीतीयं [2] L. P. हैरण्यस्तूपीयं [3] L. P. ऐकाहिकयोर्नि° [4] L. P. add स्यादिति सा स्थितिः [5] L. P. Here ends *Khaṇḍa* 2

[1-]स्वर्भानुर्ह वा आसुर[-1] आदित्यं तमसाविध्यत् ।१। तस्यात्रयस्तमोऽपजिघांसन्त एतं सप्तदशस्तोमं त्र्यहं पुरस्ताद् विषुवत उपायन् ।२। तस्य पुरस्तात् तमोऽपजघ्नुः ।३। तत् पुरस्तादसीदत् ।४। त एतमेव त्र्यहमुपरिष्टाद् विषुवत उपायन् ।५। तस्योपरिष्टात्[2] तमोऽपजघ्नुः ।६। [3-]तत् परस्तादसीदत्[-3] ।७। तद् य एवंविद्वांस एतं[4] त्र्यहमुभयतो विषुवन्तमुपयन्ति ।८। उभाभ्यामेव ते लोकाभ्यां यजमानाः पाप्मानमपघ्नते ।९। तान् वै स्वरसामान इत्याचक्षते ।१०। एतैर्ह वा अत्रय आदित्यं तमसोऽस्पृण्वत[5] ।११। तद् यदस्पृण्वत[5] ।१२। तस्मात् स्वरसामानः ।१३। तदेतदृचाभ्युदितम्[6] ।१४। यं वै सूर्यं स्वर्भानुस्तमसाविध्यदासुरः ।१५। अत्रयस्तमन्वविन्दन् नह्यन्ये अशक्नुवन्निति ।१६। स्वरसामानो ह वा एतेनाभ्युक्ताः ।१७। कद्वन्ति मरुत्वतीयानि भवन्ति ।१८। कद्वन्तो निष्केवल्येषु प्रगाथाः ।१९। को वै प्रजापतिः ।२०। प्रजापतिः स्वरसामानः ।२१। आनुष्टुभानि निविद्धानानि भवन्ति ।२२। आपो वा अनुष्टुप् ।२३। आपः स्वरसामानः ।२४। अद्भिर्हीदं सर्वमनुस्तब्धम् ।२५। उभयतो ह्यमुमादित्यमापोऽवस्ताच्चोपरिष्टाच्च ।२६। तदेतदृचाभ्युदितम्[7] ।२७। या रोचने परस्तात् सूर्यस्य याश्चावस्तादुपतिष्ठन्त आप इति ।२८ ॥4॥

[1–1] L. P. स्वर्भानुर्हासुर [2] L. P. तस्य परस्तात् [3–3] L. P. omit [4] L. P. add सप्तदशं स्तोमं [5] L. P. °पस्पृण्वत [6] L. P. Here ends *Khaṇḍa* 3 [7] L. P. Here ends *Khaṇḍa* 4

आ यज्ञैर्देव मर्त्य इति प्रथमस्य स्वरसाम्न आज्यमावद् राथन्तरम् ।१। बृहद् वयो हि भानव इति द्वितीयस्य बृहद् बार्हतम् ।२। अग्न ओजिष्ठमा भरेति तृतीयस्यावद्

राथन्तरम्[1] ।३। माधुच्छन्दसः प्रथमस्य स्वरसाम्नः प्रउगः ।४। गार्त्समदो द्वितीयस्य ।५। औष्णिह आत्रेयस्तृतीयस्य ।६। तेषामुक्तं ब्राह्मणम् ।७। अन्वायत्ता मरुत्वतीयानां प्रतिपदनुचरा अन्वायत्ता ब्राह्मणस्पत्यास्त्र्यहरूपेण ।८। तेषामुक्तं ब्राह्मणम् ।९। क्व स्य वीरः को अपश्यदिन्द्रमिति प्रथमस्य स्वरसाम्नो मरुत्वतीयं क्वेति कद्वत् ।१०। कया शुभा सवयसः सनीळा इति द्वितीयस्य कयेति कद्वत् ।११। गायत् साम नभन्यं यथा वेरिति तृतीयस्य ता कर्माषतरास्मा इति कर्मेति कद्वत् ।१२। को वै प्रजापतिः ।१३। प्रजापतिः स्वरसामानः ।१४। यज्जायथा अपूर्व्येत्येतस्मिन्नु हैके बृहतीतृतीये स्तोत्रियेऽन्वहं स्वराण्यन्वायातयन्ति ।१५। ते यदि तथा कुर्युः ।१६। एतावेव स्तोत्रियानुरूपावेषा धाय्या ।१७। कन्नव्यो अतसीनामिति कद्वान् प्रगाथस्तस्योक्तं ब्राह्मणम्[2] ।१८। अथ रथन्तरस्य योनिस्तस्या उक्तं ब्राह्मणम्[3] ।१९। यमिन्द्र दधिषे त्वमिति द्वृचोऽनेकपातितायै[4] ।२०। नेदसौ बृहत्येकाकिनीव शस्तासदिति[5] ।२१। इन्द्र तुभ्यमिन्मघवन्नभूमेति विज्ञातत्रैष्टुभं सवनधरणं तस्योक्तं ब्राह्मणम् ।२२। यस्ते साधिष्ठोऽवस इत्यानुष्टुभं निष्केवल्यं [6–]तस्योक्तं ब्राह्मणम्[–6] ।२३। इन्द्र क्रतुष्टमा भरेत्यावद् राथन्तरम् ।२४ ॥5॥

[1] L. रथन्तरं [2] L. P. Here ends *Khaṇḍa* 5 [3] L. P. omit तस्या उक्तं ब्राह्मणम् [4] L. P. °चो नैक° [5] P. शस्त्वास° [6–6] L. P. omit

[1–]इत्यु वा उ प्रथमस्य[–1] ।१। कदू न्वस्याकृतमिति कद्वान् प्रगाथस्तस्योक्तं ब्राह्मणम्[2] ।२। अथ बृहतो योनिस्तस्या उक्तं ब्राह्मणम्[3] ।३। स्वरन्ति त्वा सुते नर इति द्वृचोऽनेकपातितायै[4] ।४। नेदसौ बृहत्येकाकिनीव शस्तासदिति[5] ।५। अध्वर्यो वीर प्र महे सुतानामिति विज्ञातत्रैष्टुभं सवनधरणं तस्योक्तं ब्राह्मणम् ।६। गायन्ति त्वा गायत्रिण इत्यानुष्टुभं निष्केवल्यं [1–]तस्योक्तं ब्राह्मणम्[–1] ।७। उद् वंशमिव येमिर इत्युद्वद् बार्हतम् ।८। [1–]इत्यु वा उ द्वितीयस्य[–1] ।९। इमा उ त्वा पुरूवसो इति प्रगाथः पावकवर्णाः कवर्णा इति कद्वाँस्तस्योक्तं ब्राह्मणम्[6] ।१०। अथ रथन्तरस्य योनिरथ [7–]बृहतस्तयोरुक्तं ब्राह्मणम्[–7] ।११। दाना मृगो न वारण इति द्वृचोऽनेकपातितायै[4] ।१२। नेदसौ बृहत्येकाकिनीव शस्तासदिति[5] ।१३। इदं त्यत् पात्रमिन्द्रपानमिति विज्ञातत्रैष्टुभं सवनधरणं तस्योक्तं ब्राह्मणम् ।१४। इन्द्रं विश्वा अवीवृधन्नित्यानुष्टुभं निष्केवल्यं [1–]तस्योक्तं ब्राह्मणम्[–1] ।१५। त्वामभि प्र णोनुम इत्यभिवत् ।१६। तद्[8] राथन्तरं रूपम् ।१७। [1–]इत्यु वा उ तृतीयस्य ।१८। एवं नु यदि स्वरपृष्ठा भवन्ति ।१९। यदि वा स्वरयोनिषु बृहद्रथन्तरे ऊळ्हे स्याताम् ।२०। एतदेव शस्त्रमविकृतम् ।२१। यद्यु बृहद्रथन्तरे पृष्ठे कुर्युः ।२२। प्रज्ञाता स्तोत्रियानुरूपा बार्हतराथन्तराः प्रज्ञाता धाय्या[–1] ।२३ ॥6॥



[1–1] L. P. omit [2] L. P. Here ends *Khaṇḍa* 6 [3] L. P. omit तस्या उक्तं ब्राह्मणम् [4] L. P. °चो नैक° [5] P. शस्त्वास° [6] L. P. Here ends *Khaṇḍa* 7 [7–7] L. P. बृहतो [8] P. omits

[1–]साम्नोः प्रगाथौ पूर्वौ शस्त्वा कद्वतः प्रगाथाञ्छंसन्ति ।१। उद्धरति द्वृचाँश्च सवनधरणानि च[–1] ।२। तदाहुर्नानुष्टुप्सु निविदं दध्यान्मोहयति क्लृप्तच्छन्दसो मध्यंदिनमिति[2] ।३। आनुष्टुभानि पूर्वाणि शस्त्वा कामस्योपाप्त्यै त्रैष्टुभेषु निविदं दधाति[3] ।४। अर्वाग् रथं विश्ववारं त उग्रेति प्रथमेऽहन्यावति[4] राथन्तरे ।५। अपादित उदु नश्चित्रतम इति द्वितीय उद्वति बार्हते ।६। सं च त्वे जग्मुर्गिर इन्द्र पूर्वीरिति तृतीये गतवत्यन्तरूपे ।७। [1–]तथा यथायथं [5–]निविद् धीयते[–5] ।८। सैनान्[6] यथायथं धीयमाना[7] सर्वेषु च लोकेषु सर्वेषु च कामेषु यथायथं [8]दधाति[–1] ।९। यदि स्वराणि पृष्ठानि भवन्ति ।१०। बृहद्रथन्तरे एव तर्हि सामगाः पवमानेषु कुर्वन्ति ।११। यदि[9] बृहद्रथन्तरे पृष्ठे स्याताम् ।१२। स्वराणि[10] तर्हि सामगाः पवमानेषु कुर्वन्ति ।१३। स्वराणि त्वेव पृष्ठानि स्युरिति ह स्माह कौषीतकिः ।१४। स्वरसामानो ह्येते ।१५। पृष्ठैर्वै देवाः स्वर्गं लोकमस्प्रक्षन्[11] ।१६। [12–]तद् यत्[–12] स्वराणि पृष्ठानि भवन्ति ।१७। स्वर्गस्यैव लोकस्य स्पृष्ट्या[13] इति[14] ।१८ ॥7॥

[1–1] L. P. omit [2] L. P. omit इति [3] L. P. add तथा यथायथं निविद्धीयते सैनान्यथायथं धीयमाना सर्वेषु च लोकेषु सर्वेषु च कामेषु यथायथं दधाति [4] L. P. °हन्ना° [5–5] EM. निविदो धीयन्ते (as corrections over निविद् धीयते) [6] EM. ता एनान् (as correction over सैनान्) [7] EM. धीयमानाः [8] EM. दधति [9] L. P. यद्यु [10] L. P. add त्वेव [11] L. P. °मस्पृक्षन् [12–12] L. omits [13] L. P. स्पृष्ट्यै [14] L. P. omit; here ends *Khaṇḍa* 8

पृष्ठ्यस्य षळहस्य समूळ्हस्य याः पूर्वस्य त्र्यहस्य वैश्वदेवानां प्रतिपदस्ताः प्रतिपदः ।१। यान्युत्तरस्य त्र्यहस्य तृतीयसवनानि तानि तृतीयसवनानि सानुचराणि ।२। तद् यानि तत्र वैश्वदेवानि[1] [2–]तान्युद्धृत्यान्यान्यन्यान्यनिरुक्तानि प्राजापत्यानि[–2] परोक्षवैश्वदेवान्यवधीयन्ते[3] ।३। प्र वः पान्तं रघुमन्यवोऽन्धस्तं प्रत्नथा पूर्वथा विश्वथेमथा कदित्था नॄँः पात्रं देवयतामिति ।४। प्रतिनाभानेदिष्ठः ।५। तद्[4] वै खलु प्रत्यक्षवैश्वदेवान्येवावधीयेरन्[5] ।६। अग्निरिन्द्रो वरुणो मित्रो अर्यमेति प्रथमेऽहनि[6] द्यां स्कभित्वीति कद्वत् ।७। देवान् हुवे बृहच्छ्रवसः स्वस्तय इति द्वितीये ज्योतिष्कृत इति कद्वत् ।८। उषासानक्ता बृहती सुपेशसेति तृतीये नक्तेति कद्वत् ।९। को वै प्रजापतिः ।१०। प्रजापतिः स्वरसामानः

।११। तेऽग्निष्टोमा वोक्थ्या वा संतिष्ठन्ते ।१२। अग्निष्टोमा इति पैङ्ग्यम् ।१३। ब्रह्मवर्चसिनो भवन्ति येऽग्निष्टोमानुपयन्ति ।१४। उक्थ्याः स्युरिति ह स्माह कौषीतकिः ।१५। स वै यज्ञक्रतुः समृद्धो य उक्थ्यः ।१६। पञ्चदश ह्यस्य स्तोत्राणि भवन्ति ।१७। पञ्चदश शस्त्राणि ।१८। तानि त्रिंशत् स्तुतशस्त्राणि ।१९। स विराजमभिसंपद्यते ।२०। श्रीर्विराळन्नाद्यम् ।२१। श्रियो विराजोऽन्नाद्यस्योपाप्त्यै श्रियो विराजोऽन्नाद्यस्योपाप्त्यै[7] ।२२ ॥8॥

[1] L. P. add भवन्ति [2-2] L. P. तान्युद्धृत्यान्यानि प्राजापत्यान्यनिरुक्तानि
[3] IO. °न्येवाधीयन्ते [4] ER. यद् [5] L. P. प्रत्यक्षं वै° [6] L. P. °मेऽह्न्
[7] L. P. Here ends *Khaṇḍa* 9

## इति तृतीयदशके चतुर्थोऽध्यायः



आपस्तपोऽतप्यन्त ।१। तास्तपस्तप्त्वा गर्भमदधत ।२। तत एष आदित्योऽजायत षष्ठे मासि ।३। तस्मात् सत्रिणः षष्ठे मासि दिवाकीर्त्यमुपयन्ति ।४। स षण्मासानुदङ्ङेति षळावृत्तः[1] ।५। तस्मात् सत्रिणः षळेवोर्ध्वान् मासो यन्ति षळावृत्तान् ।६। अन्तरेणो ह वा एतमशनाया च पुनर्मृत्युश्च ।७। अपाशनायां च पुनर्मृत्युं च जयन्ति ये वैषुवतमहरुपयन्ति ।८। तस्यैतानि छन्दोरूपाणि ।९। सूर्यवद् भानुमज्ज्योतिष्मद् रुक्मवद् रुचितवद्धर्यतवदिति ।१०। समुद्रादूर्मिर्मधुमाँ उदारदित्याज्यम् ।११। समुद्राद्धचेषोऽद्भ्य उदैति ।१२। इन्द्र एकं सूर्य एकं जजानेति सूर्यवत् ।१३। तदेतस्याह्नो रूपम् ।१४। ताः संशस्ता एकविंशतिमनुष्टुभः[2] संपद्यन्ते ।१५। एकविंशो वा एष य एष तपति ।१६। तदेनं स्वेन रूपेण समर्धयन्ति[3] ।१७। त्रैष्टुभः प्रउगः ।१८। विषुवान् वा एषोऽह्नाम् ।१९। विषुवाञ्छन्दसां त्रिष्टुप् ।२०। तदेनत्[4] स्वेन छन्दसा समर्धयति ।२१ ॥1॥

[1] L. P. षडावृत्तान् [2] L. P. °तिरनु° [3] L. P. BM¹. BM². समर्धयति [4] L. P. तदेन

कुविदङ्ग नमसा ये वृधास इति वायव्यम् ।१। अवासयन्नुषसं सूर्येणेति सूर्यवत् ।२। तदेतस्याह्नो रूपम् ।३। अत एवोत्तरं तृचमैन्द्रवायवं यावत्तरस्तन्वो यावदोज इति ।४। यावन्नरश्चक्षसा दीध्याना इत्येतेन रूपेण ।५। उद् वां चक्षुर्वरुण सुप्रतीकमिति मैत्रावरुणम् ।६। देवयोरेति सूर्यस्ततन्वानिति सूर्यवत् ।७। तदेतस्याह्नो रूपम् ।८। आ गोमता नासत्या रथेनेत्याश्विनम् ।९। तस्योर्ध्वं[1] भानुं सविता देवो अश्रेदिति [2-]तृतीया भानुमती[-2] ।१०। तदेतस्याह्नो रूपम् ।११। आ नो देव शवसा याहि शुष्मिन्नित्यैन्द्रम् ।१२। तनूषु शूराः सूर्यस्य साताविति सूर्यवत् ।१३। तदेतस्याह्नो रूपम् ।१४। प्र ब्रह्मैतु सदनादृतस्येति वैश्वदेवम् ।१५। वि रश्मिभिः ससृजे सूर्यो गा इति सूर्यवत् ।१६। तदेतस्याह्नो रूपम् ।१७। उत स्या नः सरस्वती जुषाणेति सारस्वतम् ।१८। द्वारावृतस्य सुभगे व्यावरित्येतेन रूपेण ।१९। एष वा उ वासिष्ठस्तृचक्लृप्तस्त्रैष्टुभः[3] प्रउगः ।२०। प्रजापतिर्वै वसिष्ठः ।२१। [4-]स तन्ता यज्ञस्य ।२२। स पुनस्ततावयातयामा भवति[-4] ।२३। प्रजापतावेव तत् सर्वान् कामानृध्नुवन्ति[5] ।२४। तदाहुर्न त्रैष्टुभं प्रातःसवनं स्यान्मोहयति क्लृप्तच्छन्दसो यज्ञमुखमिति[6] ।२५। ऐकाहिकमेव स्यात् ।२६। ज्योतिर्वा एकाहः ।२७। ज्योतिरेष य एष तपति ।२८। ज्योतिषैव तज्ज्योतिः समर्धयति[7] ।२९। तस्य प्र वो देवायाग्नये त्वं हि क्षैतवद् यश इत्येते उभे तदाज्यम् ।३०। ता[8] एकविंशतिमनुष्टुभस्तासामुक्तं[9] ब्राह्मणम् ।३१। माधुच्छन्दसः प्रउगस्तस्योक्तं ब्राह्मणम्[10] ।३२ ॥2॥

[1] L. तस्योर्ध्वं [2-2] L. P. भानुमती तृतीया [3] L. P. सूर्यवांस्त्रैष्टुभस्तृचक्लृप्तो वासिष्ठः
[4-4] L. P. omit [5] L. P. Here ends *Khaṇḍa* 2 [6] L. P. omit इति [7] L. समर्धयन्ति
[8] L. ता:संशस्ता; P. ताः शंसस्ता [9] L. P. एकविंशतिरनुष्टुभो भवन्ति तासा०; L. (var) as here [10] L. P. add आ त्वा रथं यथोतय इति मरुत्वतीयस्य प्रतिपदिदं वसो सुतमन्ध इत्यनुचर एष एव नित्य एकाहातानस्तस्योक्तं ब्राह्मणं

कया शुभा सवयसः सनीळा इति मरुत्वतीयम् ।१। शुभा भा इत्येतेन रूपेण ।२। त्यं सु मेषं महया स्वर्विदमिति जागतमधारयो दिव्या सूर्यं दृश इति सूर्यवत् ।३। तदेतस्याह्नो रूपम् ।४। जनिष्ठा उग्रः सहसे तुरायेत्येतस्मिंस्त्रैष्टुभे निविदं दधाति ।५। अप ध्वान्तमूर्णुहि पूर्धि चक्षुरित्येतेन रूपेण ।६। ता वा उभय्यस्त्रिष्टुब्जगत्यः शस्यन्ते ।७। त्रिष्टुब्जगत्योर्हं वा एष आहित आदित्यः प्रतिष्ठितस्तपति[1] ।८। तदेनं प्रत्यक्षमाप्नुवन्ति[2] ।९। बृहदेतस्याह्नः पृष्ठं स्यादिति हैक आहुः ।१०। बार्हतो वा एष य एष तपति ।११। [3-]तदेनं स्वेन रूपेण समर्धयन्ति[-3] ।१२। बृहदेतत् तपतीति वदन्तः ।१३। अथो अपृष्ठं वा एतद् यन्महादिवाकीर्त्यम् ।१४। अथैते एव प्रत्यक्षे पृष्ठे यद् बृहद्रथन्तरे ।१५। तस्माद् बृहदेवैतस्याह्नः पृष्ठं स्यादिति ।१६। यद्यु सूर्यवति प्रगाथे बृहत् कुर्युः ।१७। सूर्यवतश्च प्रगाथानेतस्यैवाह्नो[4] रूपेण ।१८। इन्द्रः किल श्रुत्या अस्य वेदेत्युक्थमुखीया स हि जिष्णुः पथिकृत् सूर्यायेति सूर्यवती ।१९। तदेतस्याह्नो रूपम् ।२०। महादिवाकीर्त्यमेवैतस्याह्नः पृष्ठं स्यादिति सा स्थितिः ।२१। [5-]असौ वा एतत् प्रत्यक्षं साम योऽसौ तपति[-5] यन्महादिवाकीर्त्यम् ।२२। तदेनं स्वेन साम्ना समर्धयन्ति[6] ।२३। तद्धैके त्रिष्टुप्सु कुर्वन्ति ।२४। त्रैष्टुभो वा एष य एष तपति ।२५। तदेनं स्वेन रूपेण[7] समर्धयन्ति ।२६। बृहतीषु स्यादित्यु[8] हैक आहुः ।२७। बार्हतो वा एष य एष तपति ।२८। तदेनं स्वेन रूपेण[7] समर्धयन्ति[6] ।२९। जगतीषु स्यादिति त्वेव स्थितम् ।३०। जागतो वा एष य एष तपति ।३१। तदेनत्[9] स्वेन छन्दसा समर्धयति[10] ।३२ ॥3॥

[1] BM¹. BM². प्रतितिष्ठित० [2] L. P. Here ends *Khaṇḍa* 3 [3-3] L. P. omit
[4] L. ०नेतस्याह्नो [5-5] L. P. एतद्वै प्रत्यक्षं साम [6] L. (var.) समर्धयति [7] L. P. च्छन्दसा [8] L. P. स्यादिति [9] L. P. तदेनं [10] P. समर्धयन्ति; L. P. Here ends *Khaṇḍa* 4

विभ्राड् बृहत् पिबतु सोम्यं मध्विति स्तोत्रियस्तृचो विश्वभ्राड् भ्राजो महि सूर्यो दृश इति विवान् भ्राजिष्मान्त्सूर्यवान् ।१। तदेतस्याह्नो रूपम् ।२। वि सूर्यो मध्ये अमुचद्



रथं दिव इत्यनुरूपो विवान्त्सूर्यवान् ।३। जागतमु[1] वै समानं छन्दः ।४। विश्वाहा त्वा सुमनसः सुचक्षस इति त्वेव स्थितः सौर्यः सौर्यस्य[2] ।५। ज्योग् जीवाः प्रति पश्येम सूर्येत्येतेन रूपेण ।६। बण्महाँ असि सूर्येति सूर्यवान्त्सामप्रगाथः ।७। तदेतस्याह्नो रूपम् ।८। अथ[3] बृहद्रथन्तरयोर्योनी[4] शंसति ।९। इन्द्रः किल श्रुत्या अस्य वेदेत्युक्थमुखीया स हि जिष्णुः पथिकृत् सूर्यायेति सूर्यवती ।१०। तदेतस्याह्नो रूपम् ।११। शं नो भव चक्षसा शं नो अह्नेति त्वेव स्थिता सौरी सौर्यस्य[2] ।१२। तत् सूर्यं द्रविणं धेहि चित्रमित्येतेन रूपेण ।१३। य एक इद्धव्यश्चर्षणीनामिति त्रैष्टुभम् ।१४। दिव्यानि दीपयोऽन्तरिक्षेत्येतेन रूपेण ।१५। एवं नु यदि महादिवाकीर्त्यं पृष्ठं भवति ।१६। यद्यु वै बृहत् स्वयोनौ कुर्युः ।१७। बृहत आतानं शस्त्वा रथन्तरस्य योनिं शंसति ।१८। इन्द्रः किल श्रुत्या अस्य वेदेत्युक्थमुखीया स हि जिष्णुः पथिकृत् सूर्यायेति सूर्यवती ।१९। तदेतस्याह्नो रूपम्[5] ।२० ॥4॥

[1] L. P. जागत उ [2] L. P. सूर्यस्य [3] BM¹. BM². omit [4] BM¹. BM². ०र्योनीं
[5] L. P. Here ends *Khaṇḍa* 5

द्यौर्न य इन्द्राभि भूमार्यं इति त्रैष्टुभमिन्द्रः कुत्साय सूर्यस्य साताविति सूर्यवत् ।१। तदेतस्याह्नो रूपम् ।२। न चेत् स्वयोनौ ।३। श्रायन्त इव सूर्यमिति[1] सूर्यवान्त्स्तोत्रियः[2] ।४। तदेतस्याह्नो रूपम् ।५। यद् द्याव इन्द्र ते शतमित्यनुरूपः सहस्रं सूर्या इति सूर्यवान् ।६। तदेतस्याह्नो रूपम् ।७। यः सत्राहा विचर्षणिरिति सामप्रगाथस्तनूष्वप्सु सूर्यं इति सूर्यवान् ।८। तदेतस्याह्नो रूपम् ।९। अथ बृहद्रथन्तरयोर्योनी[3] शंसति ।१०। इन्द्रः किल श्रुत्या अस्य वेदेत्युक्थमुखीया तस्या उक्तं ब्राह्मणम् ।११। य एक इद्धव्यश्चर्षणीनामिति त्रैष्टुभं तस्योक्तं ब्राह्मणम् ।१२। एवं नु यदि बृहत् स्वयोनौ वास्वयोनौ वा कुर्युः ।१३। अनुभयसामानं चेत् कुर्युः ।१४। समानमोक्थमुखीयायै ।१५। उद्धरेद् बृहद्रथन्तरयोर्योनी ।१६। तमु ष्टुहि यो अभिभूत्योजा इति त्रैष्टुभम् ।१७। गीर्भिर्वर्ध वृषभं चर्षणीनामित्येतेन रूपेण ।१८। समानमुत्तरम् ।१९। अभि त्यं मेषं पुरुहूतमृग्मियमिति जागतमादित् सूर्यं दिव्यारोहयो दृश इति सूर्यवत् ।२०। तदेतस्याह्नो रूपम् ।२१। ता वा उभय्यस्त्रिष्टुप्जगत्यः शस्यन्ते ।२२। त्रिष्टुब्जगत्योर्हं वा एष आहित आदित्यः प्रतिष्ठितस्तपति ।२३। तदेनं प्रत्यक्षं स्पृशन्ति[4] ।२४ ॥5॥

[1] ER. सूर्यं इति [2] ER. सूर्यवान् प्रगाथः [3] L. P. ०र्योनिं; L. (var.) as here
[4] L. P. Here ends *Khaṇḍa* 6

प्र ते महे विदथे शंसिषं हरी इति ।१। तस्य नव शस्त्वाहूय निविदं दधाति ।२। आविष्कृधि हरये सूर्यायेति सूर्यवत् ।३। तदेतस्याह्नो रूपम् ।४। सर्वहरेश्चतस्रोऽभ्युदैति ।५। आ सत्यो यातु मघवाँ ऋजीषीत्येकविंशतिः ।६। महि ज्योती रुरुचुर्यद्ध वस्तोरित्येतेन रूपेण ।७। ताः पञ्चविंशतिः ।८। विश्वजिते धनजिते स्वर्जित इति षड् जगत्यः ।९। इन्द्राय सोमं यजताय हर्यतमित्येतेन रूपेण ।१०। ता एकत्रिंशत् ।११। तासु जगतीषु दूरोहणं रोहति ।१२। जागतो वा एष य एष तपति ।१३। यजमाना दूरोहणः ।१४। एतमेव तद् यजमाना रोहन्ति ।१५। पच्छः प्रथमं रोहति ।१६। तदिमँल्लोकमाप्नुवन्ति[1] ।१७। अर्धर्चशो द्वितीयम् ।१८। तदन्तरिक्षलोकमाप्नुवन्ति[1] ।१९। त्रिपच्छस्तृतीयम् ।२०। तदमुँल्लोकमाप्नुवन्ति[1] ।२१। केवलीं स आवेशः ।२२। त्रिपच्छोऽर्धर्चशः पच्छः ।२३। तदस्मिँल्लोके प्रतितिष्ठन्ति[2] ।२४। प्रतिष्ठायामप्रच्युत्याम् ।२५ ॥6॥

[1] P. °माप्नोति    [2] L. P. °तिष्ठति

सैषा दूरोहणीया संशस्ता सप्त जगत्यः[1] संपद्यन्ते ।१। ता अष्टत्रिंशत् ।२। एष प्र पूर्वीरव तस्य चम्रिष इति जागतं षळृचमिन्द्रं सिषक्त्युषसं न सूर्यं इति सूर्यवत् ।३। तदेतस्याह्नो रूपम् ।४। ताश्चतुश्चत्वारिंशत् ।५। पतङ्गमक्तमसुरस्य माययेति तिस्रः ।६। तां द्योतमानां स्वर्यं मनीषामित्येतेन रूपेण ।७। ताः सप्तचत्वारिंशत् ।८। उरुं नो लोकमनु नेषि विद्वानिति त्रिःशस्तया परिधानीयया ।९। स्वर्वज्ज्योतिरभयं स्वस्तीत्येतेन रूपेण ।१०। ताः पञ्चाशत् ।११। पूर्वा एकपञ्चाशत् ।१२। ता एकशतमृचो भवन्ति ।१३। शतायुर्वै पुरुषः शतपर्वा शतवीर्यः शतेन्द्रियः ।१४। उप यैकशततमी स यजमानलोकः ।१५। तदत्रैव यजमानान्त्संस्कुर्वन्ति ।१६। तदत्र[2] यजमानान्त्संस्कृत्यादौ महाव्रतीयेनाह्ना प्रजनयन्तीति[3] पैङ्गी संपत्[4] ।१७। अथ कौषीतकेः[5] ।१८। समानमोक्थमुखीयायै ।१९। ऋतुर्जनित्रीयं त्रयोदशर्चमुद्धृतबृहद्रथन्तरे[6] ।२०। तस्यैवैकादश स्वयोनौ ।२१। नवान्यत्र ।२२। तद् रूपा मिनन् तदपा एक ईयत इत्येतेन रूपेण ।२३। एन्द्र याहि हरिभिरिति पञ्चदश ।२४। सरूपैरा सु नो गहीत्येतेन रूपेण ।२५। बरोरेकादश शस्त्वा[7] निविदं दधाति[1] ।२६। मध्य एकशतस्यैकपञ्चाशतं शस्त्वा द्वे बरोरभ्युदैति ।२७। आ[8] सत्यो यातु मघवाँ ऋजीषीत्येकविंशतिस्तास्त्रयोविंशतिः ।२८। विश्वजित इति षट् ता एकयानत्रिंशत्[9] ।२९। दूरोहणीयाः सप्त ताः षट्त्रिंशत् ।३०। अभूरेको रयिपते रयीणामिति त्रैष्टुभं पञ्चर्चं दश प्रपित्वे अध सूर्यस्येति सूर्यवत् ।३१। तदेतस्याह्नो रूपम् ।३२। ता एकचत्वारिंशत् ।३३। त्यमू षु वाजिनं देवजूतमिति तार्क्ष्यस्तिस्रः[10] ।३४। सूर्य इव ज्योतिषापस्ततानेत्ये-



तेन रूपेण ।३५। ताश्चतुश्चत्वारिंशत् ।३६। पतङ्गस्तिस्रस्ताः सप्तचत्वारिंशत् ।३७। उरुं नो लोकमनु नेषि विद्वानिति त्रिःशस्तया परिधानीयया ताः पञ्चाशत् ।३८। पूर्वा एकपञ्चाशत् ।३९। ता एकशतमृचो भवन्ति तासामुक्तं ब्राह्मणम्[11] ।४० ॥7॥

[1] L. P. omit    [2] L. P. °दत्रैव    [3] L. P. °यतीति    [4] L. P. Here ends *Khaṇḍa* 7
[5] L. P. कौषीतकी; L. (var.) as here    [6] L. P. omit त्रयोदशर्चम्; read उद्धृत्य (for उद्धृत); L. (var.) as here    [7] L. P. add सर्वहरेर्वा    [8] L. P. सर्वहरेर्वा    [9] P. °नस्त्रिंशत्
[10] L. P. तिस्रः    [11] L. P. Here ends *Khaṇḍa* 8

[1]युञ्जते मन उत युञ्जते धिय इति सावित्रमुत सूर्यस्य रश्मिभिः समुच्यसीति सूर्यवत् ।१। तदेतस्याह्नो रूपम् ।२। ते हि द्यावापृथिवी विश्वशंभुवेति द्यावापृथिवीयं देवो देवी धर्मणा सूर्यः शुचिरिति सूर्यवत् ।३। तदेतस्याह्नो रूपम् ।४। किमु श्रेष्ठः किं यविष्ठो न आजगन्नित्यार्भवम् ।५। यदावाख्यच्चमसाञ्चतुरः कृतानित्यवाख्यदित्येतेन रूपेण ।६। देवान् हुवे बृहच्छ्रवसः स्वस्तय इति वैश्वदेवं ये सूर्यस्य ज्योतिषो भागमानशुरिति सूर्यवज्ज्योतिष्मत् ।७। तदेतस्याह्नो रूपम् ।८। वैश्वानराय धिषणामृतावृध इति वैश्वानरीयं रुरुचानं भानुना ज्योतिषा महामिति रुचितवद् भानुमज्ज्योतिष्मत् ।९। तदेतस्याह्नो रूपम् ।१०। प्रयज्यवो मरुतो भ्राजदृष्टय इति मारुतं विरोकिणः सूर्यस्येव रश्मय इति सूर्यवत् ।११। तदेतस्याह्नो रूपम् ।१२। वेदिषदे प्रियधामाय सुद्युत इति जातवेदसीयम् ।१३। ज्योतीरथं शुक्रवर्णं तमोहनमित्येतेन रूपेण ।१४। इत्याग्निमारुतसूक्तानि ।१५। इत्येतस्याह्नः सूक्तानि ।१६। तदग्निष्टोमः संतिष्ठते ।१७। ज्योतिर्वा अग्निष्टोमः ।१८। ज्योतिरेष य एष तपति ।१९। ज्योतिष्येव[2] तज्ज्योतिः प्रतिष्ठापयन्ति[3] ।२०। तेऽमृतत्वमाप्नुवन्ति ये वैषुवतमहरुपयन्ति[4] ।२१। पुरादित्यस्यास्तमयादेतदहः संस्थापयिषेयुः ।२२ ॥8॥

[1] L. P. add तत्सवितुर्वृणीमहेऽद्यानो देव सवितरिति नित्यैव वैश्वदेवस्य प्रतिपच्चानुचरश्च तयोरुक्तं ब्राह्मणम्    [2] L. P. ज्योतिषैव    [3] L. P. समर्धयन्ति; L. (var.) as here    [4] L. P. Here ends *Khaṇḍa* 9

सप्रातरनुवाकमेतदहर्दिवाकीर्त्यं भवति ।१। सप्रातरनुवाकेन सपत्नीसंयाजेनैतेनाह्ना पुरादित्यस्यास्तमयात् समीप्सेयुः[1] ।२। अग्निं मन्ये पितरमग्निमापिमित्येतया [2-]होता तदहः[-2] प्रातरनुवाकं प्रतिपद्यते ।३। आपिमित्यापोरेवत्यै रूपेण ।४। दिवि शुक्रं यजतं सूर्यस्येति सूर्यवती ।५। तदेतस्याह्नो रूपम् ।६। तदु ह स्माह कौषीतकिः ।७। प्रजापतिर्वै प्रातरनु-

वाकः ।८। न तमस[3] एतं[4] यथायथमेव तमुपाकुर्युः[5] ।९। तत् तस्य समृद्धम् ।१०। तथा यथायथमुपांश्वन्तर्यामौ हूयेते ।११। तदु तयोः समृद्धमिति ।१२। वासिष्ठमाप्रीसूक्तं सं रश्मिभिस्ततनः सूर्यस्येति सूर्यवत् ।१३। तदेतस्याह्नो रूपम् ।१४। शुक्र[6] एतस्याह्नः पिङ्गाक्षो होता स्यादिति हैक आहुः ।१५। अमुं वा एतेनाह्नेप्सन्ति योऽसौ तपति ।१६। तद् यथा श्रेयांसमाहरन्नुपेयादेवं तत् ।१७। यथोपपादमिति त्वेव स्थितम् ।१८। शस्त्रेणैवैतस्याह्नो रूपं संपादयिषेयुः[7] ।१९। सौर्यः पशुरुपालम्भ्यः सवनीयस्य ।२०। स उपांशु भवति ।२१। स यस्तं निर्ब्रूयात् ।२२। यस्तं तत्र ब्रूयात् ।२३। दुश्चर्मा किलासी[8] भविष्यतीति[9] तथा ह स्यात् ।२४। ते वा एते चत्वार एव पशव उपांशु भवन्ति ।२५। सौर्यः सावित्रः प्राजापत्यो वाग्देवत्य इति ।२६। अथान्ये निरुक्ताः ।२७। अथ त्रीन्त्स्वरसाम्न आवृत्तानुपयन्ति तेषामुक्तं ब्राह्मणम्[10] ।२८ ॥9॥

¹ P. शमीप्सेयुः ²⁻² L. P. तदहर्होता ³ P. तमसा ⁴ L. एव तद्; P. एतद् ⁵ L. P. °पाकुर्यात्; L. (var.) °पकुर्युः (wrongly attributes to IO.) ⁶ L. P. शुक्ल ⁷ L. P. उपेप्सेत्; L. wrongly reports that IO. reads संपादयिष्येयुः ⁸ L. किलासीति; (var.) P. किलासीद्; ⁹ L. तद्भविष्यतीति; L. (var.), C. भविष्यसीति; ¹⁰ L. P. Here ends *Khaṇḍa* 10

त्रयोदशमधिचरं[1] मासमाप्नुवन्ति यद् विश्वजितमुपयन्ति ।१। एतावान् वै संवत्सरो यदेष त्रयोदशो मासः ।२। तदत्रैव सर्वः संवत्सर आप्तो भवति ।३। तमाहुरेकाहः षळह इति ।४। यद्यन्वहं[2] षळहे क्रियते ।५। एकाहे तद् विश्वजिति क्रियते ।६। तद् वा इदं बहुविश्वरूपं विश्वजिति क्रियते ।७। यत् सर्वाणि पृष्ठानि सर्वे स्तोमा उच्चावचाः समवधीयन्ते ।८। वैराजमेवास्य प्रत्यक्षं पृष्ठं भवति ।९। माध्यंदिने पवमाने रथन्तरम् ।१०। बृहत् तृतीये[3] पवमाने क्रियते ।११। शाक्करं मैत्रावरुणस्य ।१२। वैरूपं ब्राह्मणाच्छंसिनः ।१३। रैवतमच्छावाकस्य ।१४। त एतं त्रयोदशमधिचरं मासमाप्नुवन्ति ।१५। एतद्धि त्रयोदशम् ।१६। पृष्ठ्यान्युपयन्ति[4] ।१७। तस्याग्निं नरो दीधितिभिररण्योरिति वैराजमाज्यम् ।१८। [5–]वैराजं पृष्ठं[–5] तस्योक्तं ब्राह्मणम् ।१९। [5–]वासिष्ठमाज्यम् ।२०। वासिष्ठं पृष्ठं तस्योक्तं ब्राह्मणम्[–5] ।२१। माधुच्छन्दसः प्रउगस्तस्योक्तं ब्राह्मणम्[6] ।२२। कया शुभा सवयसः सनीळा इति मरुत्वतीयम् ।२३। कद्वत् कयाशुभीयम् ।२४। को वै प्रजापतिर्विश्वजित् ।२५। यावेवामू वैराजस्य स्तोत्रियानुरूपौ तौ स्तोत्रियानुरूपौ ।२६। तयोस्तथैव न्यूङ्खयति यथादश्चतुर्थेऽहन् ।२७। न हि वैराजं तत् स्थानमन्यूङ्खनाय[7] ।२८ ॥10॥



¹ L. P. त्रयोदशं वा एतं; L. (var.) as here ² C. यद्धच° ³ L. तृतीय ⁴ L. पृष्ठान्यु° ⁵⁻⁵ L. P. omit ⁶ L. P. add आ त्वा रथं यथोतय इति मरुत्वतीयस्य प्रतिपदिदं वसो सुतमन्ध इत्यनुचर एष एव नित्य एकाहातानस्तस्योक्तं ब्राह्मणं ⁷ L. P. add एषा धाय्यैषोष्टेन्द्रः (P. repeats एषा धाय्या) प्रगाथोऽथ बृहद्रथन्तरयोर्योनिं शंसति

तदिदास भुवनेषु ज्येष्ठमिति निष्केवल्यम् ।१। यज्ञो वै भुवनेषु ज्येष्ठः ।२। यज्ञ उ वै प्रजापतिर्विश्वजित् ।३। अथ यत्[1] षष्ठस्याह्नस्तृतीयसवनं तत् तृतीयसवनम् ।४। प्राजापत्यं वै षष्ठमहः ।५। प्रजापतिर्विश्वजित् ।६। ऐकाहिकी प्रतिपद् ।७। एकाहो वै विश्वजित् ।८। प्रतिष्ठा वा एकाहः प्रतिष्ठित्या एव[2] ।९। तदाहुरथ कस्माद् विश्वजिति सर्वपृष्ठ एकाहे तृतीयसवने शिल्पानि शस्यन्ते कस्मादग्निष्टोमे मध्यंदिन[3] इति ।१०। ये वा इमेऽवाञ्चः प्राणास्तानि शिल्पानि[4] ।११। पुरुषो वै यज्ञः ।१२। तस्य य ऊर्ध्वा प्राणास्तत् प्रातःसवनम् ।१३। आत्मा मध्यंदिनः ।१४। येऽवाञ्चस्तत् तृतीयसवनं तानि शिल्पानि ।१५। तस्मात् तृतीयसवने शिल्पानि शस्यन्ते[5] ।१६। एतद्ध्येषामायतनम् ।१७। अथ यदग्निष्टोमे[6] सत्रिये[7] सांवत्सरिके विश्वजिति सर्वपृष्ठे[8] मध्यंदिने[9] शिल्पानि शस्यन्ते ।१८। आत्मा वै पृष्ठानि[10] ।१९। प्राणाः शिल्पानि ।२०। न वा अन्तरेणात्मानं प्राणाः स्थायन्ते ।२१। न प्राणानन्तरेणात्मा ।२२। नो एतन्नाना ।२३। तस्मादग्निष्टोम एवापि[11] मध्यंदिने[9] शिल्पानि शस्यन्ते ।२४। नेत् प्राणेभ्य आत्मानमपादधानीति ।२५ ॥11॥

¹ L. P. यदि ² L. P. add अभिवाननुचरस्तस्योक्तं ब्राह्मणम् ॥११॥ ³ L. P. माध्यंदिन ⁴ ER. पृष्ठानि ⁵ L. P. क्रियन्ते ⁶ L. P. कस्मादग्नि° ⁷ L. P. सात्रिके ⁸ L. P. omit ⁹ L. P. माध्यंदिने ¹⁰ P. पृष्ठ्यानि ¹¹ L. P. add विश्वजिति

अथो प्रजापतिर्वै विश्वजित् ।१। सर्वं वै प्रजापतिर्विश्वजित्[1] ।२। तत् सर्वेण सर्वमाप्नोति य एवं वेद[2] ।३। तत्राग्निमारुते रौद्रीं शस्त्वा होतैवयामरुतं पङ्क्तिशंसं शंसति ।४। पाङ्क्तो वै यज्ञो यज्ञस्यैवाप्त्यै ।५। नेदच्छावाकस्य शिल्पमन्तरयामेति[3] ।६। अथो रुद्रो वै ज्येष्ठश्च श्रेष्ठश्च देवानाम् ।७। अतिच्छन्दाश्छन्दसाम् ।८। विश्वजिदेकाहानाम् ।९। तदेनत्[4] स्वेन छन्दसा समर्धयति ।१०। [5–]तस्य तिसृषु न्यूङ्खयति[–5] ।११। न्यूङ्खयितुं

[6–]चेद् ध्रियेत[–6] ।१२। सर्वास्वेव[7] न्यूङ्खयेत् ।१३। अन्नं वै न्यूङ्खः ।१४। अन्नं प्राणः[8] ।१५। प्राणाः शिल्पानि ।१६। प्राण[9] एव तत् प्राणान्[10] दधाति ।१७। अथो विश्वजिता वै प्रजापतिः सर्वाः प्रजा अजनयत् सर्वमुदजयत्[11] ।१८। एतद् वा एष जायते विश्वजिता यो यजते ।१९। तस्मान्न्यूङ्खयति ।२०। न्यूङ्खमानक इव वै प्रथमं चिचर्षंश्चरति[12] ।२१। तदेनममृताच्छन्दसोऽमृतत्वाय प्रजनयन्ति[13] ।२२। तेऽमृतत्वमाप्नुवन्ति ये विश्वजितमुपयन्ति[14] ।२३। सोऽग्निष्टोमः[15] संतिष्ठते ।२४ ।।12।।

[1] L. P. add तस्मात् सर्वपृष्ठानि (P. सर्वाणि पृष्ठ्यानि) क्रियन्ते सर्वाणि शिल्पानि सर्वं वै प्रजापतिर्विश्वजित् [2] L. P. Here ends *Khaṇḍa* 12 [3] L. P. °मन्तरियामिति; L. wrongly reports that IO. reads °मन्तर्यामेति [4] L. P. तदेनं [5–5] L. P. तिसृष्वस्य न्यूङ्खयेत् [6–6] L. (var.) चेद्रियेत, चेंद्रियेत (P.) [7] P. सर्वाश्चैव [8] P. प्राणाः [9] L. P. प्राणेषु [10] L. P. प्राणं [11] L. P. add तस्माद् विश्वजित् [12] L. चिचरिषुश्च°; P. चिचरिषश्च°; BM¹. BM². चिचर्षांश्च° [13] L. P. °नयति [14] L. P. Here ends *Khaṇḍa* 13 [15] L. P. स सर्वस्तोमः सर्वपृष्ठोऽग्निष्टोमः

यः सत्रियः[1] सांवत्सरिको विश्वजित् ।१। प्रतिष्ठा वा अग्निष्टोमः प्रतिष्ठित्या एव ।२। एकाह उ चेद् विश्वजिद् रात्रिसत्रस्य वा विषुवानतिरात्र एव स्यात् ।३। स कृत्स्नो विश्वजिद् योऽतिरात्रः ।४। अर्धं वै विश्वजितोऽह्ना क्रियते ।५। अर्धं रात्र्या ।६। सर्वपराजिदु हैव स योऽन्यत्र सर्ववेदसाद् वा सत्राद् वा क्रियते ।७। सर्वज्यानिर्हैव सा ।८। योऽन्यत्र विश्वजितः सर्वं ददाति ।९। विश्वजिच्चेत् सर्वमेव ।१०। सर्वमु चेद् विश्वजिदेव ।११। यो ह वै न सर्वं ददाति सर्वं ददामीति[2] ब्रुवन् ।१२। कर्तपत्यमेव[3] तज्जीयते[4] प्र वा मीयते इति ह स्माह ।१३। सहस्रं वैनमवरुन्ध इति ह स्माह कौषीतकिः ।१४। सर्वं वै तद् यत् सहस्रम् ।१५। सर्वं विश्वजित् ।१६। तत्[5] सर्वेण [6–]सर्वमाप्नोति य एवं वेद[–6] ।१७। वत्सच्छवीन्[7] परिदधीत ।१८। रिरिचान इव वा एतस्यात्मा भवति यः सर्वं ददाति ।१९। वत्सं वै पशवो वाञ्छन्ति ।२०। पुनर्मा पशवो वाञ्छन्त्विति[8] ।२१। उदुम्बरे वसेत् ।२२। ऊर्ग्वा अन्नाद्यमुदुम्बरः ।२३। ऊर्जोऽन्नाद्यस्योपाप्त्यै ।२४। नैषादे वसेत् ।२५। एतद् वा अवरार्ध्यमन्नाद्यं यन्नैषादः ।२६। अवरार्ध्यस्यान्नाद्यस्योपाप्त्यै ।२७ ।।13।।

[1] L. P. सात्रिकः [2] L. P. ददानीति [3] L. P. गर्त° [4] L. P. तद्धीयते [5] L. omits [6–6] L. P. सर्वमाप्नवानीति; here ends *Khaṇḍa* 14 [7] L. P. वत्सच्छवीं [8] L. P. वाञ्छानिति; L. (var.) as here



वैश्ये वसेत् ।१। वैश्यो वै पुष्यतीव ।२। यद् वैश्येऽन्नाद्यं तस्योपाप्त्यै ।३। क्षत्रिये वसेत् ।४। एतद् वै परार्ध्यमन्नाद्यं यत् क्षत्रियः ।५। परार्ध्यस्यान्नाद्यस्योपाप्त्यै ।६। ब्राह्मणे समानगोत्रे वसेत् ।७। यत् समाने[1] गोत्रेऽन्नाद्यं तस्योपाप्त्यै ।८। संवत्सरं चरेदधःसंवेश्यफालकृष्टाश्यप्रतिगृह्णन्नान्नं याचन्निदं तत्तदनुवसानः ।९। तत्तेनानुवस्ते ।१०। द्वादशरात्रं चरित्वाथन्यस्यै बुभूषायै स्यादिति ह स्माह कौषीतकिः ।११। द्वादश वै मासाः संवत्सरः ।१२। सा संवत्सरस्य प्रतिमेति ।१३। प्राजापत्यान्यनिरुक्तानि होत्राणामाज्यानि भवन्ति ।१४। तस्य ता नः शक्तं पार्थिवस्य युञ्जन्ति ब्रध्नमरुषं ता हि शश्वन्त ईळते तमीळिष्व यो अर्चिषेति वा स्तोत्रियाः ।१५। ये षष्ठस्याह्नः स्तोत्रियास्ते विश्वजितोऽनुरूपाः ।१६। प्राजापत्यं वै षष्ठमहः ।१७। प्रजापतिर्विश्वजित् ।१८। इतरे पञ्च तदुक्थम् ।१९। पर्यासैः परिदधति ।२०। प्रतिष्ठा वै पर्यासाः ।२१। प्रतिष्ठित्या एव प्रतिष्ठित्या एव[2] ।२२ ।।14।।

[1] BM¹. BM². समान [2] L. P. Here ends *Khaṇḍa* 15

## इति तृतीयदशके पञ्चमोऽध्यायः

**द्वात्रिंशी प्रथमो मासो द्वात्रिंश्युत्तमः ।१। द्वात्रिंशदक्षरानुष्टुप् ।२। वागनुष्टुप् ।३। तद् वाचा प्रयन्ति ।४। वाचमनूत्तिष्ठन्ति[1] ।५। अष्टाविंशिनावभितो विषुवन्तं मासौ ।६। अष्टाविंशत्यक्षरोष्णिक् ।७। औष्णिह्यो ग्रीवाः ।८। अथैतच्छिरो यज्ञस्य यद् विषुवान् ।९। ग्रीवा एव तत् कल्पयित्वा तासु शिरः प्रतिदधति ।१०। तदाहुः कतरेषामेषोऽह्नामवरेषां परेषामिति ।११। नावरेषां न परेषामित्याहुः ।१२। उभयेषां वा एषोऽह्नाम् ।१३। उभयानि वै तस्यैतान्यहानि ।१४। तदाहुः कति षळहाः[2] संवत्सर इति ।१५। षष्टिः षळहाः षळहशः ।१६। तदेतदव्यवलम्बि संवत्सरायणम्[3] ।१७। तद् य एवं संवत्सरस्याहानि युञ्जन्ति ।१८। त एतान्त्सर्वान्[4] कामानृध्नुवन्ति ये संवत्सरे ।१९। अथ येऽतोऽन्यथा संवत्सरस्याहानि युञ्जन्ति ।२०। न ते तान्त्सर्वान्[4] कामानृध्नुवन्ति ये संवत्सरे ।२१ ॥1॥**

[1] L. °ष्ठन्ते; P. °मनुतिष्ठन्ति [2] L. P. षडहः [3] L. P. °यनं; L. (var.) °यतनं
[4] L. P. omit सर्वान्

**अथ हैक ऊर्ध्वानेव मासानुपयन्त्यूर्ध्वान्यहानि ।१। ऊर्ध्वं वा [1–]उ वयं[–1] संवत्सरं रोहाम इति वदन्तः[2] ।२। मासा एवावर्तेरन् नाहानीत्येके ।३। य एवैष[3] पृष्ठ्यः षळहः पुनः परस्तात् पर्येति तेन मासा आवृत्ता इति वदन्तः ।४। तदाहुर्विदूररूपं वा एतद् यत् त्रिवृच्च त्रयस्त्रिंशश्च स्तोमौ ।५। तद् यथा गिरिशिखरात् कर्तमभि[4] प्रस्कन्देदेवं तत् स्तोमकृन्तत्रम् ।६। तस्मादेवाहानि वर्तेरन् ।७। नो मासा अस्तोमकृन्तत्रतायाः[5] इति[6] ।८। अथातो गोआयुषोर्मीमांसा ।९। विहृते[7] गोआयुषी उपेयुः ।१०। अहोरात्रे वै गोआयुषी ।११। विहृते[7] वा इमे अहोरात्रे अन्योन्यस्मिन् ।१२। अथो द्यावापृथिवी वै गोआयुषी ।१३। विहृते[7] वा इमे द्यावापृथिवी अन्योन्यस्मिन् ।१४। अथो प्राणापानौ वै गोआयुषी ।१५। विहृतौ[8] वा इमौ प्राणापानावन्योन्यस्मिन् प्रतितिष्ठतः[9] ।१६। ते हैक ऊर्ध्वे उपयन्त्यूर्ध्वे उपेतव्ये गोआयुषी इति ।१७। अन्वाभिप्लविकाः स्तोमा आवर्तन्ते दशरात्रमनुपृष्ठ्यस्तोमा इति वदन्तः ।१८। तद्[10] यदेवेदं द्वितीयमहर्यच्च तृतीयमेते वा उ गोआयुषी[11] ।१९ ॥2॥**

[1–1] L. (var.) P. उभयं [2] L. P. omit [3] L. P. एष [4] L. P. गर्त° [5] L. P. स्तोम°
[6] L. P. Here ends *Khaṇḍa* 1 [7] P. विकृते [8] P. विकृतौ [9] P. प्रत्यतिष्ठत
[10] L. P. तदाहुः [11] L. P. add *Khaṇḍas* 3, 4, 5 and 6 as under:

अथ कश्चिच्छस्त्रे वानुवचने वा प्रमत्त उपहन्याद्विचिकित्सा वा स्यादुपहतमबुद्धमतिक्रान्तं मन्यमानो मनसा वृत्तान्तमीक्षमाणो विनिवृत्योपहतमनुपहतं कृत्वानन्तर्यात्प्रयोगः स्याद्वृत्तान्तादिति मीमांसन्तेऽथ ह स्माह पैङ्ग्यो नानन्तर्यात्प्रयोगःस्यादतिरिक्तो वा एष मन्त्रःस्याद्योऽवचनाद् द्विरुच्येत तस्मान्नान्तर्यात्प्रयोगः



स्यादिति ह स्माह पैङ्ग्योऽथ ह स्माह कौषीतकिः परिमितफलानि वा एतानि कर्माणि येषु परिमितो मन्त्रगणः प्रयुज्यतेऽथापरिमितफलानि येष्वपरिमितो मन्त्रगणः प्रयुज्यते मनो वा एतद्यदपरिमितं प्रजापतिर्वै मनो यज्ञ उ वै प्रजापतिः स्वयं वै तद्यज्ञो यज्ञस्य जुषते यन्मनो मनसस्तस्मादानन्तर्यात्प्रयोगः स्यादिति ह स्माह कौषीतकिर्मितं ह वै मितेन जयत्यमितममितेनापरिमितस्यावरुद्ध्या अनुल्बणमेतदिति ह स्माह कौषीतकिर्नाहुतिं जुहुयात्तथा ह यजमानः स्वर्गाँल्लोकान्त्सर्वान् कामान्त्सर्वा अष्टीः सर्वं चामृतत्वमाप्नोति सर्वेषां च भूतानां श्रैष्ठ्यं स्वाराज्यमाधिपत्यं पर्येति यस्यैवं क्रियते ॥३॥

अथ यद्यूर्ध्वं परिधानात्प्रणववषट्कारयोर्वोर्ध्वं याज्यापुरोनुवाक्ययोर्बुध्येतातिक्रान्तमुल्बणमेतस्यां वेलायां भवतीति ह स्माह प्रागहिस्तस्मान्नैतस्यां वेलायामतिक्रान्तमुल्बणं सदस्यो बोधयेतेति ह स्माह पैङ्ग्यः स्थाणुं वर्छति गर्ते वा पतति धीयते वा प्र वा मीयत इति ह स्माह यद्यतिक्रान्तमुल्बणं सदस्यो बोधयेत कृतस्यानावृत्तिरिति ह स्माहारुणिर्गुणलोप इति श्वेतकेतुस्तस्मान्नातिक्रान्तमुल्बणं सदस्यो बोधयेतेति ह स्माहै पैङ्ग्योंऽहो वा एतद्यज्ञस्य यद्यतिक्रान्तमुल्बणं सदस्यो बोधयेतेति तस्मान्नातिक्रान्तमुल्बणं सदस्यो बोधयेतेति ह स्माह पैङ्ग्यः ॥४॥

अथ ह स्माह दैवोदासिः प्रतर्दनो नैमिषीयाणां सत्त्रमुपगम्योपास्यद्य विचिकित्सां पप्रच्छ यद्यतिक्रान्तमुल्बणं सदस्यो बोधयेतर्त्विजां वान्यतमो बुध्येत कथं वोऽनुल्बणं स्यादिति त उ ह तूष्णीमासुस्तेषामलीकयुर्वाचस्पतो ब्रह्मास स होवाच नाहमेतद्वेद हन्त पूर्वेषामाचार्यं स्थविरं जातूकर्ण्यं पृच्छानीति तं ह पप्रच्छ यद्यतिक्रान्तमुल्बणं कर्ता वा स्वयं बुध्येतान्यो वा बोधयेत कथं तदुल्बणमनुल्बणं भवेत्पुनर्वचनेन वा मन्त्रस्य होमेन वेति पुनर्वाच्यो मन्त्र इति ह स्माह जातूकर्ण्यस्तमलीकयुः पुनः पप्रच्छ शस्त्रं वानुवचनं वा निगदं वा याज्यां वा यद्वान्यत्सर्वं तत्पुनर्ब्रूयादिति यावन्मात्रमुल्बणं तावद्ब्रूयादृचं वार्धर्चं वा पादं वा पदं वा वर्णं वेति ह स्माह जातूकर्ण्योऽथ ह स्माह कौषीतकिर्न मन्त्रं पुनर्ब्रूयान्नाहुतिं जुहुयादनुल्बणमेतदिति ह स्माह कौषीतकिर्यद्धि होतारो यज्ञस्य किंचिदुल्बणमबुध्यमानाः कुर्वन्ति सर्वं तदग्निर्दैवो होतानुल्बणं करोति तदेतदृचाभ्युदितम् ॥५॥

यत्पाकत्रा मनसा दीनदक्षा न यज्ञस्य मन्वते मर्त्यासः । अग्निष्टद्धोता क्रतुविद्विजानन्यजिष्ठो देवाँ ऋतुशो यजातीति यच्चाह संस्थिते यज्ञेऽयाडच(P. द्य)ज्ञं जातवेदा इत्ययाक्षीदिमं यज्ञं जातवेदा इति तदाहान्तरः पूर्वो अस्मिन्निषद्येति यदाहाग्निर्हं दैवो होता मानुषाद्धोतुः पूर्वो निषद्य यजत इति तदाहाशिषमेवोत्तरेणार्धर्चेन वदति पूर्वया वर्चा ॥६॥

**षष्ठे वा अहन् देवाः स्तोमाँश्च मासाँश्चाप्नुयुः[1] ।१। त[2] आप्त्वा[3] स्तोमानेतानेव पृष्ठ्यस्तोमान् द्वन्द्वं समास्यन् ।२। कुतो ह्यन्यं स्तोममाहरिष्यन् ।३। तावेतौ[4] त्रिवृत्पञ्चदशौ स्तोमौ सप्तममहर्वहतश्चतुर्विंशस्तोमो[5] भूत्वा ।४। अथैतौ सप्तदशत्रिणवौ स्तोमावष्टममहर्वहतश्चतुश्चत्वारिंशस्तोमो भूत्वा ।५। अथैतावेकविंशत्रयस्त्रिंशौ[6] स्तोमौ नवममहर्वहतोऽष्टाचत्वारिंशस्तोमो भूत्वा ।६। तेषां गायत्र्या प्रथमो मितस्त्रिष्टुभा द्वितीयो जगत्या तृतीयः ।७। तद् यच्छन्दोभिर्मिताः ।८। तस्माच्छन्दोमाः ।९। अथ याः षट्त्स्तोत्रिया अष्टाचत्वारिंशं[7] स्तोममतियन्ति[8] ।१०। तास्ता[9] ऋतव इत्याहुः ।११। षढ्यृतवः[10]**

।१२। ताभिर्दशममहस्तायते[11] ।१३। अन्तः[12] षष्ठमहः ।१४। अथ पुनस्ततिरेव सप्तममहः ।१५। तस्मात् ततवन्ति सप्तमेऽहन्त्सूक्तानि शस्यन्ते प्रायणीयरूपेण ।१६। पुनःप्रायणीयं हि सप्तममहः ।१७ ॥3॥

[1] L. P. ०भ्रुवन्  [2] L. P. तान्  [3] P. आप्तान्  [4] L. P. अथैतौ  [5] L. ०विंशः स्तोमो  [6] L. (var.) तथा (for अथ)  [7] IO. BM¹. ०रिंश  [8] ER. ०ममुप०  [9] L. तास्त  [10] L. P. षड्तवः  [11] L. P. Here ends *Khaṇḍa* 7  [12] L. P. अन्तो वै

प्र वः शुक्राय भानवे भरध्वमित्याज्यं प्रवत् ।१। प्रवद् वै प्रथमस्याह्नो रूपम् ।२। [1–]त्रैष्टुभः प्रउगः[–1] ।३। प्र वीरया शुचयो दद्रिरे वामिति वायव्यं प्रवत् ।४। प्रवद् वै प्रथमस्याह्नो रूपम् ।५। अत एवोत्तरं तृचमैन्द्रवायवं ते सत्येन मनसा दीध्याना इति ।६। स्वेन युक्तासः क्रतुना वहन्तीति युक्तवत् ।७। युक्तवद् वै प्रथमस्याह्नो रूपम् ।८। उद् वां चक्षुर्वरुण सुप्रतीकमिति मैत्रावरुणम् ।९। देवयोरेति सूर्यस्ततन्वानिति ततवत् ।१०। ततवद् वै सप्तमस्याह्नो रूपम् ।११। आ गोमता नासत्या रथेना नो देव शवसा याहि शुष्मिन् प्र वो यज्ञेषु देवयन्तो अर्चन् प्र क्षोदसा धायसा सस्र एषेति।१२। एति वा वै प्रेति वा प्रायणीयरूपम्।१३। तस्मादावन्ति च प्रवन्ति च सप्तमेऽहन्त्सूक्तानि शस्यन्ते प्रायणीयरूपेण ।१४। पुनःप्रायणीयं हि सप्तममहः ।१५। तदाहुर्यत् किंच[2] छन्दः प्रातःसवने युज्येतार्धर्चश एव तस्य शस्त्रमिति[3] गायत्र्यै रूपेणाथो प्रातःसवनरूपेणेति ।१६। तदु ह स्माह कौषीतकिः ।१७। न त्रिष्टुब्जगत्यावेतत्स्थानेऽर्धर्चशः शस्त्राय[4] ।१८। यद्यपि प्रातःसवने युज्येताम्[5] ।१९। पच्छ एवैनयोः शस्त्रमिति सा स्थितिः ।२०। बृहत्पृष्ठं राथन्तरं शस्त्रम् ।२१। तन्मिथुनं प्रजात्यै रूपम्[6] ।२२ ॥4॥

[1–1] L. P. omit  [2] L. किंचित्  [3] L. P. omit इति  [4] L. P. शस्याय  [5] L. P. युज्येयातां  [6] L. P. add अन्वायत्ता मरुत्वतीयानां प्रतिपदनुचरा अन्वायत्ता ब्राह्मणस्पत्यास्त्र्यहरूपेण तेषामुक्तं ब्राह्मणम् ॥८॥

कया शुभा सवयसः सनीळा इति मरुत्वतीयम् ।१। तदेतत् संज्ञा श्रीः सूक्तम् ।२। एतेन ह वा[1] इन्द्रश्च मरुतश्च समजानत[2] ।३। अभिसंजानते ह वा अस्मै स्वा श्रैष्ठ्याय य एवं वेद ।४। कया मती कुत एतास एत इत्यावद् राथन्तरम् ।५। त्यं सु मेषं महया स्वर्विदमिति जागतम् ।६। एन्द्रं ववृत्यामवसे सुवृक्तिभिरित्यावद् राथन्तरम् ।७। [3–]त्रैष्टुभजागते जागतं जगन्मध्यंदिनो ह्येष त्र्यहः[–3] ।८। तदाहुर्यद् रथन्तरं पृष्ठं सप्तमस्याह्न आयतनेनाथ कस्मादन्वहं बृहत् क्रियत इति ।९। तानि वा [4–]एतान्यहानि महास्तोमानि[–4] भवन्ति ।१०। तस्मादन्वहं बृहत् क्रियते ।११। एतेषामेवाह्नां सबलतायै ।१२। एतेषां [5–]छन्दोमानामसमवप्लुताया इति[–5] ।१३। बृहत आतानं शस्त्वा रथन्तरस्य योनिं शंसति ।१४। नाहैव नः पिता योऽन्यवादं[6] सैवासीदिति ह स्माह कौषीतकिः ।१५। यत्र तु क्वचैते सामनी समानेऽहन्त्संनिपतेताम्[7] ।१६। अन्वेव तत्रेतरस्येतरस्य वा[8] योनिमनुशंसेत् ।१७। यद्यु कण्वरथन्तरं कुर्युः ।१८। नास्य योनिमनुशंसेत् ।१९। न ह्यन्येषां[9] पृष्ठानां[10] योनिः शस्या भवतीति[11] ।२०। तमु ष्टुहि यो अभिभूत्योजा अभि त्यं मेषं पुरुहूतमृग्मियमित्युभे[12] अभिवती ।२१। तद् राथन्तरं रूपम् ।२२। [3–]त्रैष्टुभजागते जागतं जगन्मध्यंदिनो ह्येष त्र्यहः[–3] ।२३। द्वे द्वे सूक्ते निष्केवल्यमरुत्वतीययोः शस्येते प्रथमे छन्दोमे।२४। द्विपाद् यजमानः ।२५। प्रतिष्ठित्यै ।२६। तानि चत्वारि संपद्यन्ते ।२७। पशवो वै छन्दोमाः ।२८। चतुष्टया वै पशवः ।२९। अथो चतुष्पादाः पशूनामेवाप्त्यै[13] ।३० ॥5॥



[1] L. P. omit  [2] L. P. ER. समजानतां  [3–3] L. P. omit  [4–4] L. P. एतानि महास्तोमान्यहानि  [5–5] L. स्तोमानामसमबलतायै; P. स्तोमानामसमल्लतायै; ER. ०मसमवीर्यताया०  [6] L. योन्यनुवादं  [7] L. P. ०पतेयातां  [8] BM¹. BM². omit  [9] BM¹. ह्येषां  [10] P. पृष्ठ्यानां  [11] L. P. add ह स्माह कौषीतकिः  [12] L. ०मिति त्रैष्टुभजागते सूक्ते  [13] L. P. Here ends *Khaṇḍa* 9

तत् सवितुर्वरेण्यमिति सावित्रम् ।१। धियो यो नः प्रचोदयादिति प्रवत् ।२। प्रवद् वै प्रथमस्याह्नो रूपम् ।३। प्रेतां यज्ञस्य शंभुवेति द्यावापृथिवीयं प्रवत् ।४। प्रवद् वै प्रथमस्याह्नो रूपम् ।५। अयं देवाय जन्मन इत्यार्भवम् ।६। स्तोमो विप्रेभिरासयेत्यावत् ।७। आवद् वै प्रथमस्याह्नो रूपम् ।८। ऋजुनीती नो वरुण इति[1] वैश्वदेवं नीतवत् ।९। नीतवद् वै सप्तमस्याह्नो रूपम् ।१०। आ याहि वनसा सहेति द्विपदा आवत् ।११। आवद् वै प्रथमस्याह्नो रूपम्।१२। ओमासश्चर्षणीधृत इति वैश्वदेवम्।१३। विश्वे देवास आ गतेत्यावत् ।१४। आवद् वै प्रथमस्याह्नो रूपम् ।१५। गायत्रं गायत्रतृतीयसवनो ह्येष त्र्यहः ।१६। वैश्वानरो न ऊतय इति वैश्वानरीयम् ।१७। आ प्र यातु परावत[2] इत्यावत् ।१८। आवद् वै प्रथमस्याह्नो रूपम् ।१९। प्र यद् वस्त्रिष्टुभमिषमिति मारुतं प्रवत् ।२०। प्रवद् वै प्रथमस्याह्नो रूपम् ।२१। अर्चन्तस्त्वा हवामह इति जातवेदसीयम् ।२२। त्वया यज्ञं वि तन्वत इति ततवत् ।२३। ततवद् वै सप्तमस्याह्नो रूपम् ।२४। गायत्रं गायत्रतृतीयसवनो ह्येष त्र्यहः ।२५। इत्याग्निमारुतसूक्तानि ।२६। इत्येतस्याह्नः सूक्तानि

।२७। तदुक्थ्यं[3] संतिष्ठते ।२८। तस्य साप्तिर्या प्रथमस्याह्नः[4] ।२९। अयं वै[5] लोकः प्रथमश्च्छन्दोमः ।३० ॥6॥

[1] L. adds पञ्चर्चं; P. adds पञ्चर्चं [2] IO. परावतन्देव [3] P. तदुक्थं [4] L. P. Here ends *Khaṇḍa* 10 [5] L. P. omit

अन्तरिक्षलोको द्वितीयः ।१। असौ लोक उत्तमः ।२। तस्मान्महद्वन्ति मध्यमेऽहन्त्सूक्तानि शस्यन्ते ।३। महद्धीदमन्तरिक्षम् ।४। अथो अभ्यारब्धवन्ति स्युः ।५। परमेवैतदहरभिवदति ।६। परमेवैतदहरभ्यारभ्य वसन्तीति ह स्माह कौषीतकिः ।७। अग्निं वो देवमग्निभिः सजोषा इत्याज्यम् ।८। यदा महः संवरणाद् व्यस्थादिति महद्वत् सदभ्यारब्धवत् ।९। [1–]त्रैष्टुभः प्रउगः[–1] ।१०। कुविदङ्ग नमसा ये वृधास इति वायव्यं वृद्धवत्[2] ।११। महद्वद्धचेतदहः[3] ।१२। अत एवोत्तरं तृचमैन्द्रवायवं यावत्तरस्तन्वो यावदोज इति ।१३। यावन्नरश्चक्षसा दीध्याना इत्यभ्यारब्धवत् ।१४। प्रति वां सूर उदिते सूक्तैरिति मैत्रावरुणम् ।१५। मित्रं हुवे वरुणं पूतदक्षमित्यभ्यारब्धवत्[4] ।१६। अप स्वसुरुषसो नग् जिहीत इत्याश्विनम् ।१७। अश्वामघा गोमघा वां हुवेमेत्यभ्यारब्धवत्[5] ।१८। अयं सोम इन्द्र तुभ्यं सुन्व इत्यैन्द्रम् ।१९। ब्रह्मन् वीर ब्रह्मकृतिं जुषाण इत्यभ्यारब्धवत् ।२०। प्र ब्रह्माणो अङ्गिरसो नक्षन्तेति वैश्वदेवम् ।२१। प्र क्रन्दनुर्नभन्यस्य वेत्वित्यभ्यारब्धवत् ।२२। उत स्या नः सरस्वती जुषाणेति सारस्वतम् ।२३। वर्ध शुभ्रे स्तुवते रासि वाजानिति वृद्धवत्[6] ।२४। महद्वद्धचेतदहः ।२५। राथन्तरं पृष्ठं बार्हतं शस्त्रम् ।२६। तन्मिथुनं प्रजात्यै रूपम्[7] ।२७ ॥7॥

[1–1] L. P. omit [2] L. P. महद्वद्वृद्धवत् [3] L. P. महद्वन्मह° [4] L. P. °मिति महद्वत् सदभ्या° [5] L. P. °मेति महद्वत् सदभ्या° [6] L. P. वृद्धवन्महद्वत् [7] L. P. Here ends *Khaṇḍa* 11

महाँ इन्द्रो नृवदा चर्षणिप्रा इति त्रैष्टुभानां प्रथमं मरुत्वतीयानाम् ।१। महद्वत् सदभ्यारब्धवत्[1] ।२। इमा उ त्वा पुरुतमस्य कारोरिति द्वितीयम् ।३। हव्यं वीर हव्या हवन्त इत्यभ्यारब्धवत्[2] ।४। क्व स्य वीरः को अपश्यदिन्द्रमिति तृतीयम् ।५। सुखरथमीयमानं हरिभ्यामित्यभ्यारब्धवत्[3] ।६। महश्चित् त्वमिन्द्र यत एतानिति चतुर्थम् ।७। महश्चिदसि त्यजसो वरूतेति महद्वत् सदभ्यारब्धवत् ।८। तमस्य द्यावापृथिवी सचेतसेति[4] पञ्चमम् ।९। यदैत् कृण्वानो महिमानमिन्द्रियमिति महद्वत् सदभ्यारब्धवत् ।१०। [5–]त्रैष्टुभजागते जागतं जगन्मध्यंदिनो ह्येष त्र्यहः[–5] ।११। त्वं महाँ इन्द्र तुभ्यं ह क्षा इति त्रैष्टुभानां प्रथमं निष्केवल्यानाम् ।१२। महद्वत् सदभ्यारब्धवत्[1] ।१३। त्वं महाँ इन्द्र यो ह शुष्मैरिति द्वितीयं महद्वत् ।१४। महद्वद्धचेतदहः[6] ।१५। अपूर्व्या पुरुतमान्यस्मा इति तृतीयम् ।१६। महे वीराय तवसे तुरायेति महद्वत् सदभ्यारब्धवत् ।१७। तां सु ते कीर्तिं मघवन् महित्वेति चतुर्थम् ।१८। महद्वत् सदभ्यारब्धवत् ।१९। इमां ते धियं प्र भरे महो महीमिति[4] पञ्चमम् ।२०। महद्वत् सदभ्यारब्धवत् ।२१। [5–]त्रैष्टुभजागते जागतं जगन्मध्यंदिनो ह्येष त्र्यहः[–5] ।२२। पञ्च पञ्च सूक्तानि निष्केवल्यमरुत्वतीययोः शस्यन्ते मध्यमे छन्दोमे ।२३। पशवो वै छन्दोमाः ।२४। पाङ्क्ताः पशवः ।२५। पशूनामेवाप्त्यै[7] ।२६। [5–]तानि दश संपद्यन्ते ।२७। दशदशिनी विराट् ।२८। श्रीर्विराळन्नाद्यम् ।२९। श्रियो विराजोऽन्नाद्यस्योपाप्त्यै[–5] ।३० ॥8॥



[1] L. P. महद्वद्धचेतदहः [2] L. P. इति महद्वत् सदभ्यारब्धवत् [3] L. P. °भ्यामिति महद्वत् सदभ्या° [4] L. P. add जागतं [5–5] L. P. omit [6] L. P. सदभ्यारब्धवत् [7] L. P. Here ends *Khaṇḍa* 12

हिरण्यपाणिमूतय इति सावित्रम् ।१। अपां नपातमवस [1–]इति महद्वत् सदभ्यारब्धवत्[–1] ।२। मही द्यौः पृथिवी च न इति द्यावापृथिवीयं महद्वत् ।३। महद्वद्धचेतदहः ।४। युवाना पितरा पुनरित्यार्भवम् ।५। इन्द्रेण च मरुत्वतादित्येभिश्च राजभिरित्यभ्यारब्धवत् ।६। देवानामिदवो महदिति[2] वैश्वदेवम् ।७। वामं नो अस्त्वर्यमन् वामं वरुण शंस्यमिति महद्वत् सदभ्यारब्धवत् ।८। इमा नु कं भुवना सीषधामेति द्विपदाः ।९। इन्द्रश्च विश्वे च देवा इत्यभ्यारब्धवत् ।१०। विश्वे देवा ऋतावृध इति वैश्वदेवं वृद्धवत्[3] ।११। महद्वद्धचेतदहः ।१२। गायत्रं गायत्रतृतीयसवनो ह्येष त्र्यहः ।१३। वैश्वानरो अजीजनदिति वैश्वानरीयम् ।१४। क्ष्मया वृधान ओजसेति वृद्धवत् ।१५। महद्वत् सदभ्यारब्धवत्[4] ।१६। कद्ध नूनं कधप्रिय इति मारुतमभ्यारब्धवत् ।१७। दूतं वो विश्ववेदसमिति जातवेदसीयम् ।१८। अग्ने मृळ महाँ असीति वा ।१९। अष्टर्चमष्टमस्याह्नः ।२०। पूर्वं तु स्थितम् ।२१। महाँ आरोधनं दिव इति महद्वत् सदभ्यारब्धवत्[4] ।२२। गायत्रं गायत्रतृतीयसवनो ह्येष त्र्यहः ।२३। इत्याग्निमारुतसूक्तानि ।२४। इत्येतस्याह्नः सूक्तानि ।२५। तदुक्थ्यं[5] संतिष्ठते ।२६। तस्य साप्तिर्या द्वितीयस्याह्नः[6] ।२७ ॥9॥

[1–1] L. P. इत्यभ्यारब्धवत् [2] L. P. add नवर्चं [3] L. P. वृद्धवन्महद्वत् [4] L. P. महद्वद्धचेतदहः [5] P. तदुक्थं [6] L. P. Here ends *Khaṇḍa* 13

अन्तो गतिर्नवममहः ।१। असौ द्यौरसौ लोकः ।२। तस्माद् गतवन्ति नवमेऽहन्त्सू-

क्तानि शस्यन्ते ।३। अगन्म महा नमसा यविष्ठं सोमस्य मा तवसं वक्ष्यग्न इत्येते उभे तदाज्यम् ।४। अगन्मेति गतवत् ।५। तदन्तरूपम् ।६। अन्तो नवममहः ।७। ऐतीव वा अन्तं गत्वा ।८। कद्रचङ् हि तत इयात् ।९। अस्थुरत्र धेनवः पिन्वमाना इति स्थितवत् ।१०। तदन्तरूपम् ।११। अन्तो नवममहः ।१२। तिष्ठतीव वा अन्तं गत्वा ।१३। कद्रचङ् हि तत इयात् ।१४। अगन्म महा नमसा यविष्ठमित्येतदेव तृचमाज्यं स्यादिति ह स्माह पैङ्ग्यः ।१५। अगन्मेति गतवत् ।१६। तदन्तरूपम् ।१७। अन्तो नवममहः ।१८। ऐतीव वा अन्तं गत्वा ।१९। कद्रचङ् हि तत इयात् ।२०। अष्टाचत्वारिंशं स्तोमं किंतृचं व्यश्नुवीतेति ह स्माह कौषीतकिः ।२१ ॥10॥

सोमस्य मा तवसं वक्ष्यग्न इत्येतदुपसंशंसेत्[1] ।१। तस्य तदेवान्तरूपं यद् भूतानुवादि प्राञ्चं यज्ञं चकृम दिवः शशासुरिति ।२। यदेतद् भूतमिवाभि ।३। अत्र [2-]न्वा अपि[-2] स्तोमो न व्याप्नव्य[3] इति ह स्माह पैङ्ग्यः ।४। यदृग्भिरेव[4] स्तोमो व्याप्यत[5] इति ।५। अक्षरैर्ह वा ऋक् स्तोमं व्यश्नुते ।६। अक्षरैर्ह पदैर्वा[6] निविद् वा पुरोरुग् वर्चम् ।७। व्याप्तो ह वा उ तत्र स्तोमो भवति यत्र निविद् वा पुरोरुग् वा शस्यते ।८। [7-]तस्माद् व्याप्यत[-7] एव ।९। तृचमाज्यं स्याद्[8] यददः पैङ्ग्यस्य वचसा[9] ।१०। उभे इति त्वेव स्थितम् ।११। एतेन ह वा[10] अह्ना[10] [11-]वसिष्ठश्च विश्वामित्रश्च[-11] समजानताम् ।१२। अभिसंजानते ह वा अस्मै स्वा श्रैष्ठ्याय य एवं वेद ।१३। तस्मादुभे एव स्याताम् ।१४। वासिष्ठं पूर्वं वैश्वामित्रमुत्तरम्[12] ।१५। [13-]त्रैष्टुभः प्रउगः[-13] ।१६ ॥11॥

[1] BM². °दुपशंसेत् [2-2] L. (var.) न्वाभि, न्वापि [3] L. P. व्याप्त; L. wrongly remarks that IO. reads तस्याप्तव्य (for न व्याप्नव्य) [4] L. P. यदृग्भि° [5] L. न व्याप्तव्य; P. न व्याप्त (for व्याप्यत); L. (var.) न व्याप्त, also as here [6] L. P. omit [7-7] L. P. तस्माद्वद; L. (var.) as here [8] L. P. स्यादिति [9] L. वचस; P. वर्चस; L. (var.) as here [10] L. P. omit [11-11] L. P. विश्वामित्रश्च वसिष्ठश्च [12] L. P. Here ends *Khaṇḍa* 14 [13-13] L. P. omit; L. (var.) as here

आ वायो भूष शुचिपा उप न इति वायव्यं चैन्द्रवायवं च ।१। आगतेति गतवत् ।२। तदन्तरूपम् ।३। अन्तो नवममहः ।४। ऐतीव वा अन्तं गत्वा ।५। कद्रचङ् हि तत इयात् ।६। प्र सोता जीरो अध्वरेष्वस्थादिति स्थितवत् ।७। तदन्तरूपम् ।८। अन्तो नवममहः ।९। तिष्ठतीव वा अन्तं गत्वा ।१०। कद्रचङ् हि तत इयात् ।११। दिवि क्षयन्ता रजसः पृथिव्यामिति[1] मैत्रावरुणम् ।१२। क्षयन्तेति क्षितवत् ।१३। तदन्तरूपम् ।१४। अन्तो



नवममहः ।१५। क्षियतीव वा अन्तं गत्वा ।१६। कद्रचङ् हि तत इयात् ।१७। आ विश्ववाराश्विना गतं न इत्याश्विनम् ।१८। [2-]प्र तत् स्थानमवाचि वां पृथिव्यामिति स्थितवत् ।१९। तदन्तरूपम् ।२०। अन्तो नवममहः ।२१। तिष्ठतीव[-2] वा अन्तं गत्वा ।२२। कद्रचङ् हि तत इयात् ।२३। इन्द्रं नरो नेमधिता हवन्त इत्यैन्द्रम् ।२४। यत् पार्या युनजते धियस्ता इति पार्याः परार्ध्याः ।२५। तदन्तरूपम् ।२६। अन्तो नवममहः ।२७। अन्तेऽन्तं दधाति ।२८। ऊर्ध्वो अग्निः सुमतिं वस्वो अश्रेदिति वैश्वदेवम् ।२९। अश्रेदिति श्रितवत् ।३०। तदन्तरूपम् ।३१। अन्तो नवममहः ।३२। श्रियतीव वा अन्तं गत्वा ।३३। कद्रचङ् हि तत इयात् ।३४। प्र क्षोदसा धायसा सस्र एषेति सारस्वतम् ।३५। प्रबाबधानेति निनर्तिः[3] ।३६। अन्तो नवममहः ।३७। नीव वा अन्तं गत्वा नृत्यति ।३८। कद्रचङ् हि तत इयात् ।३९। एते वा उ वासिष्ठास्तृचक्लृप्तास्त्रैष्टुभाः[4] प्रउगाः ।४०। प्रजापतिर्वै वसिष्ठः ।४१। स तन्ता यज्ञस्य ।४२। स पुनस्ततावयातयामा भवति ।४३। प्रजापतावेव तत् सर्वान् कामानृध्नुवन्ति ।४४। बृहत्पृष्ठं राथन्तरं शस्त्रम् ।४५। तन्मिथुनं प्रजात्यै रूपम्[5] ।४६ ॥12॥

[1] ER. पृथिव्येति [2-2] ER. आ गतेति गतवत् । तदन्तरूपम् । अन्तो नवममहः । ऐतीव वा [3] L. P. निनृत्तिः [4] L. P. त्रैष्टुभास्तृचक्लृप्ता वासिष्ठाः [5] L. P. Here ends *Khaṇḍa* 15

त्र्यर्यमा मनुषो देवतातेति त्रैष्टुभानां प्रथमं मरुत्वतीयानाम् ।१। त्रीति तत् तृतीयस्याह्नो रूपम् ।२। इन्द्रो रथाय प्रवतं कृणोतीति द्वितीयम् ।३। यमध्यस्थान्मघवा वाजयन्तमित्यध्यस्थादिति स्थितवत् ।४। तदन्तरूपम् ।५। अन्तो नवममहः ।६। तिष्ठतीव वा अन्तं गत्वा ।७। कद्रचङ् हि तत इयात् ।८। तिष्ठा हरी रथ आ युज्यमानेति तृतीयम् ।९। तिष्ठेति स्थितवत् ।१०। तदन्तरूपम् ।११। अन्तो नवममहः ।१२। तिष्ठतीव वा अन्तं गत्वा ।१३। कद्रचङ् हि तत इयात् ।१४। गायत् साम नभन्यं यथा वेरिति चतुर्थम् ।१५। सामेति तदमुष्य लोकस्य रूपम् ।१६। प्र मन्दिने पितुमदर्चता वच इति[1] पञ्चमम् ।१७। तस्य तदेवान्तरूपं यत् सोदर्कम् ।१८। [2-]त्रैष्टुभजागते जागतं जगन्मध्यंदिनो ह्येष त्र्यहः[-2] ।१९। आ सत्यो यातु मघवाँ ऋजीषीति त्रैष्टुभानां प्रथमं निष्केवल्यानाम् ।२०। अव स्य [3-]शूराध्वनो नान्त इति[-3] ।२१। तदन्तरूपम्[4] ।२२। अन्तो नवममहः ।२३। अवस्यतीव[5] वा अन्तं गत्वा[6] ।२४। कद्रचङ् हि तत इयात् ।२५। अस्मा इदु प्र तवसे तुरायेति द्वितीयम् ।२६। अस्मा अस्मा इति सप्रभृति ।२७। यथा वै सोदर्कमेवं सप्रभृत्यन्तरूपम् ।२८। द्यौर्न य इन्द्राभि भूमार्य इति तृतीयम् ।२९। द्यौरिति तदमुष्य लोकस्य रूपम् ।३०। तत्

त इन्द्रियं परमं पराचैरिति चतुर्थम् ।३१। परमं पराचैरिति निनर्तिः[7] ।३२। अन्तो नवममहः ।३३। नीव वा अन्तं गत्वा नृत्यति ।३४। कद्रचङ् हि तत इयात् ।३५। अहं भुवं वसुनः पूर्व्यस्पतिर्विश्वजिते धनजिते स्वर्जित इति द्वे[8] ।३६। अहमहमिति सप्रभृति ।३७। यथा वै सोदर्कमेवं सप्रभृत्यन्तरूपम् ।३८। जिते जित इति निनर्तिः[7] ।३९। अन्तो नवममहः ।४०। नीव वा अन्तं गत्वा नृत्यति ।४१। कद्रचङ् हि तत इयात् ।४२। [2–]त्रैष्टुभजागते जागतं जगन्मध्यंदिनो ह्येष त्र्यहः[–2] ।४३। पञ्च[9] सूक्तानि मरुत्वतीये शस्यन्त उत्तमे छन्दोमे ।४४। पशवो वै छन्दोमाः ।४५। पाङ्क्ताः पशवः ।४६। पशूनामेवाप्त्यै ।४७। षळन्ततो निष्केवल्ये ।४८। षड् वा ऋतवः संवत्सरः ।४९। संवत्सरस्यैवाप्त्यै[10] ।५०। [2–]तान्येकादश संपद्यन्ते ।५१। एकादशाक्षरा त्रिष्टुप् ।५२। त्रैष्टुभाः पशवः पशूनामेवाप्त्यै[–2] ।५३ ।।13।।

[1] L. P. add जागतं  [2–2] L. P. omit  [3–3] L. P. शूरेति निनृत्तिः  [4] L. P. omit
[5] L. P. नीव  [6] L. P. add नृत्यति  [7] L. P. निनृत्तिः  [8] L. P. add जागते
[9] P. पञ्च पञ्च  [10] L. P. Here ends *Khaṇḍa* 16

अभि त्वा देव सवितरिति सावित्रम् ।१। अभीत्यसौ[1] लोकः ।२। तदमुष्य लोकस्य रूपम् ।३। प्र वां महि द्यवी अभीति द्यावापृथिवीयम् ।४। महि द्यवी अभीति [2–]तदमुष्य लोकस्य रूपम्[–2] ।५। इन्द्र इषे ददातु न इत्येका ते नो रत्नानि धत्तनेति[3] द्वे [4–]तत् तृचमार्भवम्[–4] ।६। एकमेकं सुशस्तिभिरित्येकमेकमिति निनर्तिः[5] ।७। अन्तो नवममहः ।८। नीव वा अन्तं गत्वा नृत्यति ।९। कद्रचङ् हि तत इयात् ।१०। अथ वैश्वदेवं मनुः ।११। सर्वं आयुर्वै मनुः ।१२। आयुरेव तद् यज्ञे च यजमानेषु च दधाति[6] ।१३। विश्वे देवास आ गतेति वैश्वदेवं भारद्वाजम्[7] ।१४। आ गतेति गतवत् ।१५। तदन्तरूपम् ।१६। अन्तो नवममहः ।१७। ऐतीव वा अन्तं गत्वा ।१८। कद्रचङ् हि तत इयात् ।१९। गायत्रं गायत्रतृतीयसवनो ह्येष त्र्यहः ।२०। दिवि पृष्टो[8] अरोचतेति वैश्वानरीयम् ।२१। दिवीति तदमुष्य लोकस्य रूपम् ।२२। मरुतो यस्य हि क्षय इति मारुतम् ।२३। क्षय इति क्षितवत् ।२४। तदन्तरूपम् ।२५। अन्तो नवममहः ।२६। क्षियतीव वा अन्तं गत्वा ।२७। कद्रचङ् हि तत इयात् ।२८। अग्निर्होता पुरोहित इति जातवेदसीयम् ।२९। क्षयं पावकशोचिष इति क्षयमिति[7] क्षितवत् ।३०। तदन्तरूपम् ।३१। अन्तो नवममहः ।३२। क्षियतीव वा अन्तं गत्वा[9] ।३३। कद्रचङ् हि तत इयात् ।३४। गायत्रं गायत्रतृतीयसवनो ह्येष त्र्यहः ।३५। इत्याग्निमारुतसूक्तानि ।३६। इत्येतस्याह्नः सूक्तानि ।३७। तदुक्थ्यं[10] संतिष्ठते ।३८।



तस्य साम्निर्या तृतीयस्याह्नः ।३९। अन्वहं द्विपदाः शस्यन्ते[11] ।४०। पशवो वै छन्दोमाः ।४१। यजमानच्छन्दसं द्विपदाः ।४२। अधिष्ठायामेव तत् पशूनां यजमानान् दधाति ।४३। अधीव वै पशून् पुरुषस्तिष्ठत्यधीव वै पशून्[12] पुरुषस्तिष्ठति[13] ।४४ ।।14।।

[1] L. P. अभीत्येव वा असौ  [2–2] L. P. निनृत्तिरन्तो नवममहर्नीव वा अन्तं गत्वा नृत्यति कद्रचङ् हि तत इयात्  [3] L. दत्त०  [4–4] L. P. इत्यार्भवं  [5] L. P. निनृत्तिः  [6] L. P. add अत्रैव द्विपदास्तासामुक्तं ब्राह्मणम्  [7] L. P. omit  [8] L. P. पृष्ठो  [9] IO. adds नृत्यति  [10] P. तदुक्थं  [11]. L. P. add सर्वेषु छन्दोमेषु  [12] L. P. omit अधीव वै पशून्
[13] L. P. Here ends *Khaṇḍa* 17

## इति तृतीयदशके षष्ठोऽध्यायः

यद् दिव्युपरि तद् दशममहरिति ह स्माह कौषीतकिः ।१। तस्मात्तदविवाक्यं भवति ।२। न हि तदद्धा वेद कश्चन ।३। नेदविद्वान् विब्रवाणीति[1] ।४। मितमेतद् देवकर्म यद् दशममहरनुष्टुबेव ।५। स यो व्याह ।६। सोऽतिरेचयति ।७। ईश्वरो विवक्तारं श्रेषोऽन्वेतोः ।८। तदु वा आहुर्व्येव ब्रूयात् ।९। नन्दति ह वै यज्ञो विदुषागच्छता ।१०। यन्मेऽसमृद्धं भविष्यत्ययं मे तत् समर्धयिष्यतीति ।११। यदि कश्चित् प्रमत्त उपहन्यात् ।१२। यस्तदधीयात् ।१३। [2-]यस्तं तत्र ब्रूयात्[-2] ।१४। स तं देशं पार्श्वतः स्वाध्यायमधीयीत ।१५। अपि वा गृहपतिर्वर्त्विजां वैकः पर्यवसर्पेत् ।१६। स तं देशं पार्श्वतः स्वाध्यायं शंसेत् ।१७ ॥1॥

[1] L. P. निर्ब्रवाणीति [2-2] L. P. omit

यदि तथा न मन्येत ।१। तं[1] प्रत्येव विब्रूयात् ।२। उत्सृज्यते दशमेऽहन्यनुष्टुप् ।३। वागनुष्टुप् ।४। सैषा [2-]वाग् व्रतदोहुषी[-2] क्रूरवहेव[3] भवति ।५। तस्मादुत्सृज्यते ।६। नेद् वाचमासीदामेति ।७। अथेतराणि[4] छन्दांस्यनुष्टुभमभिसंपादयति[5] ।८। तदेतन्नाहैवाभिमृशे[6] शूद्राम् ।९। नो एनां प्रसिसृक्षामि[7] ।१०। नो त्वेवान्यत्र यामकपौंश्चल्वायनं[8] मेऽस्तीति ।११। अनुष्टुब्भ्येषा दशमेऽहन् परिगीता ।१२। तदाहुर्नानुष्टुभ आयतनं रिञ्च्यात् ।१३। विराजस्तत्रानुब्रूयात् ।१४। समानं वा एतच्छन्दो यद् विराट् चानुष्टुप्[9] च ।१५। न ह्येकेनाक्षरेणान्यच्छन्दो भवति ।१६। नो द्वाभ्यामिति ।१७। तयोर्वा एतयोस्तृचयोः षळक्षराण्यभ्युद्यन्ति ।१८। अग्निं नरो दीधितिभिररण्योरित्यग्निष्टोमसाम्नः[10] स्तोत्रियानुरूपयोः षट् ।१९। तानि द्वादशाक्षराणि ।२० ॥2॥

[1] L. P. सं [2-2] L. P. वाक्प्रतदोहुषी; L. wrongly remarks that IO. reads वाग्वृतदोहुषी [3] L. (var.) क्रूरवेह्, क्रूरवेव; P. क्रूरवैव [4] L. P. अथो सर्वाण्येवैतत्; L. (var.) as here [5] L. °यन्ति [6] L. P. तदेनां नाहैं°; IO. तन्नाहै° [7] L. प्रसिसृक्षाणि; P. प्रससृक्षाणि [8] L. P. यामकि पुंश्चल्या अयनं; L. (var.) यामक°; BM². °पौंश्चल्या° [9] P. वा° [10] L. P. omit अग्निं नरो दीधितिभिररण्योरिति

होता प्रातरनुवाके संपादयेत् ।१। नाद्रियेतात्रैव संपन्नम् ।२। उष्णिगुदैतीति[1] मेनिमहे ।३। गायत्री वा ।४। तां प्रातरनुवाके संपादयेत् ।५। नाद्रियेतात्रैव संपन्नम्[2] ।६। अग्ने तमद्याश्वं न स्तोमैरित्याज्यम् ।७। तदेतत् सृष्टं दशमायाह्ने न संपादयेत् ।८। नाद्रि-



येतात्रैव संपन्नम् ।९। माधुच्छन्दसः प्रउगस्तस्योक्तं ब्राह्मणम् ।१०। त्रिकद्रुकेषु महिषो यवाशिरं तुविशुष्म इत्यतिच्छन्दसा मरुत्वतीयं प्रतिपद्यते ।११। सा संपन्ना चतुःषष्ट्यक्षरा ।१२। ते द्वे अनुष्टुभौ संपद्येते ।१३। [3-]तत् संपन्नम् ।१४। पिन्वन्त्यपीयया द्वौ प्रगाथौ संशंसति[-3] बृहदिन्द्राय गायत प्र व इन्द्राय बृहत इति[4] ।१५। तत् संपन्नम् ।१६। ऐकाहिकं[5] मरुत्वतीयम् ।१७। प्रतिष्ठा वा एकाहः प्रतिष्ठित्या एव ।१८ ॥3॥

[1] L. P. IO. °गुदेतीति [2] L. P. Here ends *Khaṇḍa* 1 [3-3] L. P. omit [4] L. P. add सूक्तात् पूर्वौ द्वौ प्रगाथौ पिन्वन्त्यपीयया संशंसतीति [5] L. P. जनिष्ठा उग्रः सहसे तुरायेत्यैकाहिकं

कया नश्चित्र आ भुवत् कया त्वं न ऊत्येति वामदेव्यस्य योनौ रथन्तरमूळ्हं भवत्याग्नेयं सामैन्द्रीषु ।१। तन्मिथुनं प्रजात्यै रूपम् ।२। यावन्तः प्रगाथास्तावन्त्यौष्णिहानि तृचानि ।३। धाय्यामन्या द्विपदा भजते ।४। सप्तदशीमन्या सूक्तस्य ।५। तत् संपन्नम् ।६। ऐकाहिकं[1] निष्केवल्यम् ।७। प्रतिष्ठा वा एकाहः प्रतिष्ठा दशममहः ।८। प्रतिष्ठानीयं वै छन्दो द्विपदे प्रतिष्ठित्या एव ।९। अभि त्यं देवं सवितारमोण्योः कविक्रतुमित्यतिच्छन्दसा वैश्वदेवं प्रतिपद्यते ।१०। सा संपन्ना चतुःषष्ट्यक्षरा ।११। ते द्वे अनुष्टुभौ संपद्येते ।१२। [2-]तत् संपन्नम्[-2] ।१३। अभिवाननुचरस्तस्योक्तं ब्राह्मणम् ।१४। [2-]अथ नित्यमेवैकाहिकं तृतीयसवनम् ।१५। प्रतिष्ठा वा एकाहः प्रतिष्ठित्या एव[-2] ।१६। तत्र पुरस्तादानोभद्रीयस्य प्रशुक्रीयं शंसति ।१७। प्रतिष्ठा वा एकाहः प्रतिष्ठा दशममहः ।१८। प्रतिष्ठानीयं वै छन्दो द्विपदाः प्रतिष्ठित्या एव ।१९ ॥4॥

[1] L. P. इन्द्रस्य नु वीर्याणि प्र वोचमित्यैकाहिकं [2-2] L. P. omit

विराट्सु वामदेव्यमग्निष्टोमसाम भवति ।१। श्रीर्विराळन्नाद्यम् ।२। श्रियो विराजोऽन्नाद्यस्योपाप्त्यै ।३। अथो शान्तिर्वै भेषजं वामदेव्यम् ।४। शान्तिरेवैषा भेषजमन्ततो यज्ञे क्रियते[1] ।५। अथ यत् समूळ्हस्यातिरिक्तोक्थमुपयन्ति ।६। तेन हातिरिक्तोक्थमाप्नुवन्ति[2] ।७। अथैष दशमस्याह्नो दोहः ।८। यथा सहस्रं च पञ्चदश चानुष्टुभः स्युः ।९। तथैतदहः संपादयेत् ।१०। पञ्चदशोद्धृत्य शतस्य शतस्य चतस्रश्चतस्र उद्धरति ।११। ताश्चत्वारिंशत् ।१२। पूर्वाः पञ्चदश ।१३। ताः पञ्चपञ्चाशदुद्धृताः ।१४। अथेतरे त्रिंशद्द्वात्रिंशद्वर्गाः[3] ।१५। अथैषा[4] पद्यानुष्टुप् ।१६। गायत्र्यै चोष्णिहश्च षट् पदानि विराजस्त्रीणि तानि नव ।१७। बृहत्यै चत्वारि तानि त्रयोदश ।१८। पङ्क्तेः पञ्च तान्यष्टादश ।१९। त्रिष्टुभश्चत्वारि तानि द्वाविंशतिः ।२०। जगत्यै चातिच्छन्दसश्चाष्टौ

तानि त्रिंशत् ।२१। द्विपदायै द्वे तानि द्वात्रिंशत् ।२२। इत्येषा[5] पद्यानुष्टुबेकत्रिंशी[6] भवति ।२३ ॥5॥

[1] L. P. Here ends *Khaṇḍa* 2 [2] L. P. omit ह [3] P. द्वात्रिंशद्द्वा° [4] L. P. add स्तोमाक्षरानुष्टुबष्टाक्षरा गायत्री चतुर्विंशः स्तोम इत्येषा स्तोमाक्षरानुष्टुब्द्वात्रिंशी भवत्यथैषा [5] EM. (var.) एषा [6] L. P. °ष्टुब्द्वात्रिंशी

अथैषा देवत्यानुष्टुप्[1] ।१। अष्टौ वसव एकादश रुद्रा द्वादशादित्या इन्द्रो द्वात्रिंश[2] इत्येषा देवत्यानुष्टुप्[1] द्वात्रिंशी भवति ।२। अथ याः पञ्चपञ्चाशदुद्धृताः ।३। चतुश्चत्वारिंशत् ताः पङ्क्तयः ।४। ततो याश्चत्वारिंशत् तदूधः ।५। अथ याश्चतस्रोऽतियन्ति ते स्तनाः ।६। सैषा स्तोमाक्षरानुष्टुबेतेनोधसैतैः स्तनैरेतमिन्द्रस्यात्मानं व्रत्यमहरभिक्षरति[3] ।७। [4-]सर्वेणान्नाद्येन सर्वैं रसैः सर्वैः कामैः सर्वेणामृतत्वेनाभिक्षरति[-4] ।८। एतस्या उ एव विक्षरेण[5] छन्दोमाः स्तोमतश्च शस्त्रतश्च वर्धन्ते ।९। यदु[6] वै वेद तन्मयः संभवति ।१०। स[7] य एवंविदस्यायुषः परस्तादेतमिन्द्रस्यात्मानं व्रत्यमहरभिसंभवति ।११। तमेषा स्तोमाक्षरानुष्टुबेतेनोधसैतैः स्तनैः [8-]सर्वेणान्नाद्येन सर्वैं रसैः सर्वैः कामैः[-8] सर्वेणामृतत्वेनाभिक्षरति ।१२। य एवं संपन्नं दशममहः शंसति ।१३। तस्मादेवं संपन्नं दशममहः शंसेदिति[9] ।१४ ॥6॥

[1] L. P. देवक्या° [2] P. °त्रिंशद् [3] P. प्रत्य° [4–4] L. P. omit [5] L. P. व्यक्ष° [6] L. P. य उ [7] L. P. omit [8–8] L. P. सर्वैं रसैः सर्वैः कामैः सर्वेणान्नाद्येन [9] L. P. Here ends *Khaṇḍa* 3

अथ यदतिरिक्तोक्थमुपयन्ति[1] ।१। मन एव तत् प्रीणन्ति ।२। तत् सर्वयज्ञैरनुशंसन्ति ।३। एषा हि मनसो मात्रा ।४। संस्थितेऽहनि[2] पुरा पत्नीसंयाजेभ्य एतस्मिन् काले संप्रसर्पन्ति ।५। अयज्ञिया वै पत्न्यो बहिर्वेदि हि ता इति वदन्तः ।६। संस्थितेषु पत्नीसंयाजेष्विति त्वेव स्थितम् ।७। अत्राल्पको भ्रातृव्यलोकः परिशिष्टो भवतीति ।८। ते संप्रसृप्य सार्पराज्ञ्या[3] ऋक्षु स्तुवते ।९। इयं वै सार्पराज्ञी ।१०। इयं हि सर्पतो राज्ञी ।११। अथो वाग् वै सार्पराज्ञी ।१२। वाग्घि सर्पतो राज्ञी ।१३। अथो गौर्वै सार्पराज्ञी ।१४। गौर्हि सर्पतो राज्ञी ।१५। आयं गौः पृश्निरक्रमीदित्येतं तृचं नान्तरियात् स्तोत्रियस्यानन्तरित्यै ।१६। अस्मासु नृम्णं धा इति ।१७। अन्नं वै नृम्णम् ।१८। अन्नमेव तद् यज्ञे च यजमानेषु च दधाति ।१९ ॥7॥

[1] L. P. यद् व्यूढस्याति° [2] L. P. °ते दशमेऽहनि [3] L. P. सर्पराज्ञ्य



[1-]आत्मानं पूर्वमाह ।१। तथास्यात्मानन्तरिता भवति[-1] ।२। वातापेर्हवनश्रुत[2] इति ।३। इन्द्रो वै वातापिः ।४। स हि वातमाप्त्वा[3] शरीराण्यरहन्[4] ।५। प्रतिपरैत्यध्वर्युः ।६। सोऽनिरुक्ते गार्हपत्ये प्राजापत्ये द्वे आहुती जुहोति ।७। प्रजापतिर्वै गार्हपत्यः ।८। [1-]अनिरुक्त उ वै प्रजापतिः[-1] ।९। आहुतिसंस्थे उ वै स्तुतशस्त्रे ।१०। समाप्तं स्तोत्रं समाप्तं शस्त्रं समाप्तं ब्रह्मोद्यम्[5] ।११। [6-]अतो न्वेवापि[-6] कामं यजेयुः ।१२। अथ भक्षयेयुः ।१३। अयं वै वेनः प्रजापतेः प्रत्यक्षं तन्वस्ता होता वदेत्[7] ।१४ ॥8॥

[1–1] L. P. omit [2] L. (var.), P. वातापेह° [3] L. (var.) वातमात्मा, वाचमात्मा; P. वातमात्मा [4] L. P. शरीराण्यर्हन् [5] L. P. ब्रह्मवद्यम् [6–6] L. P. इत्यथो अन्ये वापि; L. (var.) as here [7] L. P. Here ends *Khaṇḍa* 4

अन्नादी चान्नपत्नी च ।१। इयं वा अन्नाद्यसावन्नपत्नी ।२। भद्रा च कल्याणी च ।३। भद्रा तत् सोमः ।४। कल्याणी तत् पशवः ।५। अनिलया चापभया च ।६। अनिलया तद् वायुः ।७। न ह्येष इलयति ।८। अपभया तन्मृत्युः ।९। न ह्येष बिभेति ।१०। अनाप्ता चानाप्या च ।११। इयं [1-]वा अनाप्ता[-1] ।१२। असौ द्यौरनाप्या ।१३। अनाधृष्टा चानाधृष्या च ।१४। अयं वा अग्निरनाधृष्टा[2] ।१५। असावादित्योऽनाधृष्या[3] ।१६। अपूर्वा चाभ्रातृव्या च ।१७। अपूर्वा तन्मनः ।१८। अभ्रातृव्या तत् संवत्सरः ।१९। सोऽसावेव[4] गृहपतिर्योऽसौ तपति ।२०। एष हि गृहाणां पतिः ।२१। तस्यर्तव एव गृहाः ।२२। एष पतिः ।२३। एष उ[5] देवोऽपहतपाप्मा ।२४। उदाद्रवत्यध्वर्युः[6] ।२५। अपिदधति[7] सदसो [8-]द्वारौ शालायाश्च[-8] ।२६ ॥9॥

[1–1] L. P. वै पृथिव्यनाप्ता [2] L. P. °धृष्ट [3] L. P. °धृष्यो [4] L. P. अथासा° [5] L. P. add एव [6] L. उदगद्रव°; P. उदग्रव° [7] L. wrongly reports that IO. reads °दधाति [8–8] L. P. सदसो द्वारावेवं शालायाः; L. (var.) as here; L. P. Here ends *Khaṇḍa* 5

औदुम्बरीमन्वारभन्ते ।१। ऊर्ग् वा अन्नाद्यमुदुम्बरः ।२। ऊर्जोऽन्नाद्यस्योपाप्त्यै ।३। उत्तमौ पाणी होता कुर्वीत ।४। उत्तमोऽसानीति ।५। उत्तमो हैव भवति ।६। [1-]ते वाचंयमा आसत[-1] आ नक्षत्राणां दर्शनात् ।७। वाचं ह वा एतद् भूतान्याप्याययन्ति[2] यद् वाचंयमानि[3] शेरते[4] ।८। आपीनां वाचमव्यासिक्तामन्तत[5] ऋध्नवामेति ।९। [6-]दृश्यमानेषु नक्षत्रेष्वदीक्षितो बहिस्तिष्ठन्नाह दीक्षिता[7] वेदेति[8] ।१०। अपोर्णुवन्ति सदसो द्वारौ ।११।

एवं शालायै ।१२। ते यथाप्रपन्नमुपनिष्क्रम्य[-6] मार्जालीयन्यन्तेन नक्षत्रेषु चक्षुर्विसृजन्ते [6-]तच्चक्षुर्देवहितं शुक्रमुच्चरदिति[-6] ।१३। ज्योतिर्वै नक्षत्राणि ।१४। ज्योतिरेव तदात्मन् दधते[9] ।१५। ते परया द्वारा हविर्धाने प्रपद्यन्ते ।१६। अथाध्वर्युरुत्तरस्य हविर्धानस्य कूबरीमभिपद्याह सत्रस्यर्धिं गायेति ।१७। गायति सत्रस्यर्धिम् ।१८। तत् सत्रस्यर्धिमाप्नुवन्ति ।१९। सर्वे साम्नो निधनमुपयन्ति ।२०। प्रतिष्ठा वै निधनं प्रतिष्ठित्या एव ।२१। त [10-]उत्तरेण हविर्धाने गच्छन्त्यधोक्षं वोत्तरस्यैन्द्रीमतिच्छन्दसं[-10] जपन्तः ।२२। अतिच्छन्दसैव तदधोक्षं[11] पाप्मानमपघ्नते ।२३ ॥10॥

[1-1] L. P. वाग्यताः संमील्यासत [2] L. P. omit भूतानि [3] L. P. वाचंयमा [4] L. P. आसत [5] L. P. वाचमभ्या° [6-6] L. P. omit [7] BM¹. दीक्षितो [8] BM¹. वेदयेति [9] P. धत्ते [10-10] L. P. उत्तरस्य हविर्धानस्याधोक्षं सर्पन्त्यैन्द्रीं [11] L. P. add यजमानाः

ते न्वा[1] उ वयमुत्तरेणैव हविर्धाने[2] परीमेति[3] ह स्माह कौषीतकिः ।१। यज्ञस्यानुसंचरं सप्तर्षिभ्योऽनन्तर्हिता[4] इति ।२। तेऽग्रेण हविर्धाने समुपविश्य कामं[5] ध्यायन्ति[6] [7-]यं यमिच्छन्ति[-7] ।३। स उ हैभ्यः कामः समृध्यते ।४। [8-]अथ य उ[-8] बहुकामा भवन्ति ।५। भूर्भुवः स्वरित्येतास्ते व्याहृतीर्जपन्ति[9] ।६। ते प्राञ्च उदञ्च उत्क्रम्य वाचं निह्वयन्ते[10] ।७। नेद् वाक् पराच्यसदिति ।८। [11-]वाचमेव तदात्मन् दधते[-11] ।९। सुब्रह्मण्यया[12] वाचं विसृजन्ते ।१०। ब्रह्म वै सुब्रह्मण्या ।११। ब्रह्मणैव तद् वाचं विसृजन्ते ।१२। त आग्नीध्रे[13] सह राज्ञा संविशन्ते ।१३। तद् यथा राजानं वा राजमात्रं वा श्रान्तं वेश्म प्रपादयेयुः ।१४। एवमेवैतत् सोमं राजानमहरहर्हविर्धानाभ्यामुपावहृत्याग्नीध्रं[14] प्रपादयन्ति ।१५। त आग्नीध्रे[13] सह राज्ञा संविशन्ते[15] ।१६। अथ यत् समूळ्हं दशरात्रमुपयन्ति ।१७। सर्वेषामेव कामानामाप्त्यै ।१८। अथ यद् व्यूळ्हमुपयन्ति ।१९। सर्वेषामेव छन्दसामाप्त्यै ।२०। अथ यद् व्यूळ्हसमूळ्हा उपयन्ति ।२१। दशरात्रस्यैव नानात्वाय ।२२। समूळ्ह उ हैवाग्र आस ।२३। तानि छन्दांस्यन्योन्यस्य स्थानमभिदध्युः ।२४। सर्वाणि प्रथमानि स्याम सर्वाणि मध्यमानि सर्वाण्युत्तमानीति[16] ।२५। अथो सर्वाण्येवैतच्छन्दांसि सर्वसवनभाञ्जि कुर्वन्ति[17] ।२६ ॥11॥

[1] P. नु वा [2] L. P. omit; L. (var.) as here [3] L. P. परीम इति [4] L. P. सप्त ऋषिभ्यो° [5] L. P. कामान् [6] L. P. ध्यायन्ते [7-7] L. P. यत्कामा भवन्त्ययं नः कामः समृद्ध्यतामिति [8-8] L. P. ये [9] L. P. °र्जपेयुः [10] L. विह्वयन्ते; P. विह्वयन्ते [11-11] L. P. omit [12] L. P. °ण्यायै [13] L. P. आग्नीध्रीये [14] L. °वहुत्या° [15] L. P. Here ends *Khaṇḍa* 6 [16] L. P. omit इति [17] L. P. करोति



गायत्रप्रातःसवनः प्रथमस्त्र्यहस्त्रिष्टुम्मध्यंदिनो जगत्तृतीयसवनः ।१। जगत्प्रातःसवनो द्वितीयस्त्र्यहो गायत्रमध्यंदिनस्त्रिष्टुप्तृतीयसवनः ।२। त्रिष्टुप्प्रातःसवनस्तृतीयस्त्र्यहो जगन्मध्यंदिनो गायत्रतृतीयसवनः ।३। गायत्रप्रातःसवनं दशममहः ।४। तत् समानाच्छन्दसः समानं छन्द उपसंगच्छन्ते ।५। अथ यद् दशममहरनुष्टुभमभिसंपादयति[1] ।६। वाग् वा एतदहः ।७। वागनुष्टुप् ।८। वाच्येव तद् वाचं प्रतिष्ठापयन्ति ।९। तेऽमृतत्वमाप्नुवन्ति ये दशममहरुपयन्ति ये दशममहरुपयन्ति[2] ।१० ॥12॥

[1] L. P. °यन्ति [2] L. P. Here ends *Khaṇḍa* 7

## इति तृतीयदशके सप्तमोऽध्यायः

प्रजापतिर्ह यज्ञं ससृजे ।१। तेन ह[1] सृष्टेन देवा ईजिरे ।२। तेन हेष्ट्वा सर्वान् कामानापुः ।३। तस्य हेतराध्यमपनिदधुः[2] ।४। य एते प्रैषाश्च निगदाश्च ।५। अथेतरेण यज्ञेन ऋषय ईजिरे ।६। ते [3–]ह विजज्ञुः[–3] ।७। असर्वेण ह वै यज्ञेन यजामहै[4] न वै सर्वान् कामानाप्नुम इति ।८। ते ह श्रेमुः ।९। त एते[5] प्रैषाँश्च[6] निगदाँश्च ददृशुः ।१०। तेन ह[7] सप्रैषेण सनिगदेनेष्ट्वा सर्वान् कामानापुः ।११। एतावते[8] ह वा उ प्रैषाश्च निगदाश्च ।१२। यदृग्भिर्यज्ञस्यानाप्तं तदेभिः सर्वमाप्स्याम इति ।१३ ॥1॥

[1] ER. omits [2] L. P. °मुप° [3–3] L. P. हविर्जज्ञुः [4] L. P. °महे [5] L. P. एतान् [6] BM¹. omits च [7] BM². हि [8] L. P. एते ह ते; L. (var.) as here

तानेतान् प्रैषानुप्रैषान्[1] विश्वामित्रो ददर्श ।१। अथो पुरोळाशप्रैषान् ।२। अथेतर ऋषय इतरान् ।३। तदाहुः कस्मान्मैत्रावरुण एव सर्वेभ्यः प्रेष्यतीति ।४। एता ह वै देवताः प्रैषाणामाजिमीयुः ।५। तन्मित्रावरुणा[2] उज्जिग्यतुः ।६। तस्मान्मैत्रावरुण एव सर्वेभ्यः प्रेष्यति ।७। स वै तिष्ठन् प्रेष्यति ।८। तिष्ठन् वै वीर्यवत्तमः ।९। तिष्ठन्नाश्रुतवदनतमः[3] ।१०। वीर्यवतीमाश्रुतां देवेषु वाचमुद्यासमिति[4] ।११। कुवक्र[5] इव प्रणतोऽनुब्रूयात् ।१२। तथा ह वर्षुकः पर्जन्यो भवतीति ह स्माह कौषीतकिः ।१३। तद्ध स्म वै पुरासुररक्षसानि[6] हवींषि विमथ्नते[7] ।१४। तत एता वामदेवोऽभिरूपा अपश्यदग्निर्होता नो अध्वर इति ।१५। ताभिर्हाग्निं परिनिण्युः[8] ।१६। ततो वै तानि रक्षांसि नाष्ट्रा अपजघ्निरे[9] ।१७। जुषस्व सप्रथस्तममिति जुष्टवतीमभिरूपामन्वाह ।१८। जुष्टवतीमभिरूपां देवेषु वाचमुद्यासमिति ।१९। इमं नो यज्ञममृतेषु धेहीति[10] ।२०। स्तोकानेवैताभिरग्नये स्वदयति ।२१। एता ह वा उ तेषां पुरोनुवाक्या एता याज्याः ।२२। तस्मादभिरूपा भवन्ति ।२३ ॥2॥

[1] IO. प्रैषान् [2] L. तां मि°; P. तान् मि° [3] L. तिष्ठन् वा उ श्रुत°; P. तिष्ठन् वा उ श्रित° [4] L. P. Here ends *Khaṇḍa* 1 [5] P. ॐ वक्र [6] L. P. °रक्षांसि [7] L. P. विबध्नते; L. (var.) विमन्थते, and as here [8] L. P. परिणिन्युः; L. (var.) °णिण्युः; wrongly reports that IO. reads परिनिन्युः [9] L. P. °जज्ञिरे [10] L. P. add विश्वामित्रः

वैश्वामित्रीं पुरोळाशस्विष्टकृतः पुरोनुवाक्यामन्वाह तस्या उक्तं ब्राह्मणम् ।१। वैश्वामित्रीरनुसवनं पुरोळाशानां पुरोनुवाक्या[1] अन्वाह ।२। विश्वामित्रो हैतान् पुरोळाशप्रैषान् ददर्श सलोमतायै ।३। माधुच्छन्दस्यावभिरूपे द्विदेवत्यानां प्रथमस्य पुरोनुवाक्ये



अन्वाह ।४। मधुच्छन्दा[2] हैतान् द्विदेवत्यप्रैषान्[3] ददर्श सलोमतायै ।५। गार्त्समदीं च मैधातिथीं चोत्तरयोरभिरूपे अन्वाह ।६। मैधातिथीः प्रातःसवन उन्नीयमानेभ्योऽन्वाह ।७। मेधातिथिर्ह[4] प्रातःसवन इन्द्राय सोमं प्रोवाच ।८। ता वा आवत्यो हरिवत्यो भवन्ति पुरोनुवाक्यानुरूपेण ।९। ता वा ऐन्द्र्यो भवन्ति ।१०। ऐन्द्रो हि यज्ञक्रतुः ।११। ता वै गायत्र्यो भवन्ति ।१२। गायत्रं प्रातःसवनम् ।१३। ता वै नवान्वाह ।१४। नव न्वा अत्र चमसानुन्नयन्ति[5] ।१५। षळु हैके प्रातःसवन उन्नीयमानेभ्योऽन्वाहुः ।१६। स्वयमच्छावाकः सप्तमीम् ।१७। सप्त सप्तोत्तरयोः सवनयोः ।१८। सप्त वै प्राञ्च आसीना वषट्कुर्वन्तीति वदन्तः ।१९। [6–]तद् वै खलु[–6] यथासूक्तमेवानुब्रूयात्[7] ।२०। होतुर्ह्येवैताः पुरोनुवाक्या भवन्ति ।२१। होतुर्ह्येवानुचमसमेताँश्चमसानुन्नयन्ति[8] ।२२। अथ होत्राः संयजन्ति ।२३। [9–]यजमानमेव तदनृणतायै संप्रमुञ्चन्ति[–9] ।२४। मित्रं वयं हवामह इति मैत्रावरुण्या मैत्रावरुणः स्वयैव[10] देवतया ।२५। यज्ञमुखस्यानवराध्यै ।२६। इन्द्र त्वा वृषभं वयमित्यैन्द्र्या ब्राह्मणाच्छंसी ।२७। ऐन्द्रो हि यज्ञक्रतुः ।२८। मरुतो यस्य हि क्षय इति मारुत्या पोता ।२९। यत्र ह तदिन्द्रं मरुतः पुपुवुः ।३०। तदेनानिन्द्रः सोमपीथेऽन्वाभेजे ।३१। तस्मात् स मारुत्या पोता प्रथमतश्चान्ततश्च यजति ।३२। अग्ने पत्नीरिहा वहेत्याग्निपात्नीवत्या त्वष्टृमत्या नेष्टा[11] ।३३। [12–]त्वष्टा वै[–12] देवानां पात्नीवतो नेष्टर्त्विजाम् ।३४। तस्मात् स आग्निपात्नीवत्या त्वष्टृमत्या नेष्टा प्रथमतश्चान्ततश्च यजति ।३५। उक्षान्नाय वशान्नायेत्याग्नेय्याग्नीध्रः ।३६। अग्निं[13] हि[14] स समिन्धे ।३७। तस्मात् स आग्नेय्याग्नीध्रः प्रथमतश्चान्ततश्च यजति[15] ।३८ ॥3॥

[1] P. °वाक्ये [2] BM². माधु°; ER. EM. (var.) मधुच्छन्दो [3] ER. पुरोळाशप्रैषान् [4] P. मैधा° [5] L. P. Here ends *Khaṇḍa* 2 [6–6] L. P. तदु वा आहुः; L. (var.) as here [7] L. wrongly reports IO. reading as यथासूक्तमनुब्रूयात् [8] L. P. होतुर्ह्येवैतांश्चमसाननुचमसमुन्नयन्ति; and add तस्माद्यथासूक्तमेवानुब्रूयात् [9–9] L. P. तासामुक्तं ब्राह्मणं [10] L. P. स्वया; L. (var.) as here [11] L. P. add प्रथमतश्चान्ततश्च यजति [12–12] L. P. अग्निर्वै; L. (var.) as here [13] L. P. अग्नीन् [14] L. P. ह [15] L. P. add अनुवषट्कुर्वन्त्याहुतीनामेव शान्त्या आहुतीनां प्रतिष्ठित्या अथेडाथ होतृचमसस्तस्योक्तं ब्राह्मणम् ॥३॥

अथ यत्र ह तन्नाभानेदिष्ठो मानवोऽङ्गिरःसूपहवमीषे[1] ।१। स एतां होत्रामच्छावाकीयां[2] प्रोवाच[3] ।२। स वा उपहूतायामिळायामाजगाम[4] ।३। तस्मात् तन्न प्रवृणते[5] ।४। स वा एतस्मात् पूर्वस्मादुत्तरादवान्तरदेशादाजगाम[6] ।५। तस्मादेतस्यां [7–]दिश्यासीनोऽच्छावाक उपहवमिच्छते[–7] ।६। तदाहुः कस्मादच्छावाकाय पुरोळाशदृगलं[8] परिहरन्तीति

।७। अलीकयुर्ह[9] वाचस्पतो नैमिशीयानां[10] दीक्षोपसत्सु ब्रह्मास ।८। स ह प्रसुतेऽच्छावाकीयां चकार ।९। ते होचुः ।१०। अस्मै वा इमं पुरा ब्रह्मभागं पर्यहरन्[11] ।११। कस्मा एनं परिहरामेति ।१२। [12–]तस्मा एवैनं परिहरतेत्यूचुः[–12] ।१३। [13–]तं तस्मै[–13] परिजह्रुः[14] ।१४। स एष ब्रह्मभाग एव ।१५। अथो इळाभाजो वा इतरे चमसाः ।१६। तस्मादच्छावाकाय पुरोळाशदृगलं[8] परिहरन्ति ।१७। चमसस्यैवापरीळतायै ।१८ ॥4॥

[1] P. °मीशे [2] L. P. अच्छावाकीयां होत्रां [3] L. P. ददर्श [4] L. P. इडायामुपहूतायामा° [5] L. P. प्रवृणुते [6] L. P. omit उत्तराद् [7–7] L. (var.) °च्छावाकोप° [8] L. P. पुरोडाशबृगलं [9] P. omits ह [10] L. P. नैमिषीयाणां [11] L. P. परिहराम: [12–12] L. P. ते होचुरस्मा एवैनं परिहरतेति [13–13] P. तत्तस्मै [14] L. P. पर्यहरन्

अथैनमध्वर्युराहाच्छावाक वदस्व यत् ते वाद्यमिति ।१। अच्छावाकोपहवमिच्छस्वेत्येवैनं तदाह ।२। अच्छा वो अग्निमवस इत्यच्छावाक[1] आग्नेयीरन्वाह ।३। आग्नेयं प्रातःसवनम् ।४। ता वा अनुष्टुभो भवन्ति ।५। गायत्री वै सा यानुष्टुप् ।६। गायत्रमग्नेश्छन्दः ।७। ता वै तिस्रो भवन्ति ।८। त्रिवृद् वा [2–]अग्निरङ्गारा अर्चिर्धूम[–2] इति ।९। उत्तमायै तृतीये वचने प्रणवेन निगदमुपसंदधाति ।१०। यजमान होतरध्वर्योऽग्नीद् ब्रह्मन् पोतर्नेष्टरुतोपवक्तरिति ।११। प्रशास्ता वा उपवक्ता ।१२। [3–]अपि वा ऋचाभ्युदितम्[–3] ।१३। उपवक्ता जनानामिति ।१४। इषेषयध्वमूर्जोर्जयध्वमिति ।१५। अन्नं वा इषमन्नमूर्जम् ।१६। अन्नेन समुक्षध्वमित्येवैनाँस्तदाह[4] ।१७। नि वो जामयो जिहतां न्यजामय इति ।१८। यच्च जामि[5] यच्चाजामि[6] ।१९। तद् वो निजिहतामित्येवैनाँस्तदाह[7] ।२०। [8–]अपि वा[–8] ऋचाभ्युदितम्[9] ।२१। जामिमजामिं प्र मृणीहि शत्रूनिति ।२२। नि सपत्ना यामनि बाधितास इति ।२३। निहता वः सपत्नाः समरण इत्येवैनाँस्तदाह[7] ।२४। जेषथाभीत्वरीं जेषथाभीत्वर्येति[10] ।२५। सेना वा अभीत्वरी ।२६। सेनया सेनां जयतेत्येवैनाँस्तदाह[7] ।२७। श्रवद् व इन्द्रः शृणवद् वो अग्निरिति ।२८। शृणोतु न[11] इन्द्रः शृणोत्वग्निरित्याशिषमेव तद् वदते ।२९। प्रस्थायेन्द्राग्निभ्यां सोमं वोचतोपो[12] अस्मान् ब्राह्मणान् ब्राह्मणा ह्वयध्वमिति ।३०। सर्वेष्वेव[13] तदुपहवमिच्छते[14] ।३१। तं होतोपह्वयते ।३२। स हि तेषां श्रेष्ठो भवति[15] ।३३। यं वै श्रेष्ठ्युपह्वयते ।३४। स उपहूत इति ह स्माह[16] ।३५ ॥5॥

[1] L. P. omit अच्छावाक [2–2] L. (var.) °रार्चिं° [3–3] P. अपिबत् सचाभ्युदितं [4] L. (var.) P. °त्येवैनं त° [5] P. जामिर् [6] P. °जामिस् [7] P. °त्येवैनं त° [8–8] L. P. तदेतद् [9] L. P. Here ends *Khaṇḍa* 5 [10] L. P. °भीत्वर्या इति [11] L. व [12] L. °तो यो [13] L. P. °ष्वेवै [14] L. P. add उपहवमयं ब्राह्मण इच्छतेऽच्छावाको वेत्यध्वर्युराह तं होतरुपह्वयस्वेति [15] L. P. भजते [16] L. P. Here ends *Khaṇḍa* 6



प्रत्यस्मै पिपीषत इत्यच्छावाक उन्नीयमानायान्वाह ।१। ता वै चतस्रो भवन्ति ।२। चतुष्टयं वा इदं सर्वम् ।३। अस्यैव सर्वस्याप्त्यै ।४। [1–]ऐन्द्रीरन्वाह ।५। ऐन्द्रो हि यज्ञक्रतुः[–1] ।६। ता वा अनुष्टुभो भवन्ति संशंसायै ।७। बृहत्युत्तमा भवति ।८। श्रीर्वै बृहती ।९। श्रियामेव तदन्ततः प्रतितिष्ठति।१०। प्रातर्यावभिरा गतमित्यैन्द्राग्न्या यजति।११। ऐन्द्राग्नं ह्यस्योक्थं भवति ।१२। गायत्र्या गायत्रं प्रातःसवनम् ।१३। अनुवषट्करोत्याहुतीनामेव शान्त्यै ।१४। आहुतीनां प्रतिष्ठित्यै ।१५। अनवानं प्रातःसवने यजेयुरिति ह स्माह पैङ्ग्यः ।१६। क्षिप्रं देवेभ्यो हविः प्रयच्छाम[2] इति ।१७। अर्धर्चश इति कौषीतकिः ।१८। एतद् वै छन्दसां पर्व यदर्धर्चः ।१९। पर्वश एव तद् देवेभ्यो हविः प्रयच्छति[3] ।२०। अथात ऋतुप्रैषाणामेव मीमांसा ।२१। कण्वो हैतानृतुप्रैषान् ददर्श ।२२। मेधातिथिर्याज्याः ।२३। काण्वो ह वै मेधातिथिः ।२४। तेन तौ मृत्युं पाप्मानमपजिघ्नाते[4] ।२५। स य इच्छेन्मृत्युं पाप्मानमपहन्यामिति ।२६। एताभिर्यजेत्[5] ।२७। पुरुषो वै यज्ञः ।२८। तस्य वागेवाज्यम् ।२९। सा वा एकैव भवति ।३०। तस्मादेकदेवत्यमाज्यं शंसति ।३१। प्राणाः प्रउगम्[6] ।३२। ते वा इमे बहवः प्राणाः ।३३। तस्माद् बह्वचो देवताः प्रउगे शस्यन्ते ।३४ ॥6॥

[1–1] L. P. omit [2] L. P. प्रदास्याम [3] L. P. प्रयच्छन्ति; here ends *Khaṇḍa* 7 [4] BM¹. BM². °मुपजि° [5] L. P. Here ends *Khaṇḍa* 8 [6] BM¹. BM². प्रउग:

बाहू मैत्रावरुणश्चाच्छावाकश्च ।१। तौ वै द्विगुणौ भवतः ।२। तस्मात् तौ प्रातःसवने द्विदेवत्याः शंसतः ।३। इयमेव वेना सेवनी मध्यं ब्राह्मणाच्छंसी ।४। तस्माद् ब्राह्मणाच्छंसी प्रातःसवन एकदेवत्याः शंसति ।५। आत्मा मध्यंदिनः ।६। स वा एक एव भवति ।७। तस्मान्मध्यंदिने होत्राशंसिन[1] एकदेवत्याः शंसन्ति[2] ।८। होता च निष्केवल्यम् ।९। ऊरू मैत्रावरुणश्चाच्छावाकश्च ।१०। तौ वै द्विगुणौ भवतः ।११। तस्मात् तौ तृतीयसवने द्विदेवत्याः शंसतः ।१२। इदमेव शिश्नं मध्यं ब्राह्मणाच्छंसी ।१३। तस्माद् द्विरूपं[3] जायते स्त्री च पुमांश्च ।१४। तस्माद् ब्राह्मणाच्छंसी तृतीयसवने द्विदेवत्याः शंसति ।१५। ब्राह्मणाच्छंसी भूयिष्ठाः शंसति ।१६। मध्यं[4] वै ब्राह्मणाच्छंसी ।१७। तस्मादिदमात्मनो मध्यं स्थविष्ठम्[5] ।१८ ॥7॥

[1] BM¹. BM². होत्राश्शं° [2] P. IO. शसति [3] L. (var.) विरूपं [4] L. P. आत्मा [5] L. P. Here ends *Khaṇḍa* 9

अथ यदावन्तः स्तोत्रियानुरूपा भवन्ति तत् प्रथमस्याह्नो रूपम् ।१। वैश्वामित्रौ

मैत्रावरुणस्य चाच्छावाकस्य च स्तोत्रियौ भवतः ।२। वासिष्ठौ नवर्चौ पर्यासौ ।३। अन्तावेवैतत् सदृशौ कुर्वतः ।४। स्तोत्रियाञ्छस्त्वा श्वःस्तोत्रियाननुरूपम् कुर्वते[1] ।५। [2–]अहीनसंतत्या अहीनरूपतायै[–2] ।६। अहरेव तदह्नोऽनुरूपं[3] कुर्वते ।७। अहर्वा अह्नोऽनुरूपम्[4] ।८। तदाहुः कस्मात् स्तुतमनुशस्यते कस्मात् स्तोममतिशंसन्तीति ।९। न[5] वै तत् स्तुतं भवति यन्नानुशस्यते[6] ।१०। न स स्तोमो देवान् गच्छति [7–]यं नातिशंसन्ति[–7] ।११। तस्मात् स्तुतमनुशस्यते तस्मात् स्तोममतिशंसन्तीति[8] ।१२। चतुराहावानि शस्त्राणि ।१३। पशवो वा उक्थानि ।१४। चतुष्टया वै पशवः ।१५। अथो चतुष्पादाः पशूनामेवाप्त्यै ।१६। ऐकाहिका उक्थयाज्याः ।१७। प्रतिष्ठा वा एकाहः प्रतिष्ठित्या एव ।१८। अनुवषट्कुर्वन्त्याहुतीनामेव शान्त्यै ।१९। आहुतीनां प्रतिष्ठित्या आहुतीनां प्रतिष्ठित्यै[9] ।२० ॥8॥

[1] L. P. कुर्वन्ति [2–2] L. P. अहीनरूपताया अहीनसंतत्यै [3] IO. °ह्नो रूपं [4] IO. अह्नो रूपं [5] L. P. add ह [6] ER. यन्नानुशंसन्ति [7–7] L. P. यो नातिशस्यते; ER. यन्नानु° [8] L. P. omit इति [9] L. P. Here ends *Khaṇḍa* 10

## इति तृतीयदशकेऽष्टमोऽध्यायः



अथ यत्र ह तत् सर्वचरौ देवा यज्ञमतन्वत ।१। तान् हार्बुदः काद्रवेयो मध्यंदिन[1] उपोदासृप्योवाच ।२। एका वै व इयं होत्रा न[2] क्रियते ग्रावस्तोत्रिया ।३। तां वोऽहं करवाण्युप मा ह्वयध्वमिति ।४। ते ह तथेत्यूचुः ।५। तं होपजुहुविरे[3] ।६। स एता ग्रावस्तोत्रिया अभिरूपा अपश्यत् ।७। प्रैते वदन्तु प्र वयं वदामेति प्रवदत्सु ।८। प्र हि ते वदन्ति प्रसवदति[4] ।९। अथ यत्र बृहद् बृहदिति ।१०। बृहद् वदन्ति मदिरेण मन्दिनेति तत्र ।११। वि षू मुञ्चेति[5] विमुञ्चत्सु ।१२। ता वै चतुर्दश भवन्ति ।१३। दश वा अङ्गुलयश्चत्वारो ग्रावाणः ।१४। एतदेव तदभिसंपद्यन्ते ।१५। ता वै जगत्यो भवन्ति ।१६। जागता वै ग्रावाणः ।१७। अथ यत्[6] त्रिष्टुभा परिदधाति ।१८। तेनो मध्यंदिने[1] त्रिष्टुबुपाप्ता ।१९। स वै तिष्ठन्नभिष्टौति ।२०। तिष्ठन्तीव वै ग्रावाणः ।२१। स वा उष्णीष्यपिनद्धाक्षोऽभितुष्टाव ।२२। तस्माद्धाप्येतर्ह्युष्णीष्येव[7] ग्राव्णोऽभिष्टौति ।२३। अथो खल्वाहुः ।२४। [8–]चक्षुर्हा ह[–8] स सर्प आस ।२५। तदृत्विजो विषमपीयाय ।२६। स एताः पावमानीर्विषापमदनीरभितुष्टाव[9] ।२७। तद् यत् पावमानीर्विषापमदनीरभिष्टौति[9] ।२८। यज्ञस्यैव शान्त्यै ।२९। यजमानस्य[10] च भिषज्यायै ।३० ॥1॥

[1] L. P. माध्यं° [2] P. नु [3] L. P. °जुह्विरे [4] L. P. omit [5] L. P. मुञ्चा सुषुवुषो मनीषामिति [6] L. यस् [7] L. P. °स्माद्वा अप्ये° [8–8] L. P. चक्षुरियाय; L. (var.) चक्षुर्हास; and also as here [9] L. P. °पवद° [10] L. P. यजमानानां

अथ स्तुते पवमाने दधिघर्मेण चरन्ति [1–]तस्योक्तं ब्राह्मणम्[–1] ।१। अथ हविष्पङ्क्त्या चरन्ति तस्या उक्तं ब्राह्मणम् ।२। वासिष्ठीर्मध्यंदिन उन्नीयमानेभ्योऽन्वाह ।३। वसिष्ठो ह मध्यंदिन इन्द्राय सोमं प्रोवाच ।४। ता वा आवत्यो हरिवत्यो भवन्ति पुरोनुवाक्यारूपेण ।५। ता वा ऐन्द्र्यस्त्रिष्टुभो भवन्ति ।६। ऐन्द्रं हि त्रैष्टुभं माध्यंदिनं सवनम् ।७। [2–]ता वै दशान्वाह ।८। दश ह्यत्र[3] चमसानुन्नयन्ति[–2] ।९। अथ होत्राः संयजन्ति तासामुक्तं ब्राह्मणम् ।१०। ऐन्द्रीभिस्त्रिष्टुब्भिर्मध्यंदिने प्रस्थितानां यजन्ति ।११। ऐन्द्रं हि त्रैष्टुभं माध्यंदिनं सवनम् ।१२। अनुवषट्कुर्वन्त्याहुतीनामेव शान्त्यै ।१३। आहुतीनां प्रतिष्ठित्यै ।१४। अथेळाथ होतृचमसस्तस्योक्तं ब्राह्मणम् ।१५। हुतेषु दाक्षिणेषु दक्षिणा नीयन्ते तासामुक्तं ब्राह्मणम् ।१६। वैश्वामित्रीं मरुत्वतीयग्रहस्य पुरोनुवाक्यामन्वाह तस्या उक्तं ब्राह्मणम् ।१७ ॥2॥

[1–1] L. P. अत्र कालो हि भवत्यथो सवनस्यैव सरसताया [2–2] ER. अनुवषट्करोत्याहुतीनामेव शान्त्यै । आहुतीनां प्रतिष्ठित्यै । [3] L. P. न्वा अत्र

वामदेव्यं मैत्रावरुणस्य पृष्ठं भवति ।१। शान्तिर्वै भेषजं वामदेव्यम् ।२। शान्तिरेवैषा भेषजं यज्ञे क्रियते ।३। नौधसं ब्राह्मणाच्छंसिनः ।४। तद् वै निधनवद् भवति ।५। प्रतिष्ठा वै निधनं प्रतिष्ठित्या एव ।६। कालेयमच्छावाकस्य ।७। तद् वा ऐळं बृहतीषु कुर्वन्ति ।८। पशवो वा इळा ।९। पशवो बृहती ।१०। बार्हताः पशवः पशूनामेवाप्त्यै ।११। अथैतान्सामप्रगाथाननुशंसन्ति[1] ।१२। तथैषां होतुर्न्यायादनितं भवति ।१३। पञ्चर्चे मैत्रावरुणस्य चाच्छावाकस्य चोक्थमुखे भवतः ।१४। एकादशर्चौ पर्यासौ ।१५। अन्तावेवैतत् सदृशौ कुर्वतः ।१६। विश्वामित्रस्य च वामदेवस्य[2] च मैत्रावरुणः शंसति ।१७। वामदेव्यं[3] ह्यस्य पृष्ठं[4] भवति ।१८। विश्वामित्रस्य च वसिष्ठस्य च ब्राह्मणाच्छंसी ।१९। वासिष्ठो ह्यस्य पर्यासो भवति ।२०। भरद्वाजस्य च[5] विश्वामित्रस्य चाच्छावाकः ।२१। वैश्वामित्रो ह्यस्य पर्यासो भवति ।२२। ते वै चतुर्णामृषीणां शंसन्ति ।२३। आ चतुरं वै द्वन्द्वं मिथुनं प्रजननं प्रजात्यै ।२४। वैश्वामित्रे मैत्रावरुणस्य च ब्राह्मणाच्छंसिनश्चोक्थमुखे भवतः ।२५। पर्यासोऽच्छावाकस्य ।२६। वाग् वै विश्वामित्रः ।२७। वाचैव तत् सर्वतो यज्ञं तन्वत इत्येतद् ब्राह्मणम् ।२८ ॥3॥

[1] L. P. omit अनु  [2] IO. ०देव्यस्य  [3] L. P. वामदेवो  [4] L. P. पर्यासो
[5] IO. omits

प्रायणीयोदयनीययोरैकाह्यं च भवति[1] ।१। वामदेव्यं मैत्रावरुणस्याहरहः पृष्ठं भवति ।२। शान्तिर्वै भेषजं वामदेव्यम् ।३। शान्तिरेवैषा भेषजमहरहर्यज्ञे क्रियते ।४। अथैतान् कद्वतः प्रगाथानहरहः शंसन्ति ।५। को वै प्रजापतिः ।६। प्रजापतावेव तदहरहः प्रतितिष्ठन्तो यन्ति ।७। अथो अशान्तानि वा एतेऽहीनसूक्तान्यन्यान्यन्यान्युपयुञ्जाना[2] यन्ति ।८। तान्येवैतैः कद्वद्भिः प्रगाथैरहरहः शमयन्तो यन्ति ।९। अथैतास्तन्व्यास्त्रिष्टुभ उक्थप्रतिपदोऽहरहः[3] शस्यन्ते ।१०। बलं वै वीर्यं त्रिष्टुप् ।११। बल एव तद् वीर्येऽहरहः[4] प्रतितिष्ठन्तो यन्ति ।१२। अप प्राच इन्द्र विश्वाँ अमित्रानिति सौकीर्तं[5] मैत्रावरुणोऽपनुत्तवतीं पाप्मन एवापनुत्त्यै ।१३। यदार्षेये सूक्ते तदार्षेये उक्थमुखीये इतरयोः ।१४। ब्रह्मणा ते ब्रह्मयुजा युनज्म्युरुं नो लोकमनु नेषि विद्वानिति[6] ब्रह्मवत्युरुवत्यौ ।१५। ब्रह्मणि चैव तदुरुगाये चाहरहः प्रतितिष्ठन्तो यन्ति ।१६ ॥4॥

[1] L. P. Here ends *Khaṇḍa* 3  [2] L. P. एते अही०  [3] L. (var.) उक्थ्य०  [4] L. (var.) वीर्ये चाहरहः  [5] P. सौकीर्तीं  [6] L. P. add उक्थमुखीये

अथैतानि शिल्पानि मध्यमे त्र्यहे शस्यन्ते ।१। शिल्पवान् ह्येष मध्यमस्त्र्यहो भवति



।२। विराजश्च वैमद्यश्च[1] चतुर्थेऽहन् ।३। वैराजं हि चतुर्थमहः ।४। पङ्क्तयश्च महापङ्क्तयश्च पञ्चमेऽहन् ।५। पाङ्क्तं हि पञ्चममहः ।६। अतिच्छन्दसः षष्ठेऽहन् ।७। आतिच्छन्दसं हि षष्ठमहः ।८। अथो अपृष्ठं वा [2-]उ तद्[-2] यदन्यत्र बृहत्यै क्रियते ।९। च्यवन्त उ वा अत्र बृहत्यै पृष्ठानि ।१०। शिल्पेष्वेव तदहरहः प्रतितिष्ठन्तो यन्ति ।११। अथो अन्तरिक्षं वा एष मध्यमस्त्र्यहः ।१२। अनारम्भणं वा इदमन्तरिक्षमप्रतिष्ठानम् ।१३। शिल्पेष्वेव तदहरहः प्रतितिष्ठन्तो यन्ति ।१४। तानि वै तृचानि भवन्ति ।१५। त्रिवृद् वै शिल्पं नृत्तं[3] गीतं वादितमिति ।१६। तेष्वेव तदहरहः प्रतितिष्ठन्तो यन्ति ।१७। मा चिदन्यद् वि शंसत मा भेम मा श्रमिष्मेति मैधातिथं मैत्रावरुणस्य दशमेऽहन् बृहतीषु[4] पृष्ठं भवति ।१८। न हि तस्य प्राग् दशमादह्नो बृहतीषु पृष्ठं भवति ।१९। एकस्था वै श्रीः ।२०। श्रीर्वै बृहती ।२१। श्रियामेव तदन्ततः [5-]प्रतितिष्ठन्तो यन्ति[-5] ।२२ ॥5॥

[1] L. वैमध्यश्च; P. वै मध्यमश्  [2-2] L. P. एतद्  [3] L. P. नृत्यं  [4] L. P. omit
[5-5] L. P. प्रतितिष्ठति

द्विपदाः शस्त्वैकाहिकानि शंसन्ति ।१। प्रतिष्ठा वा एकाहः [1-]प्रतिष्ठा दशममहः[-1] ।२। प्रतिष्ठानीयं वै छन्दो द्विपदाः प्रतिष्ठित्या एव[2] ।३। नौधसं ब्राह्मणाच्छंसिनस्तस्योक्तं ब्राह्मणम् ।४। [3-]पङ्क्तिषु ब्राह्मणाच्छंसिने चाच्छावाकाय च प्रणयन्ति पञ्चमेऽहन् ।५। पाङ्क्तं हि पञ्चममहः[-3] ।६। गायत्रीषु ब्राह्मणाच्छंसिने प्रणयन्ति षष्ठेऽहन् ।७। रैवतस्यैवाह्नो रूपेण ।८। [3-]अहीनसूक्तानि षष्ठेऽहनि शंसन्ति[-3] ।९। [4-]अहीनसंतत्या अहीनरूपतायै[-4] ।१०। अहीनान्त्सर्वान् कामानाप्नुम इति ।११। न ह्यत्र किंचन हीयते[5] ।१२। उदु ब्रह्माण्यैरत श्रवस्येत्यहरहः पर्यासः ।१३। ऋतवो वा उदुब्रह्मीयम् ।१४। ऋतुष्वेव तदहरहः प्रतितिष्ठन्तो यन्ति ।१५। ता[6] वै षड् भवन्ति ।१६। षड् वा ऋतवः ।१७। ऋतुष्वेव तदहरहः प्रतितिष्ठन्तो यन्ति ।१८ ॥6॥

[1-1] ER. प्रतिष्ठित्या एव  [2] L. P. Here ends *Khaṇḍa* 5  [3-3] L. P. ER. omit
[4-4] L. P. अहीनरूपताया अहीनसंतत्या  [5] L. ह्रियते  [6] ER. ते

कालेयमच्छावाकस्य तस्योक्तं ब्राह्मणम् ।१। षट्पदास्वच्छावाकाय प्रणयन्ति षष्ठेऽहन् ।२। षष्ठस्यैवाह्नो रूपेण ।३। अभि तष्टेव दीधया मनीषामित्यहरहः पर्यासः ।४। प्रजापतिर्वा अभितष्टीयम्[1] ।५। प्रजापतावेव तदहरहः प्रतितिष्ठन्तो यन्ति ।६। तद् वा[2] अनिरुक्तं भवति ।७। अनिरुक्त उ वै प्रजापतिः ।८। [3-]तत् प्राजापत्यं रूपम्[-3] ।९। सा वा अत्रै-

कैव निरुक्ता ।१०। एक उ वै प्रजापतिः ।११। [3–]तत् प्राजापत्यं रूपम्[–3] ।१२। [4]दशर्चं भवति ।१३। दशेमे प्राणाः ।१४। प्राणानेव तद् यज्ञेषु[5] च यजमानेषु च दधाति ।१५। द्विषूक्ता होत्राणां [6–]मध्यंदिनाः ।१६। द्व्युक्थस्यैव[–6] होतुः प्रत्युद्यमाय[7] ।१७। अथो संवत्सरो वै होता ।१८। ऋतवो होत्राशंसिनः ।१९। तद् यद् द्वन्द्वं समस्ता ऋतव आख्यायन्ते ग्रीष्मो वर्षा हेमन्त इति ।२०। तस्माद् द्विषूक्ता होत्राणां मध्यंदिनाः ।२१। [8–]अथो आत्मा वै होता ।२२। अङ्गानि होत्राशंसिनः ।२३। तद् यद् द्विगुणान्यङ्गानि भवन्ति[–8] ।२४। तस्माद् द्विषूक्ता होत्राणां मध्यंदिनाः ।२५ ॥7॥

[1] IO. अभितिष्ठितं [2] L. P. omit [3–3] L. P. प्रजापतावेव तदहरहः प्रतितिष्ठन्तो यन्ति [4] L. P. add तेषामेतान्यच्युतानि भवन्ति पृष्ठं मैत्रावरुणस्य पर्यासावितरयोस्तेष्वेव तदहरहः प्रतितिष्ठन्तो यन्ति ॥७॥ [5] L. P. यज्ञे [6–6] P. मध्यंदिनाद्युक्तस्यैव [7] L. P. °द्यमाया [8–8] BM². omits

स्तोमातिशंसं प्रातःसवनेषु शस्त्वाहीनसूक्तानि मध्यंदिनेषु शंसन्ति चतुर्विंशेऽभिजिति विषुवति बृहत्पृष्ठे[1] विश्वजिति महाव्रतीयेऽहन् ।१। अहीनो ह्येतान्यहानि ।२। [2–]तद् यदहीनसूक्तानि मध्यंदिनेषु[–2] शंसन्ति ।३। पराञ्चीनि वा एतान्यहान्यनभ्यावर्तीनि[3] ।४। [4–]नेत् पराञ्चोऽगामेति[–4] ।५। अहीनसूक्तानि[5] शस्त्वैकाहिकीभिः[6] परिदधति[7] ।६। प्रतिष्ठा वा एकाहः प्रतिष्ठित्या एव ।७। पञ्च पञ्च सूक्तानि मध्यंदिने[1] मैत्रावरुणः शंसति सर्वेषु छन्दोमेषु ।८। पशवो वै छन्दोमाः ।९। पाङ्क्ताः पशवः ।१०। पशूनामेवाप्त्यै ।११। चत्वारि चत्वारि सूक्तानि[1] ब्राह्मणाच्छंसी चाच्छावाकश्च [4–]शंसतः सर्वेषु छन्दोमेषु[–4] ।१२। पशवो वै छन्दोमाः ।१३। चतुष्टया वै पशवः ।१४। अथो चतुष्पादाः पशूनामेवाप्त्यै ।१५। पञ्चाहावानि शस्त्राणि ।१६। पशवो वा उक्थानि ।१७। पाङ्क्ताः पशवः ।१८। पशूनामेवाप्त्यै ।१९। ऐकाहिका उक्थयाज्याः ।२०। प्रतिष्ठा वा एकाहः प्रतिष्ठित्या एव ।२१। अनुवषट्कुर्वन्त्याहुतीनामेव शान्त्यै ।२२। आहुतीनां प्रतिष्ठित्या आहुतीनां प्रतिष्ठित्यै ।२३ ॥8॥

[1] L. P. omit [2–2] L. P. अहीनसूक्तानि शस्त्वैकाहिकानि [3] L. P. add भवन्ति [4–4] L. P. omit [5] L. P. तद्यदहीन° [6] L. P. °काहिकानि [7] L. P. शंसन्ति

## इति तृतीयदशके नवमोऽध्यायः



[1]त्रिष्टुभमादित्यग्रहस्य पुरोनुवाक्यामन्वाह तस्या उक्तं ब्राह्मणम् ।१। अथ स्तुते पवमाने पशुना [2–]चरन्ति तस्योक्तं ब्राह्मणम्[–2] ।२। अथ हविष्पङ्क्त्या चरन्ति तस्या उक्तं ब्राह्मणम् ।३। वामदेव्यास्तृतीयसवन उन्नीयमानेभ्योऽन्वाह ।४। वामदेवो ह[3] तृतीयसवन इन्द्राय सोमं प्रोवाच ।५। ता वा आवत्यो हरिवत्यो भवन्ति पुरोनुवाक्यारूपेण ।६। ता वा ऐन्द्रार्भव्यस्त्रिष्टुभो भवन्ति ।७। इन्द्रमेव तदर्धभाजं सवनस्य करोति ।८। ता वै नवान्वाह ।९। [4–]नव ह्यत्र[–4] चमसानुन्नयन्ति ।१०। [5–]यथा तु[–5] प्रायणं[6] तथोदयनम् ।११। अथ होत्राः संयजन्ति तासामुक्तं ब्राह्मणम् ।१२। अन्धस्वत्यो मद्वत्यः पीतवत्यो जगत्यो याज्याः ।१३। जागतं हि तृतीयसवनम्[7] ।१४। अनुवषट्कुर्वन्त्याहुतीनामेव शान्त्यै ।१५। आहुतीनां प्रतिष्ठित्यै ।१६। अथेळाथ होतृचमसस्तस्योक्तं ब्राह्मणम् ।१७। औपासनाँस्तृतीयसवन उपास्यन्ति तेषामुक्तं ब्राह्मणम्[8] ।१८। त्रिष्टुभं सावित्रग्रहस्य पुरोनुवाक्यामन्वाह तस्या उक्तं ब्राह्मणम् ।१९। अथ यदुक्थे अन्तरेणाग्नीत् पात्नीवतस्य यजति ।२०। तेन तौ होतारमनुसमश्नुवाते[9] ।२१। ऐन्द्राग्नान्युक्थ्योक्थानि भवन्ति तेषामुक्तं ब्राह्मणम् ।२२। अथैतान्यैन्द्राणि [10–]जागतानि सूक्तानि[–10] शंसन्ति ।२३। पशवो वै जगती ।२४। जागताः पशवः पशूनामेवाप्त्यै ।२५ ॥1॥

[1] L. P. add वसूनां वै प्रातःसवनं रुद्राणां माध्यंदिनं सवनमादित्यानां तृतीयसवनं तद्यददादित्यग्रहेण तृतीयसवनं प्रतिपद्यते स्वयैव तद्देवतया प्रतिपद्यतेऽथो धीतरसं वा एतत्सवनं यत्तृतीयसवनमथैष सरसो ग्रहो यदादित्यग्रहस्तेनैव तत्तृतीयसवनं सरसं करोति [2–2] L. P. चरन्त्यत्र कालो हि भवत्यथो सवनस्यैव सरसताया [3] L. P. हि [4–4] L. P. दश न्वा अत्र [5–5] P. यथाऽनु [6] IO. प्रायणीयं [7] L. P. add मद्वत्यो मद्वद्धि तृतीयसवनम् [8] L. P. add अथ सावित्रग्रहेण चरन्ति तस्योक्तं ब्राह्मणं [9] L. P. Here ends *Khaṇḍa* 1 [10–10] L. P. जागतान्यहरहः

तान्यच्युतानि स्युरिति हैक आहुः सवनधरणानीति वदन्तः ।१। अन्यान्यन्यानीति त्वेव स्थितम् ।२। अन्यदन्यद्व्यहरुपयन्ति ।३। अथ वारुणं बार्हस्पत्यं वैष्णवमिति शंसन्ति ।४। जगती वा एतेषां छन्दस्त्रिष्टुबिन्द्रस्य ।५। तद् यच्छन्दसी विपरीते द्विदेवत्यतायै ।६। ऐन्द्रावरुणमैन्द्राबार्हस्पत्यमैन्द्रावैष्णवमिति शंसन्ति[1] ।७। ग्रहानेवैतैरनुशंसन्ति ।८। एवं हि ग्रहा गृहीता भवन्ति[2] ।९। चर्षणीधृतं मघवानमुक्थ्यमिति मैत्रावरुणस्तस्योक्तं ब्राह्मणम् ।१०। वासिष्ठोऽहरहः पर्यासो भवति ।११। वसिष्ठो हैतन्मैत्रावरुणीयायै तृतीयसवनं ददर्श ।१२। तस्माद् वासिष्ठोऽहरहः पर्यासो भवति ।१३। ककुप्सु मैत्रावरुणाय प्रणयन्ति तृतीयेऽहन् ।१४। तेनो स ब्राह्मणाच्छंसिनो वशमेति ।१५। अथ चतुर्थेऽहन्त्स्वे

स्वे छन्दसि प्रणयन्ति ।१६। स्वे स्व एव तच्छन्दसि प्रतितिष्ठन्तो यन्ति ।१७। गायत्रीषु मैत्रावरुणाय प्रणयन्त्युष्णिक्षु ब्राह्मणाच्छंसिनेऽनुष्टुप्स्वच्छावाकायोत्तरोत्तरितायै ।१८। तथैषां चतुर्भिश्चतुर्भिरक्षरैश्छन्दांस्यभ्युद्यन्ति ।१९। पङ्क्तिषु मैत्रावरुणाय प्रणयन्ति पञ्चमेऽहन् ।२०। पाङ्क्तं हि पञ्चममहः ।२१ ॥2॥

[1] P. शंसति [2] L. P. Here ends *Khaṇḍa* 2

द्विपदासु षष्ठेऽहन् प्रणयन्ति सर्वेषाम्[1] ।१। द्वैपदं हि षष्ठमहः ।२। [2–]अथो गूर्दं[–2] भद्रमुद्वंशपुत्रमिति सामानि कुर्वन्ति ।३। अथो द्विपदासहचराणि[3] वै[4] शिल्पानि भवन्ति ।४। तस्माच्छिल्पानि[5] शस्यन्ते ।५। नेच्छिल्पेभ्योऽगामेति[6] ।६। नाभानेदिष्ठेनात्र होता रेतः सिञ्चति ।७। तन्मैत्रावरुणाय[7] प्रयच्छति ।८। तत् स वालखिल्याभिर्विकरोति ।९। अथैता वालखिल्या विहृताः शंसति[8] ।१०। पच्छः प्रथमे सूक्ते विहरति ।११। पर्वश एवैनं तत् संभरति ।१२। अर्धर्चशो द्वितीये ।१३। द्वे वै पुरुषः[9] कपले[10] ।१४। ते एव तत् संदधाति ।१५। ऋचमृचं[11] तृतीये ।१६। कृत्स्नमेवैनं तत् संभरति ।१७। विपर्यस्येन्नाराशंसे ।१८। तस्माद् विपर्यस्ता गर्भा जायन्ते[12] ।१९। तार्क्ष्यं दूरोहणं रोहति ।२०। वायुर्वै तार्क्ष्यः ।२१। प्राणो वै वायुः ।२२। [13–]प्राणमेव तद् यजमाना रोहन्ति[–13] ।२३ ॥3॥

[1] L. P. omit [2–2] L. (var.) अथोऽगूर्दं; P. अथोऽगूर्ध्वं [3] P. द्विपदा:सह॰ [4] IO. omits
[5] L. P. तस्मादत्र शिल्पानि [6] L. P. Here ends *Khaṇḍa* 3 [7] L. तं मै॰ [8] P. शंसन्ति
[9] L. (var.) पुरुष [10] L. P. कपाले [11] IO. ॰मृचां [12] L. P. Here ends *Khaṇḍa* 4
[13–13] L. प्राणमेवा(var. P. प्राण एवा)स्मिंस्तद्दधाति

तं ब्राह्मणाच्छंसिने प्रयच्छति ।१। तं स सुकीर्तिना योनिना प्रतिगृह्णाति जातम् ।२। अथैतं वृषाकपिं पङ्क्तिशंसं[1] शंसति ।३। [2–]पञ्चपदा पङ्क्तिः ।४। पाङ्क्तो वै यज्ञो यज्ञस्यैवाप्त्यै ।५। न्यूङ्खयति[–2] ।६। अन्नं वै न्यूङ्खः ।७। जात [3–]एवास्मिंस्तदन्नाद्यं प्रतिदधाति[–3] ।८। अथैतत् कुन्तापं यथाछन्दसं शंसति ।९। सर्वेषामेव छन्दसामाप्त्यै[4] ।१०। नाराशंसी रैभीः कारव्या इन्द्रगाथा भूतेच्छदः[5] पारिक्षितीरेतशप्रलापमिति ।११। एतशो ह वै मुनिर्यज्ञस्यायुर्ददर्श[6] ।१२। स ह पुत्रानुवाच ।१३। पुत्रका यज्ञस्यायुरदर्शं तदभिलपिष्यामि ।१४। मा मा दृप्तं मन्ध्वमिति ।१५। ते ह तथेत्यूचुः ।१६। तद्धाभिललाप[7] ।१७। तस्य ह ज्येष्ठः पुत्रोऽभिसृप्य मुखमपिजग्राह[8] ।१८। अदृपद् वै नः पितेति ।१९। तं होवाच ।२०। अपनश्य धिक् त्वा जाल्मास्तु ।२१। पापिष्ठां ते प्रजां करिष्यामि[9] ।२२। यद् वै



मे जाल्म मुखं नाप्यग्रहीष्यः ।२३। शतायुषं गामकरिष्यं सहस्रायुषं पुरुषमिति ।२४। तस्मादैतशायना आजानेयाः सन्तो भृगूणां[10] पापिष्ठाः पित्राभिशप्ताः[11] स्वया देवतया स्वेन प्रजापतिना[12] ।२५ ॥4॥

[1] L. P. add न्यूङ्खं [2–2] L. P. omit [3–3] L. P. एवास्मिंस्तदन्नाद्ये प्रतितिष्ठति
[4] L. P. कामानामा॰ [5] P. ॰च्छन्दः [6] L. (var.) अदर्श, अदर्शत् (for ददर्श) [7] IO. L. (var.) तद्धापि॰ [8] L. (var.) ॰मभि॰ [9] L. P. करोमि; L. (var.) as here [10] L. भृगूनां
[11] L. P. पित्रा हि॰ [12] L. P. Here ends *Khaṇḍa* 5

आदित्याङ्गिरसीरुपसंशंसति ।१। आदित्याश्च ह वा अङ्गिरसश्चास्पर्धन्त ।२। वयं पूर्वे स्वर्गं लोकमेष्याम इत्यादित्याः ।३। वयमित्यङ्गिरसः ।४। तेऽङ्गिरस आदित्यान्[1] प्रजिघ्युः ।५। श्वः सुत्या नो याजयत न इति ।६। तेषां हाग्निर्दूत आस ।७। त आदित्या ऊचुः ।८। अथास्माकमद्य सुत्या[2] ।९। तेषां नस्त्वमेव होतासि[3] ।१०। बृहस्पतिर्ब्रह्मायास्य उद्गाता घोर आङ्गिरसोऽध्वर्युरिति ।११। तान् न[4] प्रत्याचचक्षिरे[5] ।१२। तमेताभिः शिशिक्षुः ।१३। तदेता अभिवदन्ति[6] ।१४। तेऽश्वं श्वेतं दक्षिणां निण्युरेतमेव[7] य एष तपति ।१५। तत उ हादित्याः स्वरीयुः ।१६। स्वरेति य एवं वेद[8] ।१७। दिशां क्लृप्तीः शंसति ।१८। दिशो हास्मै कल्पन्ते ।१९। जनकल्पाः शंसति ।२०। जना हास्मै कल्पन्ते ।२१। प्रवल्हिकाः प्रतीराधानतिवादामाहनस्याः[9] सर्वा वाचो वदति ।२२। तस्मात् पुरुषः सर्वा वाचो वदति ।२३। एकैकामितरे पशवः ।२४। ता वा अष्टौ भवन्ति ।२५। एताभिर्वै देवाः सर्वा अष्टीराश्नुवत ।२६। तथो एवैतद् यजमाना एताभिरेव सर्वा अष्टीरश्नुवते ।२७। कपृन्नरः कपृथमुद्दधातन यद्ध प्राचीरजगन्तेति द्वे एकपातिन्यौ[10] ।२८। ता दश संपद्यन्ते ।२९। दशदशिनी विराट् ।३०। श्रीर्विराळन्नाद्यम् ।३१। श्रियो विराजोऽन्नाद्यस्योपाप्त्यै[11] ।३२। दाधिक्रीं शंसति ।३३। वाग् वै दाधिक्री ।३४। वाचमेवास्मिंस्तद् दधाति ।३५। पावमानं[12] शंसति ।३६। पवित्रं वै पावमान्यः ।३७। पुनात्येवैनत्[13] तत् ।३८ ॥5॥

[1] L. P. आदित्येभ्य: [2] IO. BM¹. BM². सुत्यां [3] L. (var.) होतास, होता; P. होतास
[4] L. P. ह; L. (var.) as here [5] IO. L. (var.) प्रत्याचक्षिरे [6] L. (var.) ॰वदन्तस्
[7] L. P. निन्यु॰; L. (var.) as here [8] L. P. Here ends *Khaṇḍa* 6 [9] L. ॰नतीवा॰; P. ॰नतीवादा महानस्या: [10] L. P. तथा ता (P. त) आनाक्षिप्यो भवन्ति (for एकपातिन्यौ); L. (var.) तथा भवन्ति; and as here [11] L. P. Here ends *Khaṇḍa* 7 [12] L. P. पावमानी:
[13] L. P. ॰वैनं

तमच्छावाकाय प्रयच्छति ।१। तं स एवयामरुता चारयति जातम् ।२। न्यूङ्ख्यति ।३। न्यूङ्ख्मानक इव वै प्रथमं चिचर्षँश्चरति[1] ।४। तदेनममृताच्छन्दसोऽमृतत्वाय प्रजनयन्ति[2] ।५। तेऽमृतत्वमाप्नुवन्ति ये षष्ठमहरुपयन्ति ।६। स्तोत्रियानुरूपौ शस्त्वा वालखिल्याः शंसति ।७। आत्मा वै स्तोत्रियानुरूपौ ।८। प्राणा वालखिल्याः ।९। अनन्तर्हिता उ हेम आत्मनः[3] प्राणाः ।१०। तदाहुः कस्माद् वालखिल्या इति ।११। यद् वा उर्वरयोरसंभिन्नं भवति ।१२। खिल[4] इति वै तमाचक्षते[5] ।१३। वालमात्रा उ हेमे प्राणा असंभिन्नाः ।१४। तद् यदसंभिन्नाः ।१५। तस्माद् वालखिल्याः[6] ।१६। तार्क्ष्ये दूरोहणं रोहतीति तदुक्तम् ।१७। गायत्रीषु ब्राह्मणाच्छंसिने प्रणयन्ति द्वितीयेऽहन् ।१८। तेनो स मैत्रावरुणस्य वशमेति ।१९। प्र मंहिष्ठाय बृहते बृहद्रय इति जागतं[7] षळृचं [8-]तस्योक्तं ब्राह्मणम्[-8] ।२०। द्विस्तावद् यावन्मैत्रावरुणस्य ।२१। कार्ष्णोऽहरहः पर्यासो भवति ।२२। कृष्णो हैतदाङ्गिरसो ब्राह्मणाच्छंसीयायै तृतीयसवनं ददर्श ।२३। तस्मात् कार्ष्णोऽहरहः पर्यासो भवति ।२४ ॥6॥

[1] L. चिचरिषुश्च°; wrongly reports IO. reading as चिचर्षंश्चरति; P. चिचरिषश्च°; BM[1]. चिचर्षाँश्च° [2] L. P. °यति [3] L. P. omit [4] L. P. खिलम् [5] L. P. तदा° [6] L. P. Here ends *Khaṇḍa* 8 [7] L. P. BM[1]. omit [8-8] L. P. omit

उष्णिक्ष्वच्छावाकाय[1] प्रणयन्ति प्रथमेऽहन्[2] ।१। तेनो स ब्राह्मणाच्छंसिनो वशमेति ।२। ऋतुर्जनित्रीयं त्रयोदशर्चं [3-]तस्योक्तं ब्राह्मणम्[-3] ।३। द्विस्तावद् यावद्[4] ब्राह्मणाच्छंसिन एका चोप ।४। भारद्वाजोऽहरहः पर्यासो भवति ।५। भरद्वाजो हैतदच्छावाकीयायै तृतीयसवनं ददर्श ।६। तस्माद् भारद्वाजोऽहरहः पर्यासो भवति ।७। वैष्णवे विपर्यस्यत्यच्छावाकः ।८। पर्यासावितरौ ।९। द्विपर्यासौ मैत्रावरुणश्च[5] ब्राह्मणाच्छंसी च ।१०। एकपर्यासोऽच्छावाकः ।११। तद् यदच्युतपर्यासोऽच्छावाकः ।१२। प्रतिष्ठा वा अच्छावाकः प्रतिष्ठित्या एव[6] ।१३। षट्त्रिंशतं मैत्रावरुणश्चतुर्विंशे शंसति ।१४। चत्वारिंशतं ब्राह्मणाच्छंसी ।१५। चतुश्चत्वारिंशतमच्छावाकः ।१६। तद् विंशतिशतम् ।१७। विंशतिशतं वा ऋतोरहानि ।१८। तदृतुमाप्नुवन्ति[7] ।१९। ऋतुना संवत्सरम् ।२०। ये च संवत्सरे कामाः ।२१ ॥7॥

[1] L. P. अनुष्टुप्स्वच्छा° [2] L. P. तृतीये° [3-3] L. P. omit [4] ER. omits [5] L. (var.) P. °णस्य च [6] L. P. Here ends *Khaṇḍa* 9 [7] L. P. °माप्नोति; BM[1]. omits this passage



पञ्च पञ्च सूक्तानि तृतीयसवने[1] मैत्रावरुणः शंसति सर्वेषु छन्दोमेषु ।१। पशवो वै छन्दोमाः ।२। पाङ्क्ताः पशवः ।३। पशूनामेवाप्त्यै ।४। चत्वारि सूक्तानि ब्राह्मणाच्छंसी शंसति प्रथमे छन्दोमे ।५। पशवो वै छन्दोमाः ।६। चतुष्टया वै पशवः ।७। अथो चतुष्पादाः पशूनामेवाप्त्यै ।८। [2-]पञ्च पञ्च सूक्तान्युत्तरयोश्छन्दोमयोः[-2] ।९। पशवो वै छन्दोमाः ।१०। पाङ्क्ताः पशवः ।११। पशूनामेवाप्त्यै ।१२। पञ्च सूक्तान्यच्छावाकः शंसति प्रथमे छन्दोमे ।१३। पशवो वै छन्दोमाः ।१४। पाङ्क्ताः पशवः ।१५। पशूनामेवाप्त्यै ।१६। षट् षळुत्तरयोश्छन्दोमयोः[3] ।१७। षड् वा ऋतवः संवत्सरः ।१८। संवत्सरस्यैवाप्त्यै ।१९। चतुराहावानि शस्त्राणि ।२०। पशवो वा उक्थानि ।२१। चतुष्टया वै पशवः ।२२। अथो चतुष्पादाः पशूनामेवाप्त्यै ।२३। षष्ठ एवाहन् मैत्रावरुणस्य पञ्चाहावं भवति ।२४। पशवो वा उक्थानि ।२५। पाङ्क्ताः पशवः ।२६। पशूनामेवाप्त्यै ।२७। ऐकाहिका उक्थयाज्याः ।२८। प्रतिष्ठा वा एकाहः प्रतिष्ठित्या एव ।२९। अनुवषट्कुर्वन्त्याहुतीनामेव शान्त्यै ।३०। आहुतीनां प्रतिष्ठित्यै[4] ।३१ ॥8॥

[1] L. P. omit [2-2] L. P. पञ्च पञ्चोत्तरयोः [3] L. P. omit छन्दोमयोः
[4] L. P. Here ends *Khaṇḍa* 10

पञ्च छन्दांसि रात्रौ शंसन्ति ।१। अनुष्टुभं गायत्रीमुष्णिहं त्रिष्टुभं जगतीमिति ।२। एतानि वै रात्रिच्छन्दसानि[1] ।३। पञ्चाहावा रात्रिः ।४। वाजपेयस्य चातिरिक्तोक्थम् ।५। उक्थस्यातिग्रहो रात्रिः ।६। छन्दसे[2] छन्दस एव तदाह्वयन्त[3] इति ह स्माह कौषीतकिरजामितायै ।७। अथ यत् तिरोअह्न्यवतीं त्रिष्टुभमाश्विनोक्थग्रहस्य पुरोनुवाक्यामन्वाह ।८। तिरोअह्न्यवान् प्रैषः ।९। तिरोअह्न्या हि सोमा भवन्ति ।१०। अथो बलं वै वीर्यं त्रिष्टुप् ।११। बलमेव तद् वीर्यं यजमाने दधाति ।१२। चतुराहावान्यप्तोर्यामस्यातिरिक्तोक्थानि[4] ।१३। पशवो वा उक्थानि ।१४। चतुष्टया वै पशवः ।१५। अथो चतुष्पादाः पशूनामेवाप्त्यै ।१६। क्षैत्रपत्यः[5] परिधानीयाः कुर्वते ।१७। इयं वै क्षेत्रं पृथिवी ।१८। अस्यामदीनायामन्ततः प्रतिष्ठास्याम इति ।१९। अस्यामेव तददीनायामन्ततः प्रतितिष्ठन्ति[6] ।२०। अथ यत् तिरोअह्न्यवत्यस्त्रिष्टुभो याज्या भवन्ति ।२१। तिरोअह्न्या हि[7] सोमा भवन्ति ।२२। अथो बलं वै वीर्यं त्रिष्टुप् ।२३। बलमेव तद् वीर्यं यजमाने दधाति[8] ।२४। अनुवषट्कुर्वन्त्याहुतीनामेव शान्त्यै ।२५। आहुतीनां प्रतिष्ठित्यै ।२६। अथ हारियोजनेन चरन्ति तस्योक्तं ब्राह्मणम् ।२७। त्रिष्टुभं हारियोजनस्य पुरोनुवाक्यामन्वाह तस्या उक्तं ब्राह्मणम् ।२८। अथ यदतिप्रैषस्य पुरोनुवाक्यामन्वाह ।२९। अवीर्यो ह[9] वा उ स

